Downloaded from https:// www.studiestoday.com

# विजेत्री

## ( संस्कृतसाहित्यम् )

( माध्यमिक शिक्षाबोर्ड, राजस्थानेन निर्धारित-पाठ्यक्रममनुसृत्य द्वादशकक्षायै संस्कृतस्य पाठ्यपुस्तकम् )

माध्यमिक शिक्षा बोर्ड राजस्थान, अजमेर

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## पाठ्य पुस्तक निर्माण समिति

# विजेत्री

( संस्कृतसाहित्यम् )

( द्वादशकक्षायै संस्कृतस्य पाठ्यपुस्तकम् )

**संयोजकः सम्पादकश्च**

**डॉ. राजेश जोशी**

सह आचार्यः, संस्कृतविभागः,

श्री गोविन्द गुरु राजकीय महाविद्यालयः, बाँसवाडा

**सदस्या :**

**डॉ. धनञ्जयकुमारसिंहः**

सह आचार्यः, संस्कृतविभागः, राजकीय महाविद्यालयः, अलवर

**डॉ. गीताराम शर्मा**

सह आचार्यः, संस्कृतविभागः, राजकीय कला महाविद्यालयः, कोटा

**डॉ. लता शर्मा**

सह आचार्य, संस्कृतविभागः, राजकीय कन्या महाविद्यालयः, अलवरम्

**डॉ. अवधेश कुमार शर्मा**

सहा.आचार्य, संस्कृतविभागः, राजकीय कला महाविद्यालयः, चिमनपुरा

**श्री सत्यनारायण कुमावतः**

प्रधानाचार्यः,

राजकीय उच्च-माध्यमिक-विद्यालयः बोरड़ा बावरियान्, शाहपुरा (भीलवाड़ा)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## पाठ्यक्रम समिति

# विजेत्री

(संस्कृतसाहित्यम्)

(द्वादशकक्षायै संस्कृतस्य पाठ्यपुस्तकम्)


**संयोजक :** **डॉ. धनंजय कुमार सिंह**
सह आचार्यः, संस्कृतविभागः, राजकीय महाविद्यालयः, अलवर

**लेखकगण :**

1. **श्री अरविन्द कुमार पारीक**
व्याख्याता, राजकीय उच्च माध्यमिक विद्यालय
किशनगढ़-अजमेर

2. **श्री वेद प्रकाश कुर्मी**
प्रधानाध्यापक, राजकीय उच्च माध्यमिक विद्यालय
भासू, तहसील-टोडाराय (टोंक)

3. **श्री इन्द्र कुमार उपाध्याय**
प्रधानाध्यापक, राजकीय उच्च प्राथमिक संस्कृत विद्यालय
रूपाहेडीकला, तहसील-कोट खावदा (जयपुर)

4. **श्री रुद्रेश कुमार दाधीच**
व्याख्याता, डाईट, बून्दी-323001


Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्राक्कथनम्

संस्कृतस्य नवीन पुस्तकमिदं माध्यमिक-शिक्षा-बोर्ड-राजस्थानस्य द्वादशकक्षायै ऐच्छिक-संस्कृतविषयस्य निर्धारितपाठ्यक्रममनुसृत्य सम्पादितमस्ति। पुस्तक-प्रस्तुतौ बोर्ड-निर्देशित-मानदण्डानां लक्ष्यानाञ्च पूर्त्यर्थं सम्पादकमण्डलेन सर्वथा प्रयतितम्। छात्राणां सौविध्याय पुस्तकेऽस्मिन् छन्दोऽलङ्कारा:-पद्य-गद्य-नाट्य-संस्कृतसाहित्येतिहास:-व्याकरणं-रचनाकार्यञ्च एकत्रैव समावेशिता:। पुस्तके पञ्च भागा: विद्यन्ते-

प्रथमो खण्ड: प्राचीनार्वाचीन संस्कृतसाहित्यस्य प्रमुखसङ्कलितपाठात्मक:। अत्र प्राचीनसन्दर्भे वेदोपनिषद: आरभ्य साम्प्रतिक-लोकप्रियाणां रचनानां, शिक्षाप्रदानां मनोरञ्जकानाञ्च अंशानां सङ्कलनम् अस्ति।

संस्कृतस्य नूतनपुस्तकेऽस्मिन् चतुर्दशपाठेषु एकादश पाठा: प्राचीनरचनाकाराणां पश्चाच्च चत्वार: पाठा: आधुनिकरचनाकाराणां सन्ति। एतेषु चतुर्दश पाठेषु वेदसम्मतयोगक्षेमकामना, गुरूपदेशमहिमा, मानवधर्म:, कर्मयोग-भक्तियोग-आत्मसंयमयोगस्य च महान् शिक्षा, गोसंरक्षणं, यक्ष-युधिष्ठिरसंवादमाध्यमेन तात्त्विकचर्चा, सहकारभावना, देशभक्ति वन्दना, रामचन्द्रस्य कारुण्यं, राजनीते:-उपायचतुष्टयस्य, विविधकर्तव्याकर्तव्यभावनादीनां च जीवनोपयोगिशिक्षाप्रदानां प्रस्तुतिरत्र सञ्जाता।

एतेषां पाठानां पठनेन छात्रेषु भाषाकौशलविकासेन सह भारतीयसंस्कृते शाश्वतभावानाम् अपि विकासो भविष्यति। येन सम्प्रेरितास्ते सदैव कर्तव्यनिष्ठया मनोयोगेन च कार्यं कुर्वन्त: शोभना: नागरिका: भविष्यन्ति। राष्ट्रनिर्माणे च स्वकीयं योगदानं करिष्यन्ति।

द्वितीयो खण्ड: छन्दोऽलङ्कारपरिचयात्मक:। पुस्तकस्य द्वितीय: खण्डेऽस्मिन् प्रमुखछन्दसामलङ्काराणाञ्च लक्षणोदाहराणि च प्रदत्तानि।

तृतीय: खण्ड: संस्कृत-साहित्यस्य इतिहासभागेन सम्बद्ध: अस्ति। अत: अत्र वैदिकसाहित्यस्य विवेचनं पश्चाच्च लौकिकसाहित्यविवेचनं विहितम्। लौकिकसाहित्येऽपि गद्य-नाटक-उपन्यास-कथादीनां प्रमुखकृतीनां ऐतिहासिकेतिवृत्तविवेचनपुरस्सरं राजस्थानीयार्वाचीनसाहित्यकाराणां विवेचनं प्रस्तुतीकृतम्।

चतुर्थ: खण्ड: व्याकरणात्मक: अस्ति। व्याकरणं नाम साधुत्वासाधुत्वबोधकं शास्त्रम्। विशेषत: भाषाज्ञानाय व्याकरणं लघुतमं सरलतमं परिष्कृततमं च साधनम्। तत्रापि

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

मुख्यत: संस्कृतभाषाया: अध्ययनाय व्याकरणस्य ज्ञानं नितान्तमावश्यकम्। अत्र सन्धि-समास-कारकादीनाञ्च सामान्यज्ञानं विहितमस्ति।

पञ्चम खण्डे छात्राणां रचनाकौशलं वर्द्धनाय प्रदत्तरूपरेखया कथासंयोजनं, क्रमसंयोजनं, सङ्केताधारित-वर्णनं, अनुवादकार्यञ्च विहितमस्ति।

पञ्चस्सु अपि खण्डेषु प्रतिखण्डं भाषा सरला-सरसा च स्यात् इति सावचेतोभि: अस्माभि: प्रयतितम्। विषयबोधाय प्रतिपद्यं अन्वय:, कठिनशब्दार्था:, इत्यादय: प्रदत्ता: सन्ति, येन छात्र: अन्यसाहाय्यं विना संस्कृतेन एव संस्कृतभाषां पठितुं क्षम: स्यात्। अधीतज्ञानपरीक्षणाय च पाठान्ते वस्तुनिष्ठप्रश्ना:, अतिलघूत्तरात्मक-प्रश्ना:, लघूत्तरात्मक-प्रश्ना:, निबन्धात्मकप्रश्ना:, व्याकरणप्रश्नाश्च सन्निवेशिता: सन्ति।

एवं छात्राणां संस्कृतसाहित्यस्य सम्यग्बोधाय ज्ञानस्य दीपमालया दीपितस्य संस्कृतिसुषमया च सुशोभितस्य पाठयपुस्तकस्याध्ययनं मननं चिन्तनं चावश्यकम्।।

पुस्तकेऽस्मिन् माध्यमिकशिक्षाबोर्डराजस्थानस्य निर्देशानामुद्देश्यानाञ्च पूर्तये पूर्ण: प्रयासो विहित:। पुस्तकनिर्माणे सततजागरूका: विद्वज्जना: डॉ. धनञ्जयकुमारसिंह (अलवर), डॉ. गीतारामशर्मा (कोटा), डॉ. लताशर्मा (अलवर), डॉ. अवधेशर्मा (जयपुर), श्री सत्यनारायणकुमावत (शाहपुरा) आदय: धन्यवादार्हा: सन्ति। अस्माकं प्रयासोऽयं यद् पुस्तकमधीत्य विद्यार्थिनां विषयज्ञानं भाषाबोधश्च सुदृढतर: स्यात्।

**डॉ. राजेश जोशी ( बाँसवाडा )**

सम्पादक: संयोजकश्च

❀ ❀ ❀

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## संस्कृतम् पाठ्यक्रम : कक्षा-12

**समय :** 3:15 होरा: **पूर्णांक :** 80

| क्र.सं. | अधिगम क्षेत्र | अंकभार |
|---|---|---|
| 1. | पठितावबोधनम् | 30 |
| 2. | विषयवस्तु (संस्कृतसाहित्यस्य इतिहास:) | 10 |
| 3. | छन्दोऽलंकारा: (छन्दोऽलंकारा:) | 10 |
| 4. | अपिठतांश अवबोधनम् | 08 |
| 5. | रचनात्मकार्यम् | 10 |
| 6. | व्याकरणम् | 12 |

**पठितावबोधनम्** **30**

**(अ) (पद्यांश-गद्यांश-नाट्यांशेभ्य:)** 24

अंशत्रयेषु उत्तरम्/पूर्णवाक्येन उत्तरम्/विशेषण-विशेष्य-प्रयोग:/अन्विति:/ विलोम-चयनम्/पर्याय-चयनम्/कर्तृक्रियापद-चयनम्/शब्दार्था: कथनानि आश्रित्य प्रश्न-निर्माणम् भावार्थ-लेखनम्/अन्वय-लेखनम्

**(ब) पाठ्यपुस्तकाधारितं भाषिक-कार्यम्** 06

(i) कर्तृ-क्रियापदचयनम् (ii) विशेषण-विशेष्य-चयनम्

(iii) सर्वनाम-संज्ञा-प्रयोग: (iv) समान-विलोम-पदचयनम् (v) क: कं कथयति।

**2. संस्कृत-साहित्येतिहास:** **10**

**3. छन्दोऽलंकार परिचय:** **10**

**(क) छन्द: परिचय:** 05

छन्द: लघुयुक्तविवेक:

छन्द: अधोलिखित-छन्दसां सोदाहरणलक्षणसामान्यज्ञानम्

छन्दांसि-इन्द्रवज्रा, शालिनी, भुजंगप्रयातम्, द्रुतविलम्बितम्, हरिणी, शिखरिणी, मदाक्रान्ता, शादूल-विक्रीडितम्, सस्रग्धरा

**(ख) अलंङ्कारा** 05

(i) शब्दालङ्कारा: - अनुप्रास:, यमकम्, श्लेष:

(ii) अर्थालङ्कारा: - उपमा, उत्प्रेक्षा, रूपकम्, अर्थान्तरन्यास:, विभावना, विशेषोक्ति:, निदर्शना प्रदत्तश्लोकेषु अलंकारस्य अभिज्ञानमाध्यमेन, प्रदत्त-परिभाषासु व्याख्या-माध्यमेन च परीक्षणम्।

**4. अपठितावबोधनम्** **08**

(1) 40-60 शब्दपरिमित: एक: सरल: अपठित: गद्यांश: प्रश्नवैविध्यम्

(i) एकपदेन उत्तरम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ii) पूर्ण-वाक्येन उत्तरम्

(iii) भाषिक-कार्यम् – कर्तृक्रियापदचयनम्, सर्वनामसंज्ञापद-चयनम्
विशेषण-विशेष्य-चयनम्/समानार्थक-विलोमपदचयम्/

80-100 शब्द परिमित: एक: सरल: अपठित: गद्यांश:
(सम्पादित: सरल: साहित्यिक: अंश:)

**प्रश्नवैविध्यम्**

(i) एकपदेन उत्तरम् (प्रश्नद्वयम्)

(ii) पूर्ण-वाक्येन उत्तरम् (एकप्रश्न:)

भाषा सम्बद्धकार्यम्

(i) कर्तृ-क्रियापदचयनम्

(ii) विशेषण-विशेष्य-प्रयोगा:
सर्वनाम-प्रयोगा:/संज्ञाप्रयोगा:
शब्दार्थचयनम्/विलोमचयम्/ समुचित्शीर्षकप्रदानम्

**(5) रचनात्मक कार्यम्** **10**

प्रदत्तरूपरेखया कथासंयोजनम्/क्रमयोजनम्

(i) संकेताधारित वर्णनम् 05

(ii) अनुवादकार्यम् 05

**(6) व्याकरणम्** **12**

(i) स्वरसन्धि: (प्रमुख सूत्राणि उदाहरणानि च प्रयोगा: लघुसिद्धान्तकौमुद्यानुसारम्) 04

(ii) कारकम् – उपपदविभक्तीनां प्रयोगा: तेषां सामान्य प्रश्ना: 04

(iii) समास: – वाक्येषु समस्तपदानां विग्रह: विग्रहपदानां समास: 04
(अव्ययीभाव:, कर्मधारय:, द्वन्द्व: बहुब्रीहिश्च)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अनुक्रमणिका

**प्राक्कथनम्**

## ( प्रथमः खण्डः )


| | | | | |
|---|---|---|---|---|
| प्रथमः पाठः | मङ्गलाचरणम् | – | वेदोपनिषत्तः | ................ 1 |
| द्वितीयः पाठः | गुरूपदेशः | – | कादम्बरीतः | ................ 7 |
| तृतीयः पाठः | मानवधर्मः | – | मनुस्मृतेः | ...............17 |
| चतुर्थः पाठः | गीतामृतम् | – | श्रीमद्भगवद्गीतातः | ...............26 |
| पञ्चमः पाठः | मेघदूतपीयूषम् | – | मेघदूतात् | ...............35 |
| षष्ठः पाठः | चारुत्वं चारुदत्तस्य | – | मृच्छकटिकात् | ...............47 |
| सप्तमः पाठः | नन्दिनीकथा | – | रघुवंशात् | ...............59 |
| अष्टमः पाठः | यक्ष–युधिष्ठिरयोः संवादः | – | महाभारतात् | ...............73 |
| नवमः पाठः | महाकविः माघः | – | सङ्कलितः | .............. 80 |
| दशमः पाठः | कारुण्यं रामभद्रस्य | – | उत्तररामचरितात् | ............... 86 |
| एकादशः पाठः | नीत्या स्वकार्यं साधनीयम् | – | पञ्चतन्त्रात् | ................97 |
| द्वादशः पाठः | मातृवन्दना–गीतिः | – | मधुच्छन्दातः | ..............103 |
| त्रयोदशः पाठः | सङ्घे शक्तिः | – | प्रबन्धमकरन्दतः | ..............110 |
| चतुर्दशः पाठः | पितामही मिलिता | – | लघुकथासंग्रहात् | ..............116 |


## ( द्वितीयः खण्डः )


( क ) अलंकारपरिचयः – 122 - 129

१. अनुप्रासः

२. यमकम्


Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. श्लेषः
४. उपमा
५. उत्प्रेक्षा
६. रूपकम्
७. अर्थाऽन्तरन्यासः
८. विभावना
९. विशेषोक्तिः
१०. निदर्शना

(क) छन्दोज्ञानम्– 130 - 138

१. इन्द्रवज्रा
२. शालिनी
३. भुजङ्गप्रयातम्
४. द्रुतविलम्बितम्
५. वसन्ततिलका
६. हरिणी
७. शिखरिणी
८. मन्दाक्रान्ता
९. शार्दूलविक्रीडितम्
१०. स्रग्धरा

(तृतीयः खण्डः) संस्कृतसाहित्येतिहासः– 139-185

(अ) वैदिकसाहित्यम् 139 - 152
(ब) लौकिकसाहित्यम्–
(क) नाटकानि 153-159
(ख) गद्यकाव्यानि 160-170
(ग) राजस्थानस्य अर्वाचीनसाहित्यकाराः 171-185

(चतुर्थः खण्डः) व्याकरणम्– 186-217

(क) सन्धिप्रकरणम् ...................... 188-197
(ख) समासप्रकरणम् ...................... 198-204
(ग) कारकप्रकरणम् ........................ 205-217

(पञ्चमः खण्डः) 218-224

१. रचनाकार्यम्– प्रदत्तरूपरेखया कथासंयोजनम्/ क्रमयोजनम्/ सङ्केताधारित वर्णनम्।
२. अनुवाद कार्यम्। 221

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्रथमः खण्डः

## प्रथमः पाठः

## मङ्गलाचरणम्

वेदोपनिषत्तः

अस्माकं भारतीयसंस्कृतिः मङ्गलमयी अस्ति। अत्र सर्वेषां कार्याणां निर्विघ्नसमाप्तये मङ्गलाचरणं भवति। अत एव अध्यापने संलग्नानां गुरूणाम्, अध्ययने तल्लीनां छात्राणां मङ्गलकारिमन्त्राणां ज्ञानाय स्मरणाय च मङ्गलाचरणपाठः अत्र प्रस्तुतः।

प्रथमः मन्त्रः ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्तात् उद्धृतः अस्ति। अस्मिन् मन्त्रे ऋषिः विश्वामित्रः हविदातृ-यजमानाय कल्याणार्थं अग्निदेवं प्रार्थयति। अस्य मन्त्रस्य ऋषिः विश्वामित्रः, देवता अग्निः छन्दश्च गायत्री।

द्वितीयः मन्त्रः ऋग्वेदस्य दशमण्डलस्य संज्ञान सूक्तात् (१९१ सूक्तम्) उद्धृतः अस्ति। अस्मिन् मन्त्रे ऋषिः संवननः सर्वजनानां मध्ये सहकारभावनायाः विकासार्थं परस्परविरोधनिराकरणार्थं च आवाहनं करोति।
तृतीयः मन्त्र ऐतरेयोपनिषदः शान्तिपाठात् उद्धृतः अस्ति। अस्मिन् मन्त्रे सर्वविघ्नानां शान्तये परमात्मा प्रार्थितः। वाङ्मनसोरेकरूपता भवतु-इति कामना च कृता।

चतुर्थः मन्त्रः तैत्तिरीयोपनिषदः शिक्षावल्याः द्वादशानुवाकतः उद्धृतः अस्ति। अयं मन्त्रः ऋग्वेदस्य १/९ मण्डले, यजुर्वेदस्य ३६/९ स्थले अथर्ववेदस्य १९/ ९/ ६ स्थलेऽपि उल्लिखितः अस्ति। अत्र प्रार्थना अस्ति यत् परमेश्वरः कल्याणं करोतु। गुरुशिष्याणां लक्ष्यप्राप्तौ निर्विघ्नतां करोतु।

पञ्चमो मन्त्रः कठोपनिषदः शान्तिपाठात् सङ्कलितः अस्ति। अत्र सहकारभावनया सह उत्कृष्टसामर्थ्यप्राप्तेः अपि कामना अस्ति।

१. यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि ।
तवेत्तत्सत्यमङ्गिरः ।। (ऋग्वेदस्य प्रथमण्डलस्य अग्निसूक्तात्)

२. संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते।। (ऋग्वेदस्य दशमण्डलस्य संज्ञान सूक्तात्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. ॐ वाङ्. मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्मे एधि।
वेदस्य मे आणीस्थः श्रुतं मे मा प्रहासीः। अनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि।
सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारमवतु वक्तारम्।
(ऐतरेयोपनिषदः शान्तिपाठात्)

४. ॐ शं नो मित्रः वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पति :।
शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्। (ऋग्वेदः १/९०/९ तैत्तिरीयोपनिषदः)

५. ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै। ॐ शान्तिः। शान्तिः।। शान्तिः।। – (कठोपनिषदः शान्तिपाठात्)

❀ ❀ ❀

## अन्वयः–

१. अङ्ग अग्ने। यत् त्वम् दाशुषे भद्रम् करिष्यसि, तव तत् इत्। अङ्गिरः सत्यम्।

२. यथा पूर्वे सञ्जानाना देवाः भागं उपासते (तथा यूयम्) संगच्छध्वं, संवदध्वं, वः मनांसि सञ्जानताम्।

३. ॐ मे वाक् मनसि प्रतिष्ठिता, मे मनः वाचि प्रतिष्ठितम् आविः मे आवीः एधि। मे वेदस्य आणीस्थः मे श्रुतं मा प्रहासीः। अनेन अधीतेन अहोरात्रान् संदधामि ऋतं वदिष्यामि। सत्यं वदिष्यामि। तत् माम् अवतु। तत् वक्तारम् अवतु। वक्तारम् अवतु।

४. ॐ नः मित्रः वरूणः शम्। अर्यमा नः शम् भवतु। नः इन्द्रः शम् बृहस्पतिः (शम् भवतु) उरुक्रमः विष्णुः नः (शं भवतु)। ब्रह्मणे नमः। वायो ते नमः। त्वम् एव प्रत्यक्षं ब्रह्म असि। त्वाम् एव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तत् माम् अवतु। तत् वक्तारम् अवतु। अवतु माम्। अवतु वक्तारम्।

५. ॐ नौ सह अवतु। नौ सह भुनक्तु। सह वीर्यं करवावहै।
नौ अधीतम् (ज्ञानम्) तेजस्वि अस्तु (भवतु)। मा विद्विषावहै।
ॐ शान्तिः शान्तिः शान्तिः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## शब्दार्थाः

| | | |
|---|---|---|
| **दाशुषे** | = | हविदातृयजमानाय (हवि का दान करने वाले यजमान के लिए) |
| **भद्रम्** | = | कल्याणकारिपदार्थः |
| **अङ्ग अग्ने** | = | हे अग्नि देव |
| **अङ्गिरः** | = | ऋषि विशेषः (अङ्गारमुनि को जन्म देने वाले अग्नि देव) |
| **तत्** | = | तत्कल्याणकारिसर्वपदार्थं (वे सत् कल्याणकारी पदार्थ) |
| **पूर्वे** | = | पूर्वस्य (पहले के) |
| **सञ्जानाना** | = | सम्यक् प्रकारेण ज्ञात्वा (अच्छी प्रकार से जानते हुए) |
| **भागम्** | = | स्वकीयांशम् (अपने अंश को) |
| **उपासते** | = | स्वीकारं कुर्वन्ति (स्वीकार करते हैं) |
| **संगच्छध्वं** | = | सहैव गन्तव्यम् (साथ मिलकर चलो) |
| **संवदध्वं** | = | सहैव वक्तव्यम् (साथ मिलकर बोलो) |
| **मनांसि** | = | चित्तेषु (विचार अथवा चिन्तन, चित्त) |
| **सञ्जानताम्** | = | विज्ञानताम् (ठीक प्रकार से जाने ) |
| **ॐ** | = | हे सच्चिदानन्द परमात्मन् |
| **प्रतिष्ठिता** | = | स्थिता |
| **वाचि** | = | वागिन्द्रिये, वाण्याम् |
| **प्रतिष्ठितम्** | = | सुस्थितं भवतु |
| **आविः** | = | हे प्रकाशस्वरूप परमेश्वर |
| **आवीः एधिः** | = | त्वं प्रकटितो भव |
| **वेदस्य** | = | ज्ञानस्य |
| **आणीस्थः** | = | आनयकारौ भवताम् |
| **श्रुतम्** | = | आकर्णितं ज्ञानम् |
| **मा प्रहासीः** | = | मा त्यज |
| **अनेन अधीतेन** | = | एतेन अध्ययनेन |
| **अहोरात्रान्** | = | रात्रिन्दिवम् |
| **संदधामि** | = | एवं करवाणि |
| **ऋतं** | = | श्रेष्ठशब्दवृन्दम् एव |
| **वदिष्यामि** | = | कथयिष्यामि |
| **सत्यं वदिष्यामि** | = | यथार्थं कथयिष्यामि |
| **तत्** | = | ब्रह्म |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **माम् अवतु** | = | मां रक्षतु |
| **वक्तारम् अवतु** | = | आचार्यं रक्षतु |
| **नः** | = | अस्मभ्यम् |
| **मित्रः** | = | (दिवसप्राणाधिष्ठाता च )मित्रदेवता |
| **शम्** | = | कल्याणप्रदः भवतु |
| **अर्यमा** | = | चक्षुः सूर्यमण्डलस्य च अधिष्ठाता |
| **शं भवतु** | = | कल्याणप्रदं भवतु |
| **बृहस्पतिः** | = | वाग्बुद्ध्यधिष्ठाता |
| **उरुक्रमः** | = | त्रिविक्रमरूपेण पदाधिष्ठाता विष्णुः |
| **ब्रह्मणे** | = | परमात्मस्वरूपिणे |
| **त्वम् एव प्रत्यक्षम्** | = | प्राणरूपेण ज्ञायमानं ब्रह्म अस्ति |
| **तत्** | = | ब्रह्म (सर्वशक्तिसम्पन्नः परमेश्वरः) |
| **माम् अवतु** | = | मम रक्षां करोतु |
| **अवतु वक्तारम्** | = | आचार्यस्य रक्षां करोतु। शान्तिस्वरूप परमेश्वर त्रिविधतापान् शमयतु |
| **नौ** | = | आवयोः , गुरुशिष्ययोः |
| **सह अवतु** | = | सहैव रक्षां करोतु |
| **भुनक्तु** | = | पालनं करोतु |
| **वीर्यं** | = | शक्तिम् |
| **करवावहै** | = | आप्नुयाव, प्राप्तं करवाव |
| **अधीतम्** | = | पठितम् (ज्ञानम्) |
| **मा विद्विषावहै** | = | आवां परस्परं द्वेषं न करवाव |
| **शान्तिः शान्तिः शान्तिः** | = | आधिभौतिक-आधिदैविक-आध्यात्मिक विघ्नानां निवृत्तिः भवतु इत्याशयेन शान्तिपदं त्रिवारं प्रोक्तम्। |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. अस्य पाठस्य प्रथममन्त्रः कस्माद् ग्रन्थाद् उद्धृतोऽस्ति –

(क) ऐतरेयोपनिषदः शान्तिपाठात् (ख) तैत्तिरीयोपनिषदः शान्तिपाठात्

(ग) कठोपनिषदः शान्तिपाठात् (घ) ऋग्वेदस्य प्रथममण्डलतः ( )

२. अस्य पाठस्य प्रथममन्त्रस्य ऋषिः कः अस्ति ?

(क) संवननः (ख) मेधातिथिः

(ग) विश्वामित्रः (घ) अङ्गिरा ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. ओङ्कारपदस्य अर्थः कः ?

(क) मोक्षः (ख) ब्रह्मसेवकः

(ग) सच्चिदानन्दः (घ) अभिषेकः ( )

४. ॐ सह नाववतु वाक्ये 'नौ' पदस्य अर्थः कः?

(क) नावौ (ख) नद्यौ

(ग) शिवरामौ (घ) गुरुशिष्यौ ( )

### अतिलघूत्तरात्मक प्रश्नाः –

१. 'दाशुषे' इत्यस्य पदस्य अर्थः कः ?

२. तेजस्वि किं अस्तु ?

३. अहं किं वदिष्यामि ?

४. त्वमेव कीदृशं ब्रह्मासि ?

५. मम वाणी कुत्र प्रतिष्ठिता भवतु ?

### लघूत्तरात्मक प्रश्नाः –

१. प्रथममन्त्रस्य संस्कृतव्याख्या कर्त्तव्या ?

२. द्वितीयमन्त्रस्य व्याख्या करणीया ?

३. अस्य पाठस्य सारः संक्षेपेण लेखनीयः ?

४. अनेन पाठानुसारेण के कान् च अवन्तु ?

### व्याकरणात्मक प्रश्नाः –

**१. अधोलिखितपदेषु सन्धिविच्छेदं कृत्वा सन्धेर्नामपि लेखनीयम् –**

| | सन्धिपदम् | विग्रहः | सन्धिर्नाम |
|---|---|---|---|
| (क) | वाङ्.मे | .................................. | ......................... |
| (ख) | नाववतु | .................................. | ......................... |
| (ग) | तन्मामवतु | .................................. | ......................... |
| (घ) | ब्रह्मासि | .................................. | ......................... |
| (ङ) | तद्वक्तारम् | .................................. | ......................... |

**२. अधोलिखितपदेषु उपसर्ग-प्रकृतिः प्रत्ययश्च लिखत-**

| | पदम् | उपसर्गः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|---|
| (क) | प्रतिष्ठिता | ............... | .................. | ...................... |
| (ख) | मनसि | .................. | ................... | .................. |
| (ग) | ब्रह्मणे | .................. | ................... | .................. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | | |
|---|---|---|---|---|
| (घ) | वक्तारम् | .................. | .................. | .................. |
| (ङ) | अधीतम् | .................. | .................. | .................. |
| (च) | संवदध्वम् | .................. | .................. | .................. |

३. **अधोलिखितपदेषु धातुः लकारः पुरुषः वचनञ्च लिखत–**

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | एधि | ............. | ............... | ............... | ..................... |
| (ख) | भवतु | ............. | ............... | ............... | ..................... |
| (ग) | असि | ............. | ............... | ............... | ..................... |
| (घ) | भुनक्तु | ............. | ............... | ............... | ..................... |
| (ङ) | करवावहै | ............. | ............... | ............... | ..................... |
| (च) | अस्तु | ............. | ............... | ............... | ..................... |

४. **निम्नलिखित पदानि प्रयुज्य वाक्यनिर्माणं कर्तव्यम् –**

(क) वाक् – ........................................................................ ।

(ख) भुनक्तु – ........................................................................ ।

(ग) वदिष्यामि – ........................................................................ ।

(घ) अमृतम् – ........................................................................ ।

(ङ) माम् – ........................................................................ ।

५. **निम्नलिखित वाक्येषु वाच्यपरिवर्तनं करणीयम् –**

(क) अहं सत्यं वदिष्यामि = .............................................................।

(ख) वरुणः सर्वान् रक्षति = .............................................................।

(ग) भवान् विद्यालयं गच्छति= .............................................................।

(घ) सः शान्तिं प्राप्नोति = .............................................................।

(ङ) वयं संस्कृतं पठामः = .............................................................।

**वस्तुनिष्ठप्रश्नाः – उत्तरमाला**

१ (क) २. (ग) ३. (ग) ४. (घ)

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# द्वितीयः पाठः
# गुरूपदेशः

महाकवि-बाणभट्ट प्रणीता 'कादम्बरी' संस्कृतसाहित्यस्य अद्वितीया कथारूपेण प्रथितास्ति। संस्कृतसाहित्ये गद्यसम्राट्-बाणभट्टस्य अपूर्वं वर्णन-विशारदत्वं वीक्ष्य संस्कृत मनीषिणः मन्त्रमुग्धत्वं अनुभवन्ति। महाकवेः बाणभट्टस्य गद्यवर्णने रचनाकौशलत्वं वस्तुवर्णनं प्रकृतिवर्णनं भावगाम्भीर्यं च अपूर्वाऽछटा विद्यते। अतो विषयेऽस्मिन् प्रसिद्धाः एषाः सूक्तयः - 'बाणोच्छिष्टं जगत्सर्वं', 'बाणः कवीनामिह चक्रवर्ती', 'वाणी बाणो बभूव ह', 'बाणस्तु पंचाननः', 'हृदयवसतिः पंचबाणस्तु बाणः'।

सम्राजः हर्षवर्द्धनस्य (६०६ ईस्वीतः ६४८ ईस्वीपर्यन्त) राजसभायाम् आश्रित कविरूपेण तेन हर्षचरितं कादम्बरी चेति ग्रन्थद्वयं विरचितम्। महाकवेः बाणभट्टस्य कादम्बरी हर्षचरितञ्च द्वे प्रख्याते काव्ये स्तः। हर्षचरितमाख्यायिका कादम्बरी कल्पितकथा चास्ति। 'कादम्बरी' सर्वोत्कृष्टं गद्यकाव्यमस्ति। काव्येऽस्मिन् चन्द्रापीड-कादम्बर्योः, पुण्डरीक-महाश्वेतायाश्च प्रणयकथा वर्णितास्ति।

'गुरूपदेशः' पाठः कादम्बर्याः 'शुकनासोपदेशः' नामकगद्यखण्डात् गृहीतः। अस्मिन् खण्डे राजकुमारः चन्द्रापीडः गुर्वाश्रमे ब्रह्मचर्यावस्थां समाप्य पिता तारापीडस्य राजप्रासादे पुनरागतः। राज्ञः तारापीडस्य महामन्त्री शुकनासः सत्व-शौर्य-आर्जव भावसम्पन्नं तं चन्द्रापीडं अधिकतरं गुणातिशायिनं कर्तुं बहुविधप्रकारैः उपदिशति। अस्मिन् प्रसङ्गे सर्वप्रथमः सः गुरूपदेशस्य महत्त्वं प्रतिपादयति।

वस्तुतः गुरोः ज्ञानम् अमूल्यं भवति। यः शिष्यः गुरुकुले निवसन् भक्तिभावेन विद्याध्ययनं करोति, तस्य विद्या अवश्यमेव सफला भवति। अद्यत्वे अस्माकं समाजे तादृशगुरुकुलानाम् अभावः एव, किन्तु यत्रापि विद्यालयेषु महाविद्यालयेषु वा गुरवः पाठयन्ति, तान् प्रति छात्रैः श्रद्धासेवाभावना वा अवश्यमेव कर्तव्या। अनेनैव विद्यार्थिनां जीवनं अध्ययनं च सफलं भवति। गुरुः ज्ञानप्रकाशेन अज्ञानान्धकारे निपतितस्य शिष्यस्य उद्धारको भवति। शिष्यस्य शारीरिकं, मानसिकं, आध्यात्मिकं, नैतिकञ्च विकासं करोति।

एवं समतिक्रामत्सु केषुचिद्दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारानुपकरण संभार संग्रहार्थमादिदेश। समुपस्थितयौवराज्याभिषेकं च तं कदाचिद् दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छन् कर्तुं शुकनासः सविस्तरमुवाच -

तात् चन्द्रापीड ! विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवातिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टं परमैश्वर्यतिमिरान्धत्वम्, अतितीव्रोदर्पदाहज्वरोष्मा, विषमो विषयविषास्वादमोहः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



नित्यमस्नानशौचबाध्यो बलवान् रागमलावलेपः। अप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीति। विस्तरेणाभिधीयसे गर्भेश्वरत्वम् अभिनवयौवनत्वम् अप्रतिरूपत्वम् अमानुषशक्तित्वं चेति महतीयं खल्वनर्थपरम्परा सर्वा। अविनयानाम् एकैकमप्येषामायतनं किमुत् समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

इन्द्रियहरिणहारिणी च सततदुरन्तेयम् उपभोगमृगतृष्णिका। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु।

भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः।

गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमानन शोभासमुदयमधिकतरमुपजनयति। हरत्यतिमलिनमन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव। गुरूपदेशः प्रशमहेतुर्वयः परिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति।

अयमेव चानास्वादितविषयरसस्य ते कालः उपदेशस्य। कुसुमशरप्रहारजर्जरिते हि हृदि जलमिव गलत्युपदिष्टम्। अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं च विनयस्य। चन्दनप्रभवो न दहति किमनलः ? किं वा प्रशमहेतुनापि न प्रचण्डतरी भवति वडवानलो वारिणा ?

गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षमम् अजलं स्नानं, अनुपजात-पलिता दिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरुकरणम्। असुवर्णविरचनम् अग्राम्यं कर्णाभरणं, अतीत ज्योतिरालोकः, नोद्वेगकरः प्रजागरः। विशेषेण तु राज्ञाम्। विरलाः हि तेषामुपदेष्टारः।

प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात्। उद्दिश्यमानपि ते न शृण्वन्ति। शृण्वन्तोऽपि च खेदयन्ति हितोपदेशवादिनो गुरून्। अहङ्कारदाहज्वरमूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः। अलीकाभिमानोन्मादकारीणि धनानि। राजविषविकारतन्द्राप्रदा राजलक्ष्मीः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## शब्दार्थाः टिप्पण्यश्च

| | | |
|---|---|---|
| **समतिक्रामत्सु** | = | व्यतीतेषु (व्यतीत होने पर), सम् +अति +क्रम् +शतृ, (सप्तमी, बहुवचन) |
| **यौवराज्याभिषेकं** | = | यौवराज्ये अभिषेकः (युवराज के लिये शास्त्रोक्त दृष्टि से कराया जाने वाला स्नान), युवा चासौ राजा, युवराजः (कर्मधारय समास), युवराजस्य भावः यौवराज्यं (युवराज+ष्यञ्) |
| **चिकीर्षुः** | = | कर्तुमिच्छुः (करने की इच्छा वाला), कृ + सन् +उ + प्रथमा विभक्तिः, एकवचनम्। |
| **प्रतीहारान्** | = | सेवकान् द्वारपालान् वा। द्वितीया, बहुवचन। |
| **उपकरणसंभार संग्रहार्थम्** | = | उपकरणानाम् एकीकरणार्थम् (आवश्यक सामग्री–समूह के संग्रह के लिये) |
| **आरूढविनयमपि** | = | विनयसम्पन्नं, आरूढः विनयः यस्य सः (बहुव्रीहि) तं, आ + रूह् + क्त |
| | = | आरूढः। वि + नी + अप् = विनयः। |
| **विनीततरमिच्छन्** | = | अतिशयेन विनीतं कर्तुम् (अपेक्षाकृत अधिक विनीत बनाने की इच्छा से) विनीत +तरप्। इच्छन् = इच्छ् + शतृ। |
| **विदितवेदितव्यस्य** | = | विदितं वेदितव्यं यस्य सः (बहुव्रीहि) तं, (जानने योग्य को जान लिया है, जिसने) |
| **अधीतसर्वशास्त्रस्य** | = | अधीतानि सर्वाणि शास्त्राणि येन तस्य (जिसने सभी शास्त्र पढ़ लिये हैं, उसके), अधि + ईण् + क्त = अधीत |
| **नाल्पमप्युपदेष्टव्यमस्ति** | = | न अल्पम् अपि उपदेष्टव्यम् अस्ति (उपदेश योग्य थोड़ा भी शेष नहीं है), उप + दिश् + तव्यत् = उपदेष्टव्यम्। |
| **निसर्गतः** | = | स्वभावेन, प्रकृत्या (स्वभाव से) |
| **यौवनप्रभवम्** | = | यूनस्य भावः यौवन, यौवनं प्रभवः यस्य तत् (बहुव्रीहि समास), (यौवन से उत्पन्न)। |
| **अपरिणामोपशमो** | = | अन्तिमावस्थायामपि शान्तिः न भवति, परिणामे उपशमः यस्य सः परिणामोपशमः(बहुव्रीहि समास), न परिणामोपशमः (नञ् समास), (समाप्ति में भी शान्त नहीं होने योग्य)। |
| **दारुणो** | = | भयंकरः, दृ+णिच्+उनन् = दारुणः (भयानक/भीषण)। |
| **लक्ष्मीमदः** | = | लक्ष्म्याः मदः (षष्ठी तत्पुरुष समास), धन का नशा। |
| **परमैश्वर्यतिमिरान्धत्वम्** | = | परम् ऐश्वर्यं एव तिमिरम् परमैश्वर्यतिमिर, तेन उत्पन्न अन्धत्वम् (ऐश्वर्यरूपी रतोंधी रोग से उत्पन्न अन्धापन)। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **दर्पदाहज्वरोष्मा** | = | दर्पदाहज्वरस्य ऊष्मा (षष्ठी तत्पुरुष), घमण्डरूपी दाहक ज्वर से उत्पन्न गर्मी। |
| **विषयविषास्वादमोहः** | = | विषयरूपी विष आस्वादात् मोहः (पञ्चमी तत्पुरुष), शब्द, स्पर्श, रूप, रस, गन्धादि विषयों के भोग से उत्पन्न मोह। |
| **अस्नानशौचबाध्यो** | = | स्नानशौचाभ्यां वध्यः स्नानशौचवध्यः (पञ्चमी तत्पुरुष), न स्नान शौच वध्यः (नञ् समास), हन् + ण्यत् = वध्यः, (नित्य स्नान और पवित्रता से भी दूर न करने योग्य)। |
| **रागमलावलेपः** | = | रागः एव मलं रागमलम् (कर्मधारय), रागमलस्य अवलेपः (षष्ठी तत्पुरुष), रञ्ज् + घञ् = रागः, अव + लिप् + घञ् = अवलेपः (आसक्तिरूपी मैल का लेप)। |
| **राज्यसुखसन्निपातनिद्रा** | = | राज्यसुखम् एव सन्निपात निद्रा तद्वत् प्रगाढ़ा निद्रा (कर्मधारय), राज्यसुखरूपी सन्निपात से उत्पन्न गहरी नींद। |
| **गर्भेश्वरत्वम्** | = | गर्भात् ईश्वरत्वम् (पञ्चमी तत्पुरुष), गर्भ से ही स्वामी होना। |
| **खल्वनर्थपरम्परा** | = | खलु/निश्चयेन अनर्थानां परम्परा (अनर्थों की कड़ी)। |
| **अविनयानाम्** | = | दुष्टानाम् (उद्दण्डताओं का)। |
| **आयतनम्** | = | निवास स्थानम् (घर)। |
| **समवायः** | = | समूहः। |
| **कालुष्यमुपयाति** | = | कलुषतां प्राप्नोति, कलुषस्य भावः कालुष्यम्, कलुष् + ष्यञ् (कलुषता को प्राप्त हो जाती है अथवा मैली हो जाती है)। |
| **इन्द्रियहरिणहारिणी** | = | इन्द्रियाणि इव हरिणाः तान् हरतीति, हृ + णिनि + ङीप् = हारिणी (इन्द्रियरूपी हरिणों को हरने वाली)। |
| **सततदुरन्तेयम्** | = | दुःखम् अतः यस्याः सा दुरन्ता, सततदुरन्ता + इयम् (गुण सन्धि), सदा दुःखद परिणाम देने वाली। |
| **उपभोगमृगतृष्णिका** | = | उपभोग एव मृगतृष्णिका, (उपभोग रूपी मृगतृष्णा किंवा लालसा) उप् + भुज् + घञ्=उपभोगः। |
| **दिङ्मोहः** | = | दिग्भ्रमः, दिशां मोहः वा (दिशाओं का भटकाव)। |
| **उन्मार्गप्रवर्तकः** | = | उन्मार्गे किंवा कुमार्गे प्रवर्तकः, प्र + वृत् + णिच् + ण्वुल् = प्रवर्तकः, * दिशाओं के विषय में उत्पन्न भ्रम मनुष्य को गलत रास्ते पर ले जाकर नष्ट कर देता है। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **स्फटिकमणाविव** | = | स्फटिकश्चासौ मणि: तस्मिन्, स्फटिकमणौ + इव (अयादि) स्फटिक, फटिक अथवा बिल्लौर मणि के समान। |
| **रजनिकरगभस्तयो** | = | रजनिकरस्य गभस्तय: (षष्ठी तत्पुरुष), चन्द्रमा की किरणें। |
| **अभव्यस्य** | = | अशिष्टस्य दुष्टस्य वा, न भव्यस्य (नञ् समास) । |
| **करिण इव** | = | कर: शुण्डादय: अस्य अस्ति इति हस्ति (हाथी के समान) |
| **शङ्खाभरणम्** | = | शङ्खनिर्मितम् आभरणम् आभूषणं वा (मध्यमपदलोपी समास) |
| **हरत्यतिमलिनमन्धकारमिव** | = | हरति अतिमलिनम् अन्धकारम् इव (मलिन अन्धकार की तरह हर लेता है) |
| **प्रदोषसमयनिशाकर** | = | प्रदोषसमये निशाकर: (सन्ध्या अथवा रात्रिकालीन चन्द्रमा) |
| **प्रशमहेतु:** | = | प्रशमस्य हेतु: (षष्ठी तत्पुरुष), शान्ति का हेतु, शान्तिकारक |
| **शिरसिजजालम्** | = | शिरसि जायन्ते इति शिरसिजा: (अलुक् समास), शिरसिजानां जालम् (षष्ठी तत्पुरुष), केशसमूह को । |
| **अमलीकुर्वन्** | = | निर्मल/श्वेत कुर्वन् * काले केशसमूह को श्वेत करते हुए |
| **चानास्वादितविषयरसस्य** | = | च अनास्वादितविषयरसस्य, न आस्वादिता: (नञ् समास) विषयरसा: येन (बहुव्रीहि समास) *जिसने विषयों (भोगों) का रस नहीं चखा है, ऐसे तुम्हारे लिये । |
| **वय: परिणाम:** | = | वयस: परिणाम: (वृद्धावस्था)। |
| **कुसुमशरप्रहारजर्जरिते** | = | कामदेवस्य बाणप्रहारै: जर्जरिते, कुसुमानि एव शरा: यस्य स: कुसुमशर:, तस्य शराणां प्रहारै: आहते (कामदेव के बाणप्रहार से छिदे हुए (हृदय) में)। |
| **गलत्युपदिष्टम्** | = | गलति उपदिष्ट, उपदिष्टं विषयं जलमिव गलति। |
| **दुष्प्रकृते:** | = | दुष्ट प्रकृति: यस्य (बहुव्रीहि), दुर्जन मनुष्य के । |
| **अन्वय:** | = | वंश:, सत्कुल: वा। |
| **वडवानलो** | = | वडवाया: अनल:, समुद्रस्य अग्नि: (समुद्र में स्थित अग्नि) |
| **पुरुषाणामखिलमलप्रक्षालनक्षमम्** | = | मनुष्याणां सम्पूर्ण मल प्रक्षालने समर्थ। |
| **अजलं स्नानम्** | = | विना जलं स्नान, न जलम् इति अजलम् (नञ् समास), गुरूपदेश मनुष्यों के समग्र मैल को धोने में समर्थ बिना जल का स्नान है। |
| **अनुपजात-पलिता** | = | न उपजात (नञ् समास), अनुपजातं पलितादि वैरूप्य, विरूपस्य भाव: वैरूप्य, विरूप् + ष्यञ् *गुरूपदेश बालों की |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| | | सफेदी आदि कुरूपता के उत्पन्न हुए बिना ही बुढ़ापे से रहित बड़प्पन है। |
| **अनारोपितमेदोदोषम्** | = | न आरोपितः (नञ् समास) मेदः दोषम् अजरं (जरारहित) वृद्धत्व, न जरम् इति (नञ् समास)। गुरूपदेश चर्बीरूपी दोष बढ़ाए बिना गुरुता (भारीपन) देता है। |
| **असुवर्णविरचनम्** | = | न सुवर्णविरचनम् (नञ् समास), स्वर्णरहित सुन्दर आभूषण। |
| **अतीत ज्योतिरालोकः** | = | अतीतं ज्योतिः यस्मात् सः (बहुव्रीहि), ज्योतिरहितः प्रकाशः, * गुरूपदेश में चमक-दमक नहीं है तथापि वह ऐसा प्रकाश है, जो अज्ञानान्धकार में रहने वाले प्रत्येक विषय का साक्षात्कार करा देता है। |
| **नोद्वेगकरः प्रजागरः** | = | न उद्वेगं करोति इति, न + उद्वेगकरः (गुण सन्धि)। |
| **प्रजागरः** | = | प्रकृष्ट जागरणः (विशेष जागरण), *सामान्य जागरण होने पर बैचेनी रहती है, किन्तु गुरु का उपदेश बैचेनी उत्पन्न किये बिना ही जगाने वाला है। |
| **प्रतिशब्दक इव** | = | शब्दं पश्चात् (अव्ययीभाव), प्रतिशब्द + कन् = प्रतिशब्दक, (प्रतिध्वनि के समान) |
| **अहंकारदाहज्वरमूर्च्छान्धकारिता** | = | अहंकार एव दाहज्वरः (कर्मधारय), अहंकारदाहज्वरेण मूर्च्छा (तृतीया तत्पुरुष) तया अन्धकारिता, *जिस प्रकार दाहज्वर से व्यक्ति तड़पता है और उससे उत्पन्न मूर्च्छा से कुछ भी ज्ञान नहीं रहता, ठीक उसी प्रकार अहंकाररूपी दाहज्वर से उत्पन्न मोह से राजा लोग उचितानुचित विवेक को खोकर रात-दिन तड़पते रहते हैं। |
| **अलीकाभिमानोन्मादकारीणि** | = | धनानि अलीक (मृषा) अभिमान उन्मादकारिणी भवन्ति। |
| **अलीक** | = | झूठा अभिमान अथवा पागलपन। |
| **राजविषविकारतन्द्राप्रदा** | = | राज्यम् एव विषम् (कर्मधारय) तस्माद् विकारः (पञ्चमी तत्पुरुष), राज्यविकारेण तन्द्रा, तां प्रकर्षेण ददाति इति। राज्यरूपी जहर से उत्पन्न आलस्य देने वाली। |
| **राजप्रकृतिः** | = | राज्ञः प्रकृतिः, (षष्ठी तत्पुरुष) स्वभावः (राजा का स्वभाव)। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः-

प्र. १ चन्द्रापीडस्य पितुर्नाम किमासीत् ?

(क) शुकनासः (ख) तारापीडः

(ग) बाणभट्टः (घ) शूद्रक ( )

प्र. २ अनर्थपरम्परायां विद्यते विद्यन्ते वा ।

(क) गर्भेश्वरत्वम् (ख) अभिनवयौवनम्

(ग) अप्रतिरूपत्वम् (घ) एतानि सर्वाणि ( )

प्र. ३ 'भवादृशाः एव भवन्ति भाजनानि' वाक्येऽस्मिन् 'भवादृशा' कस्य कृते प्रयुक्तः ?

(क) शुकनासस्य कृते (ख) तारापीडस्य कृते

(ग) चन्द्रापीडस्य कृते (घ) सेवाकस्य कृते ( )

प्र. ४ 'वडवानलः' कस्याग्निः कथ्यते ?

(क) समुद्रस्य (ख) वनस्य

(ग) गृहस्य (घ) भूगर्भस्य ( )

### रिक्तस्थानपूर्तिः क्रियताम् -

(क) अपरिणामोपशमो दारुणो ....................................... ।

(ख) ........................... च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

(ग) अयमेव चानास्वादितविषयरसस्य ते कालः ...............................।

(घ) विशेषेण तु राज्ञाम्। .............................. हि तेषामुपदेष्टारः।

### अतिलघूत्तरात्मक-प्रश्नाः

प्र. १ निसर्गत एव अतिगहनं तमोबहूलं किम्भवति ?

प्र. २ राज्यसुखसन्निपात निद्रा कीदृशी भवति ?

प्र. ३ कस्मिन् मनसि उपदेशगुणाः सुखेन विशन्ति ?

प्र. ४ अजलं स्नानं किमस्ति ?

प्र. ५ अलीकाभिमान उन्मादश्च केन भवति ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## लघूत्तरात्मक-प्रश्नाः–

प्र. १ रागमलस्य अवलेपः बलवान् कथम् ?

प्र. २ अनर्थपरम्पराः काः ?

प्र. ३ गुरुवचनस्य प्रभावः अशिष्टस्य शिष्टस्य च कृते कीदृशः भवति ?

प्र. ४ गुरूपदेशः दोषजातं हत्वा तं गुणरूपेण किमिव परिणमयति ?

प्र. ५ दुष्प्रकृतेः अन्वयः अविनयस्य च श्रुतं कीदृशं भवति ?

## निबन्धात्मक-प्रश्नाः–

प्र. १ 'भवादृशाः एव भवन्ति भाजनान्युपदेशानाम्' इति शुकनासः कथमब्रवीत् ?

प्र. २ गुरूपदेशस्य के के लाभाः ?

प्र. ३ राजप्रकृतेः वर्णनं कुरुत ।

प्र. ४ वर्तमानसमये अस्योपदेशस्य उपादेयतायाः समीक्षां कुरुत ।

## अधोलिखितवाक्येषु रेखाङ्कितान् पदान् आश्रित्य प्रश्ननिर्माणं कुरुत –

(क) इन्द्रियहरिणहारिणी च सततदुरन्तेयम् **<u>उपभोगमृगतृष्णिका</u>**।

............................................................................................................ ?

(ख) नाशयति च **<u>दिङ्मोह</u>** इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु।

............................................................................................................ ?

(ग) कुसुमशरप्रहार जर्जरिते हि हृदि **<u>जलमिव</u>** गलत्युपदिष्टम्।

............................................................................................................ ?

(घ) **<u>असुवर्णविरचनम्</u>** अग्राम्यं कर्णाभरणम्।

............................................................................................................ ?

## व्याकरणात्मक-प्रश्नाः–

१. **अधो-लिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः** –

| | | | **सन्धिः** | **सन्धिनाम** |
|---|---|---|---|---|
| (क) | एव + अतिगहनम् | = | .......................... | ............................ |
| (ख) | खलु + अनर्थपरम्परा | = | .......................... | ............................ |
| (ग) | एक + एकम् | = | .......................... | ............................ |
| (घ) | गुरु + उपदेशः | = | .......................... | ............................ |
| (ङ) | दुष्प्रकृतेः + अन्वयः | = | .......................... | ............................ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. **अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विग्रहो विधेयः -**

| | सन्धिपदम् | | विच्छेदः | सन्धिनाम |
|---|---|---|---|---|
| (क) | स्फटिकमणाविव | = | .......................... | ............................ |
| (ख) | ज्योतिरालोकः | = | .......................... | ............................ |
| (ग) | नोद्वेगकरः | = | .......................... | ............................ |
| (घ) | गर्भेश्वरत्वम् | = | .......................... | ............................ |
| (ङ) | शृण्वन्तोऽपि | = | .......................... | ............................ |

३. **अधोलिखितानां पदानां नाम-निर्देशपूर्वक-समासो विधेयः -**

| | पदानि | | समासः | समासनाम |
|---|---|---|---|---|
| (क) | रागमलस्य अवलेपः | = | .......................... | ............................ |
| (ख) | यौवनस्य आरम्भे | = | .......................... | ............................ |
| (ग) | न आस्वादित | = | .......................... | ............................ |
| (घ) | राज्ञः प्रकृतिः | = | .......................... | ............................ |
| (ङ) | न आरोपितः | = | .......................... | ............................ |

४. **निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः -**

| | समस्तपदम् | | विग्रहः | समासनाम |
|---|---|---|---|---|
| (क) | तिमिरान्धत्वम् | = | .......................... | ............................ |
| (ख) | अभव्यस्य | = | .......................... | ............................ |
| (ग) | राजलक्ष्मीः | = | .......................... | ............................ |
| (घ) | अनास्वादितविषयरसस्य | = | .......................... | ............................ |
| (ङ) | गुरूपदेशः | = | .......................... | ............................ |

५. **अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -**

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | बुद्धिः | .......................... | ...................... | .................... |
| (ख) | विषयेषु | .......................... | ...................... | .................... |
| (ग) | मनसि | .......................... | ...................... | .................... |
| (घ) | उपदेशस्य | .......................... | ...................... | .................... |
| (ङ) | वारिणा | .......................... | ...................... | .................... |
| (च) | उपदेष्टारः | .......................... | ...................... | .................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६. निम्नलिखितानां तिङ्ङन्तपदानां धातुः-लकारः-पुरुषः-वचनञ्च पृथक् निर्दिश्यताम् -

| तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) नाशयति | .................... | ................ | ................. | .................... |
| (ख) भवन्ति | .................... | ................ | ................. | .................... |
| (ग) हरति | .................... | ................ | ................. | .................... |
| (घ) शृण्वन्ति | .................... | ................ | ................. | .................... |
| (ङ) अनुगच्छन्ति | .................... | ................ | ................. | .................... |

७. निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम् -

| पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|
| (क) विनीततरम् | ........................ | ....................... |
| (ख) इच्छन् | ........................ | ....................... |
| (ग) कर्तुम् | ........................ | ....................... |
| (घ) अवलेपः | ........................ | ....................... |
| (ङ) प्रहारः | ........................ | ....................... |

८. अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत् -

| पदम् | वाक्यम् |
|---|---|
| (क) लक्ष्मीमदः = | ........................................................................................... । |
| (ख) यौवनारम्भे = | ........................................................................................... । |
| (ग) दहति = | ........................................................................................... । |
| (घ) अजलं स्नानम् = | ........................................................................................... । |
| (ङ) राजलक्ष्मीः = | ........................................................................................... । |

**उत्तरमाला - वस्तुनिष्ठात्मक प्रश्नाः-**

१.(ख) २.(घ) ३.(ग) ४.(क)

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# तृतीयः पाठः

# मानवधर्मः

वेदार्थनिर्णये सहायकभूतेषु वेदाङ्गेषु कल्पसूत्राणाम् अतिमहनीयं स्थानं विद्यते। कल्पेषु चतुर्विधानां सूत्राणाम् अन्तर्भावो विद्यते। तानि सूत्राणि सन्ति – १. श्रौतसूत्राणि, २.गृह्यसूत्राणि ३. धर्मसूत्राणि ४. शुल्वसत्राणि। तेषु धर्मसूत्राणि एव धर्मशास्त्राणि, तान्येव च स्मृतिपदाख्यानि भवन्ति –

**"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः"** ।

एतासु स्मृतिषु सामाजिक-विषयाणां, चतुर्णां पुरुषार्थानां, वर्णाश्रमधर्माणां, राजधर्माणाञ्च वर्णनं श्रुतिमनुसृत्य एव भवति। साम्प्रतम् उपलभ्यमानासु प्रायः पंचाशत-स्मृतिषु महर्षिमनुप्रणीतस्य मनुस्मृतेः स्थानमन्यतमम्।

द्वादशाध्यायात्मिकायामस्यां स्मृतौ धर्मस्वरूपं, वर्णाश्रमधर्माः, राजधर्माश्च विस्तरेण व्याख्याताः। मानवीय-जीवने कर्त्तव्याकर्त्तव्यविवेकप्रसङ्गे मनुस्मृतिः अद्यापि अस्माकं पन्थानं प्रशस्तीकरोति। भारतीय विधि-निर्माणे सामाजिक व्यवस्थायाञ्च मनुस्मृतेः विशिष्ट योगदानमस्ति। मनुस्मृतिः भारतीय संस्कृतौ मानवीयाचारस्य श्रेष्ठपरिचायिका अस्ति।

पाठोऽयं मनुस्मृतेः द्वितीय-तृतीय-चतुर्थ अध्यायाद् सङ्कलितः। अत्र वर्णितानाम् विविधविषयकानां पद्यानां सङ्कलनं विहितमस्ति। एषु पद्येषु मनुना आचारधर्मस्य, धर्मशास्त्रीय विविधविधानां व्यवस्थानां च विवेचनं कृतम्। ब्रह्मचारिणां विहिताविहित कर्मणाम्, इन्द्रियनिग्रहस्य, गृहस्थजीवने आचरणीय कर्त्तव्याकर्त्तव्यस्य च मार्मिकाः उपदेशाः वर्णिताः। विशेषरूपेण मातृ-पितृ-गुरुभक्तिः, अध्ययनशीलता, नारी-सम्मानः, संतोषप्रवृत्तिः सदृशाः श्लोकाः विद्यार्थिणां कृते परमोपयोगी भवितुं शक्यन्ते।

**श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः ।**
**इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ।।१ ।।**

**एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः ।**
**सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ।। २ ।।**

**इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।**
**संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम् ।। ३ ।।**

**इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।**
**संनियम्य तु तान्येव ततः सिद्धिं नियच्छति ।। ४ ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

न जातु काम: कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय: एवाभिवर्धते ।। ५ ।।

वेदास्त्यागश्च यज्ञाश्च नियमांश्च तपांसि च ।
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ।। ६ ।।

वशे कृत्वेन्द्रियग्रामं संयम्य च मनस्तथा ।
सर्वान् संसाधयेदर्थानक्षिण्वन् योगतस्तनुम् ।। ७ ।।

अभिवादनशीलस्य नित्यं वृद्धोपसेविन: ।
चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशोबलम् ।। ८ ।।

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम् ।
वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ।। ९ ।।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता: ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफला: क्रिया: ।।१० ।।

विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम् ।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ।।११ ।।

यथा खनन्खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ।।१२ ।।

धर्मार्थावुच्यते श्रेय: कामार्थौ धर्म एव च ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थिति:।।१३।।

संतोषं परमास्थाय सुखार्थी संयतो भवेत् ।
संतोषमूलं हि सुखं दु:खमूलं विपर्यय: ।।१४ ।।

आचाराल्लभते ह्यायुराचारादीप्सिता: प्रजा: ।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ।।१५ ।।

सर्वलक्षणहीनोऽपि य: सदाचारवान्नर: ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ।।१६ ।।

यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत् ।
यद्यदात्मवशं तु स्यात्तत्तत्सेवेत् यत्नत: ।।१७ ।।

सर्वं परवशं दु:खं सर्वमात्मवशं सुखम् ।
एतद्विद्यात् समासेन लक्षणं सुखदु:खयो: ।।१८ ।।

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अन्वय :–

१. हि मानवः श्रुति स्मृति उदितं धर्मम् अनुतिष्ठन् इह कीर्तिम् अवाप्नोति प्रेत्य च अनुत्तमं सुखम् (अवाप्नोति) ।

२. एक अक्षरं (ओ३म् इति) परं ब्रह्म कथ्यते। प्राणायामाः परं तपः कथ्यते। तु सावित्र्याः अपरं( किमपि) न अस्ति, सत्यं मौनात् विशिष्यते ।

३. अपहारिषु विषयेषु विचरताम् इन्द्रियाणां संयमे विद्वान् यत्नम् आतिष्ठेत्, यन्ता वाजिनां इव (यथा) ।

४. इन्द्रियाणां प्रसङ्गेन असंशयम् दोषम् ऋच्छति। तानि एव संनिम्य तु ततः सिद्धिं नियच्छति ।

५. कामानाम् उपभोगेन न जातु कामः शाम्यति, हविषा कृष्णवर्त्मा इव भूयः एव अभिवर्धते।

६. विप्रदुष्टभावस्य वेदाः, त्यागः, यज्ञाः, नियमाः, तपांसि च कर्हिचित् सिद्धिं न गच्छन्ति।

७. इन्द्रियग्रामं वशे कृत्वा मनः च तथा संयम्य, योगतः तनुम् अक्षिण्वन् सर्वान् अर्थान् संसाधयेत्।

८. नित्यम् अभिवादनशीलस्य, वृद्धोपसेविनः, तस्य आयुः विद्या यशः बलं चत्वारि वर्द्धन्ते।

९. भूतानाम् अनुशासनम् अहिंसया एव कार्यं श्रेयः। धर्मम् इच्छता मधुरा श्लक्ष्णा च वाक् एव प्रयोज्या।

१० यत्र तु नार्यः पूज्यन्ते तत्र देवताः रमन्ते। यत्र एताः तु न पूज्यन्ते तत्र सर्वाः क्रियाः अफलाः (भवन्ति)।

११. विषात् अपि अमृतं ग्राह्यं, बालात् अपि सुभाषितम् (ग्राह्यं), अमित्रात् अपि सद्वृत्तम् (ग्राह्यं) अमेध्यात् अपि काञ्चनम् ।

१२. यथा नरः खनित्रेण खनन् वारि अधिगच्छति, शुश्रूषुः तथा गुरुगतां विद्याम् अधिगच्छति।

१३. इह धर्मार्थौ श्रेयः उच्यते, कामार्थौ (श्रेयः उच्यते) धर्म एव (श्रेयः), अर्थ एव (श्रेयः) हवा। स्थिति तु त्रिवर्ग (एव) श्रेयः इति।

१४. संयतः संतोषं परम् आस्थाय सुखार्थी भवेत्। हि संतोषमूलं सुखं विपर्ययः दुःखमूलम्।

१५. हि प्रजाः आचारात् ईप्सिताः आयु लभते। आचारात् अक्षय्य धनम् लभते। आचारः अलक्षणं हन्ति।

१६. नरः यः सदाचारवान्, श्रद्धानः अनसूयः च (सः) सर्वलक्षणहीनः अपि शतं वर्षाणि जीवति।

१७. यत् यत् परवशं कर्म तत् तत् यत्नेन वर्जयेत्। तु यत् यत् आत्मवशं (कर्म) स्यात् तत् तत् यत्नतः सेवेत्।

१८. परवशं सर्वं (कर्म) दुःखं, सर्वम् आत्मवशं (कर्म) सुखम्। एतत् सुखदुःखयोः लक्षणं समासेन विद्यात् ।

## शब्दार्थाः टिप्पण्यश्च

**श्रुतिस्मृत्युदितं** = श्रुति स्मृति उदितं, (वेदग्रन्थेषु धर्मशास्त्रेषु च वर्णितम्)

**चानुत्तमम्** = च अनुत्तमम् (सर्वोत्कृष्ट इति अर्थः)

**प्रेत्य** = परलोकस्य स्थिति (इस संसार से विदा होकर मरने के पश्चात् आत्मा की अवस्था), प्र + इ+ल्यप् = प्रेत्य।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **एकाक्षरम्** | = | ओ३म् इति ओंकार, प्रणवाक्षर, एक + अक्षरम् (दीर्घ सन्धि)। |
| **प्राणायामा:** | = | श्वास-प्रश्वासस्य स्थिति:, पुरक-कुम्भक-रेचक इति त्रिविध प्राणायामा:। |
| **विषयेष्वपहारिषु** | = | अपहारिषु विषयेषु, अपहरण किये जा रहे विषयों में। |
| **यन्तेव वाजिनाम्** | = | अश्वानां नियन्त्रणे सारथिवत् (रथ के घोड़ों को जिस प्रकार सारथि नियन्त्रित करता है), यन्ता + इव (गुण सन्धि) |
| **प्रसङ्गेन** | = | इन्द्रियविषयसम्पर्केन (इन्द्रियों का विषयों से सम्पर्क हो जाने से) |
| **संनियम्य** | = | नियन्त्रणं कृत्वा (संयम पूर्वक), सम् + नि + यम् + ल्यप्। |
| **जातु** | = | संभवत:, कदाचित् (कभी), जन् + क्तुन् । |
| **हविषा** | = | आहुति द्वारा, (हवनीय द्रव्यप्रदत्त आहुति से) तृतीया, एकवचन। |
| **कृष्णवर्त्मेव** | = | अग्नि: इव, कृष्णवर्त्मा + इव (गुण सन्धि) |
| **विप्रदुष्टभावस्य** | = | दूषित:, विकृत्, भ्रष्ट:(मलिन भाव रखने वाले के), षष्ठी एकवचन। |
| **संसाधयेदर्थानक्षिण्वन्** | = | संसाधयेत् अर्थान् अक्षिण्वन्, (शरीर को) क्षीण होने से बचाते हुए अर्थों (कामनाओं) को साधना चाहिये)। |
| **योगतस्तनुम्** | = | योगत: शरीरम्, योग +तसिल् = योगत:, योगत: + तनुम् (विसर्ग सन्धि) |
| **अहिंसयैव** | = | अहिंसया एव (अहिंसा से ही), अहिंसया + एव (वृद्धि सन्धि)। |
| **भूतानाम्** | = | प्राणिनाम् (जीवित प्राणियों का), षष्ठी विभक्ति, बहुवचन। |
| **श्लक्ष्णा** | = | सौम्येन, निश्छलेन (ईमानदारी से), श्लक्ष्ण, तृतीया एकवचन। |
| **तत्राफला:** | = | यत्र नारी अपमान: तत्र सर्वा: क्रिया: अफला: इत्यर्थ:, तत्र + अफला: (दीर्घ)। |
| **विषादप्यमृतं** | = | विषाद् अपि अमृतं ग्राह्यम् इत्यर्थ: (विष में भी अमृत ढूँढना चाहिये) |
| **सुभाषितम्** | = | शोभनं भाषितम् (सुन्दर अथवा उत्कृष्ट वचन), सु + भाष् + क्त। |
| **अमेध्यादपि** | = | अपवित्रादपि (मलिन या मलयुक्त से भी), अमेध्यात् +अपि (जश्त्व) |
| **वार्यधिगच्छति** | = | जलं प्राप्नोति, वारि + अधिगच्छति (यण सन्धि)। |
| **शुश्रूषु:** | = | श्रवण किंवा सेवा इच्छुक: (आज्ञाकारी छात्र), श्रु + सन्(द्वित्वादि)+ उ। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **धर्मार्थावुच्यते** | = | धर्म-अर्थौ उच्यते। धर्म + अर्थ + उच्यते (दीर्घ, अयादि सन्धि)। |
| **श्रेयस्त्रिवर्ग** | = | धर्म-अर्थ-काम इति त्रिवर्गः श्रेयस्करः, श्रेयः + त्रिवर्गः (सत्व सन्धि) |
| **विपर्ययः** | = | वैपरित्य, उल्लंघनः वा (दुर्भाग्य), वि + परि + अस् + क्त । |
| **सदाचारवान्नरः** | = | सदाचारी मनुष्यः, सदाचारवान् + नरः । |
| **श्रद्धानोऽनसूयश्च** | = | श्रद्धावान् ईर्ष्यारहितः च। न असूयः (नञ् तत्पुरुष) |
| **यद्यत्परवशम्** | = | यत् यत् परकीयाधीन, नास्ति स्वाधीनम् (जो कार्य पराधीन हैं)। |
| **समासेन** | = | संक्षिप्तेन। |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

**प्र. १.** प्राणायामाः कतिविधः भवन्ति ?

(क) द्विविधः (ख) चतुर्विधः

(ग) त्रिविधः (घ) पञ्चविधः ( )

**प्र. २.** 'श्रुतिस्मृति' रूपेण के ग्रन्थाः परिगण्यते ?

(क) वेदशास्त्र-धर्मशास्त्र (ख) अर्थशास्त्र-कामशास्त्र

(ग) इतिहास-पुराण (घ) वेदांग-उपनिषद् ( )

**प्र. ३.** इन्द्रियाणां संख्या वर्तन्ते ?

(क) पञ्च (ख) षट्

(ग) दश (घ) एकादश ( )

**प्र. ४.** 'श्रेयस्त्रिवर्गः' अस्मिन् पदे त्रिवर्गस्य किमर्थम् ?

(क) धर्मः (ख) अर्थः

(ग) कामः (घ) एते सर्वे ( )

**प्र. ५.** **रिक्तस्थानपूर्तिः क्रियताम्–**

(क) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र ........................... ।

(ख) .......................... परमास्थाय सुखार्थीः संयतो भवेत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ग) श्रद्धधानोऽनसूयश्च .............................. वर्षाणि जीवति।

(घ) इह कीर्तिमवाप्नोति प्रेत्य ................................ सुखम्।

**प्र. ६. अधोलिखितवाक्येषु रेखाङ्कितान् पदान् आश्रित्य प्रश्ननिर्माणं कुरुत–**

(क) सत्यं मौनात् विशिष्यते ।

........................................................................................ ?

(ख) कामानाम् उपभोगेन कामः न शाम्यति ।

........................................................................................ ?

(ग) आचारः अलक्षणं हन्ति ।

........................................................................................ ?

(घ) ईप्सिताः प्रजाः आचारात् लभते ।

........................................................................................ ?

## अतिलघूत्तरात्मक-प्रश्नाः–

प्र.१. परं तपः किमस्ति ?

प्र.२. अक्षय्यं धनं कस्मात् लभते ?

प्र.३. गुरुगतां विद्यां कः अधिगच्छति ?

प्र.४. शतं वर्षाणि कः जीवति ?

प्र.५. अमित्रादपि किं ग्राह्यम् ?

## लघूत्तरात्मक-प्रश्नाः –

प्र.१. श्रुतिस्मृतिग्रन्थान् अनुसृत्य किम् अवाप्नोति ?

प्र.२. इन्द्रियाणां संयमे विद्वान् यत्नं कथम् आचरेत् ?

प्र.३. सुखदुःखयोः मूलं किम् ?

प्र.४. आचारात् किं-किं लभन्ते ?

प्र.५. सुखदुःखयोः लक्षणं किम् ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## निबन्धात्मक-प्रश्नाः–

प्र. १. इन्द्रियसंयमस्य महत्त्वं प्रतिपादयत ?

प्र. २. 'सन्तोषमूलं हि सुख' किमर्थम् उच्यते ?

प्र. ३. पाठस्य द्वादश-सप्तदशयोः श्लोकयोः सप्रसङ्ग व्याख्या विधेया ।

## व्याकरणात्मक-प्रश्नाः–

**१. अधो-लिखितेषु पदेषु नामोल्लेखपूरस्सरसन्धिः कार्यः –**

| | | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | वृद्ध + उपसेविनः | = | | |
| (ख) | कृष्णवर्त्मा + इव | = | | |
| (ग) | आचारात् + लभते | = | | |
| (घ) | नार्यः + तु | = | | |
| (ङ) | अमित्रात् + अपि | = | | |

**२. अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विग्रहो विधेयः –**

| | सन्धिपदम् | विच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | चानुत्तमम् | | |
| (ख) | तान्येव | | |
| (ग) | यत्रैतास्तु | | |
| (घ) | बालादपि | | |
| (ङ) | वार्यधिगच्छति | | |

**३. अधोलिखितानां पदानां नाम-निर्देशपूर्वक-समासो विधेयः –**

| | पदानि | समासः | समासनाम |
|---|---|---|---|
| (क) | न संशयम् | | |
| (ख) | दुःखस्य मूलम् | | |
| (ग) | धर्मश्च अर्थश्च | | |
| (घ) | सर्वेभ्यः लक्षणेभ्यः हीनः | | |
| (ङ) | कामश्च अर्थश्च | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४. निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः -

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | सुखार्थी | | |
| (ख) | अक्षिण्वन् | | |
| (ग) | सदाचारः | | |
| (घ) | अनसूयः | | |
| (ङ) | अलक्षणम् | | |

५. अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | विषयेषु | | | |
| (ख) | तपांसि | | | |
| (ग) | नरः | | | |
| (घ) | सर्वान् | | | |
| (ङ) | समासेन | | | |

६. निम्नलिखितानां तिङन्तपदानां धातुः लकारः पुरुषः वचनं च पृथक् निर्दिश्यताम् -

| | तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | आतिष्ठेत् | | | | |
| (ख) | ऋच्छति | | | | |
| (ग) | वर्द्धन्ते | | | | |
| (घ) | अधिगच्छति | | | | |
| (ङ) | हन्ति | | | | |

७. निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम् -

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | संयम्य | | |
| (ख) | कार्यम् | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ग) कृत्वा

(घ) सुभाषितम्

(ङ) ग्राह्यम्

८. **अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत –**

| पदम् | वाक्यम् |
| --- | --- |
| (क) आचार: | .......................................................... । |
| (ख) संतोष | .......................................................... । |
| (ग) अहिंसा | .......................................................... । |
| (घ) आत्मवश | .......................................................... । |
| (ङ) मधुरा | .......................................................... । |

**उत्तरमाला**

वस्तुनिष्ठात्मक-प्रश्नाः १. (ग) २.(क) ३. (घ) ४. (घ)

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# चतुर्थः पाठः

# गीतामृतम्

श्रीमद्भगवद्गीता महर्षि वेदव्यासविरचितस्य सांस्कृतिकविश्वकोष नाम्ना प्रसिद्धस्य महाभारतस्य अंशभूतास्ति। गीता स्वतन्त्रग्रन्थतयापि संस्कृतसाहित्यस्य सर्वोच्चं गौरवभूतं ग्रन्थरत्नरूपेण जनैः समाद्रियते। भगवद्गीता श्रुतीनां, उपनिषदां, दर्शनानाम् च सारतत्त्वं प्रस्तौति। उपनिषत्सु दार्शनिकविचाराणां सिद्धान्तानां वा काठिन्यमस्ति, परन्तु गीतायां मनोज्ञया पद्धत्या तेषां संक्षेपतः भावप्रकाशनमतीव हृद्यं प्रतीयते। यथोक्तम् –

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ।।**

यदि केवलं सप्तशती गीतेका एव अधीयते, विविच्यते, चिन्त्यते, लौकिकजीवने व्यवह्रियते च तर्हि मानवजीवनं सर्वथा सुख-शान्ति-समन्वितं समुन्नतं च भविष्यति। समालोचनेन एतत् सिध्यति यद् गीता मानवजीवने कर्मोपदेशं प्रसारयति, लोकहितं सम्पादयति, लोकजीवने च निःश्रेयसे कल्पते। इदमेव वैशिष्ट्यमालक्ष्य श्लोकमिदं केनापि साधूच्यते –

**गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः ।**
**या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृताः ।।**

श्रीमद्भगवद्गीता महाभारतस्य भीष्मपर्वणि विद्यते। कुरुक्षेत्रस्य युद्धभूमौ विषादग्रस्त अर्जुनाय निष्कामकर्मणः शिक्षां प्रयच्छता भगवता श्रीकृष्णेन अत्र ज्ञान-भक्ति-कर्मणां समन्वयः प्रस्तुतः। पाठेऽस्मिन् गीतायाः द्वितीयोऽध्यायतः द्वादशाध्याय पर्यन्तं कर्मयोग-आत्मसंयमयोग-भक्तियोगस्य च महत्त्वपूर्णाः श्लोकाः विहिताः। अनासक्त भावेनैव कार्यकरणं गीतायाः परमोपदेशः। ज्ञानविज्ञानसमन्वयः, निष्कामकर्मदीक्षा, अनासक्तभावेन क्रियमाणकर्मणो बन्धनमुक्तित्वं, कर्त्तव्यपालनेन श्रेयः सम्पादनत्वञ्च सर्वमपि प्रतिपादनमतीव सारल्येन वर्णितमस्ति।

## ( कर्मयोगः )

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ।।१।।**

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।**
**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।।२ ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ।।३ ।।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।४ ।।



## ( आत्मसंयम योगः )

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।।५ ।।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ।।६ ।।

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ।।७ ।।

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ।।८ ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ( भक्तियोग: )

**सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धय: ।**
**ते प्राप्नुवन्ति मामेव सर्वभूतहिते रता: ।।९ ।।**

**अद्वेष्टा सर्वभूतानां मैत्र: करुण एव च ।**
**निर्ममो निरहङ्कार: समदु:खसुख: क्षमी ।।१० ।।**

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च य: ।**
**हर्षामर्षभयोद्वेगैर्मुक्तो य: स च मे प्रिय: ।।११ ।।**

**यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।**
**शुभाशुभपरित्यागी भक्तिमान्य: स मे प्रिय: ।।१२ ।।**

❀ ❀ ❀

## अन्वय: –

१. धनञ्जय ! सङ्गं त्यक्त्वा, योगस्थ: ( भूत्वा ), सिद्ध्यसिद्ध्यो: समो भूत्वा कर्माणि कुरु। ( यतो हि ) समत्वं ( एव ) योग उच्यते ।

२. त्वं नियतं कर्म कुरु । हि अकर्मण: कर्म ज्याय: । अकर्मण: च ते शरीर यात्रा अपि न प्रसिद्ध्येत्।

३. हि जनकादय: कर्मणा एव संसिद्धिम् आस्थिता । लोकसंग्रहम् एव अपि सम्पश्यन् ( कर्म ) कर्तुम् अर्हसि ।

४. यद् यद् श्रेष्ठ: आचरति तत् तत् एवेतर: जन: ( आचरति ) । स: यत् प्रमाणं कुरुते लोक: तत् अनुवर्तते।

५. आत्मना आत्मानम् उद्धरेत्, आत्मानम् न अवसादयेत्। हि आत्मा एव आत्मन: बन्धु:, आत्मा एव आत्मन: रिपु: ।

६. युक्त आहारविहारस्य, कर्मसु युक्तचेष्टस्य, सर्वकामेभ्य: नि:स्पृह:, तदा युक्त: इति उच्यते।

७. य: मां सर्वत्र पश्यति, सर्वं च मयि पश्यति, तस्य अहं न प्रणश्यामि स च मे न प्रणश्यति ।

८. असंयत आत्मना योग: दुष्प्राप ( भवति ) । तु वश्य आत्मना यतता उपायत: अवाप्तुं शक्य: इति मे मति:।

९. सर्वत्र समबुद्धय: इन्द्रियग्रामं सन्नियम्य, सर्वभूतहिते रता:– ते माम् एव प्राप्नुवन्ति ।

१०. सर्वभूतानाम् एव अद्वेष्टा मैत्र: करुण निर्ममो निरहंकार: समदु:खसुख: क्षमी च । ( ....स मे प्रिय:)

११. यस्मात् लोक: न द्विजते, य: लोकात् न द्विजते च, य: हर्षम् अमर्ष भय उद्वेगै: मुक्त: स च मे प्रिय:।

१२. य: न हृष्यति न द्वेष्टि न शोचति न कांक्षति, य: शुभाशुभपरित्यागी, य: भक्तिमान् स मे प्रिय:।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## शब्दार्थाः टिप्पण्यश्च

| | | |
|---|---|---|
| **योगस्थः** | = | योगे स्थित्वा (योग में स्थित होकर)। |
| **धनञ्जय** | = | धनं/धनानि जयति इति धनञ्जय (अर्जुन) |
| **ज्यायो** | = | श्रेष्ठतरः। |
| **ह्यकर्मणः** | = | हि + अकर्मणः (यण् सन्धि), कर्म अकृत्वा (क्योंकि कर्म न करके)। |
| **कर्मणैव** | = | कर्मणा एव (कर्म से ही), वृद्धि सन्धि। |
| **संसिद्धिमास्थिता** | = | सिद्धिं प्राप्ताः इत्यर्थः, सिध् + क्तिन् (द्वितीया एकवचन), आङ् + स्था + क्त, प्रथमपुरुषः, बहुवचनम् (सफलता को प्राप्त हुए थे) |
| **लोकसंग्रहम्** | = | लोककल्याण, लोकस्य संग्रहम् (षष्ठी तत्पुरुष)। |
| **यद्यदाचरति** | = | यत् यत् आचरति (व्यवहरति इति), यत् + यत् + आचरति (जश्त्व)। |
| **देवेतरो** | = | मनुष्यवर्गः, देव + इतरः (गुण सन्धि)। |
| **उद्धरेत्** | = | त्रायेत्, रक्षेत् इत्यर्थः, उत् + ह + विधिलिंग, प्रथमपुरुष, एकवचन। |
| **आत्मनात्मानं** | = | आत्मना आत्मानं (स्वयं से स्वयं को), दीर्घ सन्धि। |
| **रिपुरात्मनः** | = | स्वस्य शत्रुः (स्वयं का शत्रु), रिपुः + आत्मनः (रुत्व सन्धि)। |
| **युक्ताहारविहारस्य** | = | युक्त आहार विहारस्य (आहारे विहारे च युक्तस्य, योगिनः)। |
| **निःस्पृहः** | = | स्पृहा रहितः (कामना रहित), अव्ययीभाव समास। |
| **असंयतात्मना** | = | असंयत आत्मना (आत्मा से असंयमित रहने वाला)। |
| **दुष्प्राप** | = | अप्राप्य, दुष्प्राप्य, दुस् + प्राप = दुष्प्राप (ष्टुत्व सन्धि)। |
| **अवाप्तुमुपायतः** | = | उपायतः प्राप्तुं, अव् + आप् + तुमुन् = अवाप्तुम् (यत्नपूर्वक संयमित उपाय से योग को प्राप्त किया जा सकता है)। |
| **इन्द्रियग्रामं** | = | इन्द्रियसमूह (५ ज्ञानेन्द्रिय + ५ कर्मेन्द्रिय + मन = ११ इन्द्रिय)। |
| **अद्वेष्टा** | = | द्वेष रहितः, घृणा रहितः, अ + द्विष् + तृच् = अद्वेष्टा । |
| **निर्ममो** | = | ममता रहितः (अहङ्कारशून्य)। |
| **क्षमी** | = | क्षमावान्, क्षमाशीलः (क्षमा करने में समर्थ)। |
| **यस्मान्नोद्विजते** | = | यस्मात् न उद्विजते (जिससे संसार उद्वेग को प्राप्त नहीं होता)। |
| **हृष्यति** | = | हर्षति (प्रसन्न होता है), हृष् धातु, लट्, प्रथमपुरुष, एकवचन। |
| **द्वेष्टि** | = | घृणा करोति (द्वेष करता है), द्विष्, लट्, प्रथमपुरुष, एकवचन। |
| **भक्तिमान्** | = | ईश्वरभक्तः, भक्ति + मतुप् = भक्तिमान् । |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

प्र. १. श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि अस्ति ?

(क) भीष्म पर्वणि

(ख) वन पर्वणि

(ग) सभा पर्वणि

(घ) विराट् पर्वणि ( )

प्र. २. 'धनञ्जयः' कस्य अपरं नाम ?

(क) युधिष्ठिरस्य

(ख) भीमस्य

(ग) सहदेवस्य

(घ) अर्जुनस्य ( )

प्र. ३. योगस्य लक्षणं वर्तते ।

(क) रतिः

(ख) समत्वम्

(ग) वितृष्णा

(घ) आसक्तिः ( )

प्र. ४. 'स च मे प्रियः' वाक्येऽस्मिन् 'मे' कस्यकृते प्रयुक्तः ?

(क) अर्जुनस्य

(ख) भीष्मस्य

(ग) श्रीकृष्णस्य

(घ) वेदव्यासस्य ( )

**प्र. ५. रिक्तस्थानपूर्तिः क्रियताम् –**

(क) योगस्थः कुरु कर्माणि ............... ................ धनञ्जय ।

(ख) सः यत्प्रमाणं कुरुते ..................... तदनुवर्तते ।

(ग) उद्धरेत् ........................ ..................... न .......................... अवसादयेत् ।

(घ) शुभाशुभपरित्यागी भक्तिमान्यः स मे ..................... ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अतिलघूत्तरात्मक-प्रश्नाः–

प्र.१. अकर्मणः कः ज्यायः ?

प्र.२. आत्मनः बन्धुः कः ?

प्र.३. योगः कस्य कृते दुष्प्राप भवति ?

प्र.४. जनकादयः केन सिद्धिमास्थिताः ?

प्र.५. 'शुभाशुभपरित्यागी' इति कस्य लक्षणम् ?

## लघूत्तरात्मक-प्रश्नाः–

प्र.१. कस्मात् शरीरयात्रा न प्रसिद्धयेत् ?

प्र.२. आत्मनः रिपुः आत्मा कथम् ?

प्र.३. युक्तस्य का परिभाषा ?

प्र.४. भगवन्तं (श्रीकृष्णम्) के प्राप्नुवन्ति ?

प्र.५. श्रीकृष्णस्य कृते के प्रियः सन्ति ?

## अधोलिखितवाक्येषु रेखाङ्कितान् पदान् आश्रित्य प्रश्ननिर्माणं कुरुत –

(क) लोकसंग्रहम् एवापि सम्पश्यन् (कर्म) कर्तुमर्हसि ।

.. .. .. ........................................................................................... ?

(ख) स यत्प्रमाणं कुरुते लोकः तदनुवर्तते ।

................................................................................................ ?

(ग) न आत्मानम् अवसादयेत् ।

................................................................................................ ?

(घ) ते प्राप्नुवन्ति माम् एव सर्वभूतहिते रताः ।

................................................................................................ ?

## निबन्धात्मक-प्रश्नाः–

प्र.१. कर्मयोगस्य महत्त्वं प्रतिपादयत ?

प्र.२. पञ्चम श्लोकस्य व्याख्या विधेया ।

प्र.३. भक्तियोगस्य लक्षणानि प्रतिपादयत ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## व्याकरणात्मक-प्रश्नाः –

१. अधो-लिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः –

| | | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | शरीरयात्रा + अपि | = | .............................. | ........................... |
| (ख) | कर्मणा + एव | = | .............................. | ........................... |
| (ग) | रिपुः + आत्मनः | = | .............................. | ........................... |
| (घ) | हि + आत्मनो | = | .............................. | ........................... |
| (ङ) | सिद्धि + असिद्धयोः | = | .............................. | ........................... |

२. अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विच्छेदो विधेयः –

| | सन्धिपदम् | विच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | लोकस्तदनुवर्तते | .............................. | ........................... |
| (ख) | बन्धुरात्मैव | .............................. | ........................... |
| (ग) | इत्युच्यते | .............................. | ........................... |
| (घ) | हर्षामर्ष | .............................. | ........................... |
| (ङ) | आत्मैव | .............................. | ........................... |

३. अधोलिखितानां पदानां नाम-निर्देशपूर्वक-समासो विधेयः –

| | पदानि | समासः | समासनाम |
|---|---|---|---|
| (क) | धनं जयति यः सः | .............................. | ........................... |
| (ख) | सिद्धि असिद्धयोः च | .............................. | ........................... |
| (ग) | सर्वेभ्यः कामेभ्यः | .............................. | ........................... |
| (घ) | न संयत | .............................. | ........................... |
| (ङ) | आत्मा वशे यस्य सः | .............................. | ........................... |

४. निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः –

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | युक्ताहारविहारस्य | ........................................................ | ........................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ख) शरीरयात्रा ........................ ..............

(ग) निस्पृहः ........................ ..............

(घ) अद्वेष्टा ........................ ..............

(ङ) समदुःखसुखः ........................ ..............

५. **अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -**

| पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) आत्मनः | .............. | .............. | .............. |
| (ख) युक्तचेष्टस्य | .............. | .............. | .............. |
| (ग) सर्वभूतानाम् | .............. | .............. | .............. |
| (घ) माम् | .............. | .............. | .............. |
| (ङ) आत्मानम् | .............. | .............. | .............. |

६. **निम्नलिखितानां तिङ्गतपदानां धातुः-लकारः-पुरुषः-वचनञ्च पृथक् निर्दिश्यताम् -**

| तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) अर्हसि | .......... | .......... | .......... | .......... |
| (ख) कुरुते | .......... | .......... | .......... | .......... |
| (ग) उद्धरेत् | .......... | .......... | .......... | .......... |
| (घ) पश्यन्ति | .......... | .......... | .......... | .......... |
| (ङ) प्राप्नुवन्ति | .......... | .......... | .......... | .......... |

७. **निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम् -**

| पदम् | प्रकृतिः + प्रत्ययः |
|---|---|
| (क) त्यक्त्वा | |
| (ख) युक्तः | |
| (ग) अवाप्तुम् | |
| (घ) योगः | |
| (ङ) कर्तुम् | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८. **अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत-**

| पदम् | | वाक्यम् |
|---|---|---|
| (क) | आत्मा | ............................................................................................ । |
| (ख) | भक्तिमान् | ............................................................................................ । |
| (ग) | कर्माणि | ............................................................................................ । |
| (घ) | अद्वेष्टा | ............................................................................................ । |
| (ङ) | प्रियः | ............................................................................................ । |

**उत्तरमाला**

१. वस्तुनिष्ठात्मक-प्रश्नाः ( क ) २. ( घ ) ३. ( ख ) ४. ( ग )

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पञ्चमः पाठः

# मेघदूतपीयूषम्

संस्कृतसाहित्ये महाकविः कालिदासः अप्रतिमकवि रूपेण आद्रियते। कवेरस्य स्थितिः काल खीस्तपूर्वप्रथमशताब्दौ स्वीक्रियते। कवेरस्य जन्मस्थान-वंश-जीवनविषये विद्वांसः विवदमानाः अपि, जनश्रुतिभिः, अनुमानैः, तस्य रचनासाक्ष्यैश्च स्वीकुर्वन्ति यत् कवेरस्य जन्मः ब्राह्मणवंशेऽभवत्, उज्जयिनी तस्य वासभूमिरासीत्। महाकविरयम् भारतीयसंस्कृति- साहित्य-जीवनदर्शनानाञ्च प्रतिनिधिकविरुपेण राजते। तस्य काव्ये काव्योचितभावगाम्भीर्यं-प्रेमाभिव्यक्ति-प्रकृतिचित्रणं- शास्त्रोचितभव्यतौदार्यम् रसछन्दालङ्कारादीनिकाव्यकलानिकषानिप्रतिमानानि च अतिशयेन फलितानि। तस्यप्रेमनिष्यन्दिनीभिः सूक्तिभिः मानवजीवनस्य कृते दुर्लभतमः सन्देश प्रकाश्यते।

मेघदूतपीयूषम् महाकविकालिदासरचितस्य-'मेघदूत' इति नामधेयस्य गीतिकाव्यस्य सूक्तियुक्तानां प्रतिनिधिपद्यानां संकलनमस्ति। कवेः रागात्मिका वृत्तिरेव गीतिकाव्यस्य जननी भवति। लोकराग-प्रेमामृतसाधना-प्रकृतिपूजन-संस्कृतिसौन्दर्यचेतना-मानवमनोविज्ञान-कविकल्पनाविलासादिभिर्गुणैः 'मेघदूत' गीतिकाव्यानां चूड़ामणिरिव राजते।

कृतिरियं 'पूर्वमेघः', 'उत्तरमेघश्च' इति द्वयोः विभागयोः विभक्ता। पूर्वमेघस्य कथायां कोऽपि प्रिया वियोगी यक्षः कर्त्तव्यपालनप्रमादात् स्वस्वामिना कुबेरेण वर्षभोग्येण स्वदेशनिर्वासनरूपेण शापेन शप्तः भूत्वा रामगिरिपर्वते निवसति। आषाढ़स्य प्रथमदिवसे सजलमेघं दृष्ट्वा सद्य परिणीतां स्वप्राणप्रियां स्मृत्वा स्मृत्वा स यक्षः भावपयोधौ निमग्नः भूत्वा पुरोदृश्यमानं मेघं मित्र भावेन विरहव्यथितां प्रियासकाशं सन्देशाहरणाय याचते। सा विरहिणी हिमालय स्थितायां अलकापुर्यां निवसति। यक्षः मेघभागेस्थितानां नगरसरित्वनगिरिगह्वराणां सौन्दर्यसंवेदनाप्रतिपादनप्रसङ्गैः सहृदयानां चेतांसि आहरति। उत्तरमेघे प्रणयसाधना साधकः सः यक्षः प्रियायाः विरहदशां वर्णयित्वा मेघं प्रियाकृते अस्मै सन्देशाय निवेदयति यत्- हे कल्याणि त्वं धैर्यं धारय, यतो हि जीवने सुखदुःखादयः रथचक्रेव परिवर्तनशीलाः भवन्ति न तु स्थायिनः। मेघोऽपि तं सर्वं श्रुत्वा अलकां प्रति गतवान् यक्षिण्यै च सन्देशं श्रावितवान्। कुबेरश्च एतद् वृतान्तं ज्ञात्वा करुणाद्रचेतः सन् शापावसानं कृत्वा तयोः मेलनं चकार।

सम्पूर्णं मेघदूतम्, 'मन्दाक्रान्ता' छन्देन छन्दोबद्धः, विप्रलम्भशृङ्गारस्य उत्कृष्टोदाहरणं च विद्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१. कश्चित् कान्ताविरहगुरुणास्वाधिकारात् प्रमत्त:,
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तु:
यक्षश्चक्रेजनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।।पूर्वमेघ:, १ ।।

२. धूमज्योति:सलिलमरुतां सन्निपात: क्व मेघ:
सन्देशार्था: क्वपटुकरणै: प्राणिभि: प्रापणीया: ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता: हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु ।।पूर्वमेघ:, ५ ।।

३. जातं वंशे भुवनविदिते पुष्करावर्तकानाम्
जानामि त्वां प्रकृति-पुरुषं कामरूपं मघोन: ।
तेनार्थित्वं त्वयि विधिवशात् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।।पूर्वमेघ:, ६ ।।



४. तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहितगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्ध: कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्य: पाति प्रणयिहृदयं विप्रयोगे रुणद्धि ।।पूर्वमेघ:, ९ ।।

५. त्वामासारप्रशमितवनोपप्लवंसाधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतंसानुमानाम्रकूट: ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय,
प्राप्ते मित्रे भवति विमुख: किं पुनर्यस्तथोच्चै: ।।पूर्वमेघ:, १७ ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६. तां कस्याञ्चिद् भवनवलभौसुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्र।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः।।पूर्वमेघः, ४१ ।।

७. तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा,
बाधेतोल्काक्षपितचमरीवालभारो दवाग्निः।
अर्हस्येनं शमयितुमलं वारिधारासहस्त्रै-
रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्।।पूर्वमेघः, ५७।।

८. एभिः साधोहृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।
क्षामच्छायंभवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्।।उत्तरमेघः, २० ।।

९. सा संन्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेनगात्रम्।
त्वामप्यस्त्रं नवजलमयं मोचयिष्यत्यवश्यं,
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा।।उत्तरमेघः, ३३ ।।

१०. इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव।
श्रोष्यत्यस्मात् परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः सङ्गमात् किंचिदूनः।।उत्तरमेघः, ४० ।।

११. नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे,
तत्कल्याणि! त्वमपि नितरां मा गमः कातरत्वम् ।
कस्यात्यन्तंसुखमुपनतं दुःखमेकान्ततो वा,
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।।उत्तरमेघः, ४९ ।।

१२. कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव।।उत्तरमेघः, ५४ ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अन्वयः–

१. स्वाधिकारात् प्रमत्तः कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः शापेन अस्तङ्गमितमहिमा कश्चित् यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धछायातरुषु रामगिर्याश्रमेषु वसतिं चक्रे।

२. धूमज्योतिःसलिलमरुतां सन्निपातः मेघः क्व? पटुकरणैः प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व? इति औत्सुक्यात् अपरिगणयन् गुह्यकः तं ययाचे, हि कामार्ता चेतनाऽचेतनेषु प्रकृतिकृपणाः (भवन्ति)।

३. (हे मेघ) त्वां भुवनविदिते पुष्करावर्तकानां वंशे जातं मघोनः कामरूपं प्रकृतिपुरुषम् (अहम्) जानामि। तेन विधिवशात् दूरबन्धुः अहम् त्वयि अर्थित्वं गतः। अधिगुणे मोघा (अपि) याच्ञा वरम् (किन्तु) अधमे लब्धकामा (अपि) न वरम्।

४. (हे मेघ) दिवसगणनातत्पराम् (अत एव) अव्यापन्नां ताम् एकपत्नीं भ्रातृजायां च अवहितगतिः (त्वं) अवश्यं दृक्ष्यसि। हि आशाबन्धः अङ्गनानांकुसुम सदृशं (अतएव) विप्रयोगे सद्यःपाति प्रणयि हृदयं प्रायशः रुणद्धि।

५. आम्रकूटः सानुमान् आसारप्रशमितवनोपप्लवम् अध्वश्रमपरिगतं त्वां साधुमूर्ध्ना वक्ष्यति। क्षुद्रोऽपि संश्रयाय मित्रेप्राप्ते प्रथमसुकृतापेक्षया विमुखो न भवति, यः तथा उच्चैः (सः) किं पुनः।

६. चिरविलसनात् खिन्नविद्युतकलत्रः भवान् सुप्तपारावतायां कस्याञ्चिद् भवनवलभौ तां रात्रिं नीत्वा सूर्ये दृष्टे पुनः अपि अध्वशेषं वाहयेत्। सुहृदाम् अभ्युपेतार्थकृत्याः न मन्दायन्ते खलु।।

७. वायौ सरति सरलस्कन्धसंघट्टजन्मा उल्काक्षपितचमरीबालभारः दावाग्निः तं बाधेत् चेत् एनं वारिधारासहस्रैः अलं शमयितुम् अर्हसि। हि उत्तमानां सम्पदः आपन्नार्ति प्रशमनफलाः (भवन्ति)

८. हृदयनिहितैः एभिः लक्षणै च द्वारोपान्ते लिखित वपुसौ शङ्खपद्मौ दृष्ट्वा नूनम् अधुना मद्वियोगेन क्षामच्छायं भवनं लक्षेयथाः। सूर्यापाये कमलं स्वाम् अभिख्यां न पुष्यति खलु।

९. संन्यस्ताभरणम् असकृत् दुःखदुःखेन शय्योत्सङ्गेनिहितपेशलं गात्रं धारयन्ती सा अबला त्वामपि नवजलमयं अस्रं अवश्यं मोचयिष्यति। प्रायः आर्द्रान्तरात्मा सर्वः करुणावृत्तिः भवति।

१०. इति आख्याते (सति) पवनतनय मैथिली इव सा उन्मुखी उत्कण्ठोच्छ्वसित हृदया त्वां वीक्ष्य सम्भाव्य च अस्मात् परं अवहिता (सती) श्रोष्यति एव। (हे) सौम्य। सीमन्तिनीनां सुहृदुपनतः कान्तोदन्तः सङ्गमात् किंचिदूनः (एव) भवति।

११. ननु बहु विगणयन् (अहं) आत्मानं आत्मना एव अवलम्बे, तत्कल्याणि! त्वम् अपि नितरां कातरत्वं मा गमः, कस्य अत्यन्तं सुखं वा एकान्ततः दुःखम् उपनतम्? (जीवन) दशा चक्रनेमिक्रमणे नीचैः उपरि च गच्छति।

१२. सौम्य! इदं मे बन्धुकृत्यं त्वया व्यवसितं कच्चित्? प्रत्यादेशात् भवतः धीरतां न कल्पयामि खलु याचितः (त्वं) निःशब्दः अपि चातकेभ्यः जलं प्रदिशसि, हि सतां प्रणयिषु ईप्सितार्थ क्रिया एव प्रत्युक्तम् (भवति)।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## शदार्थाः टिप्पण्यश्च

| | | |
|---|---|---|
| **स्वाधिकारात्** | – | आत्मकर्त्तव्यात् (अपने कर्तव्य से) |
| **प्रमत्तः** | – | असावधान (प्रमादवश कर्तव्य विमुख) |
| **कान्ताविरहगुरुणा** | – | पत्न्या: असह्येन विरहेण (नवविवाहित पत्नी के असहनीय वियोग के कारण) कान्ताया: विरहेण गुरु: तेन (तृतीया तत्पुरुष:) |
| **अस्तङ्गमितमहिमा** | – | विनाशितदिव्यसामर्थ्य:(नष्ट प्रभाव वाला),अस्तं गमित: महिमा यस्य स:(बहुव्रीहि)। |
| **जनकतनयास्नानपुण्योदकेषु** | – | सीताकृतस्नानपवित्रजलेषु (सीता द्वारा किये गये स्नान से पवित्र किये गये जल वाले)–जनकतनयास्नानै: पुण्यानि उदकानि येषु तेषु (बहुब्रीहि समास) |
| **स्निग्धछायातरुषु** | – | घनीभूतछायावृक्षेषु (सघन छायादार वृक्षों से युक्त)–छायाप्रधाना तरव: येषु तेषु (रामगिरि का विशेषण) |
| **रामगिर्याश्रमेषु** | – | रामगिरिपर्वतस्थितेषु तपोवनेषु (रामगिरि पर स्थित तपोवन में) |
| **वसतिं** | – | निवासं, |
| **चक्रे** | – | कृतवान् (निवास किया), चक्रे–कृ, लिट्लकार आत्मनेपद प्रथम पुरुष एकवचन। |
| **धूमज्योति:सलिलमरुताम्** | – | धूमाग्निजलवायूनाम् (धूम, अग्नि, जलवायु का)–धूमश्च ज्योतिश्च सलिलञ्च मरुच्च तेषां सर्वेषां (द्वन्द्व समास) |
| **सन्निपात:** | – | समूह: (समुदाय), सम् + नि + पत् + घञ् (भावार्थे) |
| **पटुकरणै:** | – | समर्थेन्द्रियै: (सक्षम इन्द्रियों वाले)–पटूनि करणानि येषां तै: (बहुब्रीहि समास) |
| **गुह्यक:** | – | यक्ष: (देव योनि विशेष जिसके यक्ष किन्नर, गुह्यक: अनेक नाम हैं) |
| **प्रकृतिकृपणा:** | – | स्वभावतो दीना: (स्वाभाविक रूप से दीन)– प्रकृत्या कृपण: (तृतीया तत्पुरुष:) |
| **भुवनविदिते** | – | लोकप्रसिद्धे (लोकों में प्रसिद्ध–पुष्कर आवर्तक मेघों का विशेषण) |
| **पुष्करावर्तकानाम्** | – | एतन्नामकानां प्रलयकालीनमेघानां (पुष्कर और आवर्तक नामक विशेष मेघों के) |
| **जातम्** | – | उत्पन्नम्, जन् धातु + क्त प्रत्यय |
| **मघोन:** | – | इन्द्रस्य (इन्द्र का), मघवन् (इन्द्र का नाम विशेष), षष्ठी एकवचन। |
| **कामरूपम्** | – | इच्छाधीनरूपधारिणम् (इच्छानुसार रूप धार करने वाले को) |
| **प्रकृतिपुरुषम्** | – | प्रधानपुरुषम् (प्रधान पुरुष को), प्रकृतिश्चासौ पुरुष: तम्। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**दूरबन्धुः** – पत्नीवियुक्तः दूरे बन्धुः भार्यः यस्य सः (बहुब्रीहि समास)
**अर्थित्वम्** – याचकताम् (याचक के रूप में)
**अव्यापन्नाम्** – जीविताम् अमृतां वा (अर्थात् वियोग सहकर अभी भी जीवित है)–न व्यापन्नां–अव्यापन्नां, तां (नञ् समास), वि + आ +पद् + क्त + टाप् + द्वितीया, एक वचन
**अविहतगतिः** – अबाधितगतिः (अबाधित गति वाले तुम)–न विहता, अविहता (नञ् समास), अविहता गतिः यस्य सः, मेघः (बहुब्रीहि)
**सद्यःपाति** – सद्यःविनाशशील (शीघ्र विनाश होने के स्वभाव वाला)
**रुणद्धि** – नाशात् निवारयति (टूटने से रोक लेता है)–रुधि धातु, लट्, प्रथम पुरुष, एकवचनम्
**आसारप्रशमितवनोप्लव** – धारावृष्ट्या विनाशितः वनाग्निः (मूसलाधार वर्षा से दावाग्नि को शान्त करने वाले) दावाग्नि वनों में वृक्षों के परस्पर टकराने से लगने वाली एक विशेष अग्नि होती है, जो तेज वर्षा द्वारा ही शान्त होती है।)
**अध्वश्रमपरिगतम्** – मार्गश्रमश्रान्तम् (रास्ते की थकान से थके हुए)
**प्रथमसुकृतोपक्षया** – पूर्वकृतश्रेष्ठकार्यस्य विचारेण (पहले किये गये परोपकारादि श्रेष्ठ कार्य के विचार से)
**चिरविलसनात्** – चिरविलासाद् (देर तक चमकने के कारण)
**खिन्नविद्युत्कलत्र** – परिश्रान्तचपलाभार्यः (थकी हुयी बिजली रूपी पत्नी वाला), खिन्नं विद्युत् एव कलत्रं यस्य सः (बहुब्रीहि)।
**सुप्तपारावतायाम्** – शायितकपोतायाम् (सोये हुए कबूतरो वाली) सुप्ताः पारावताः यस्यां तस्यां (बहुब्रीहि), भवनवलभि का विशेषण।
**भवनवलभौ** – प्रासादस्य अट्टालिकायाः उपरिभागे (महल की अट्टालिका के ऊपरी भाग पर)
**अध्वशेषम्** – मार्गस्य शेषभागम् (बचे हुए मार्ग को)
**वाहयेत्** – प्रापयेत् (पूर्ण करे)–वहि प्रापणे धातु (णिच्), विधिलिङ्, प्रथम पुरुष, एक वचन
**अभ्युपेतार्थकृत्याः** – अङ्गीकृतप्रयोजनसिद्धिक्रिया, (प्रयोजन सिद्धि के दायित्व को स्वीकार कर चुकेलोग)–अभ्युपेतानि अर्थकृत्यानि यैः ते (बहुब्रीहि)
**न मन्दायते खलु** – शिथिली न भवन्ति (मन्द नहीं पड़ते अर्थात उत्साहहीन नहीं होते)
**वायौ सरति** – पवने प्रवहति सति (हवा के बहने पर) सरति–सृ+लट्+शतृ+सप्तमी एकवचन



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सरलस्कन्धसंघट्टजन्मा** – देवदारुशाखासंघर्षणेनोत्पन्ना (देवदारु वृक्षों की शाखाओं के संघर्ष से उत्पन्न), सरलानां देवदारुणां स्कन्धानाम् शाखानां संघट्टेन जन्मः यस्य सः।

**उल्काक्षपितचमरीबालभारः** – स्फुलिङ्गदग्धचमरीमृगकेशसमूहः (चिनगारियों से चमरीमृग के केशसमूह को जला देने वाला)

**दवाग्निः** – दावाग्निः, वनाग्निः (वन में उत्पन्न होने वाली विशेष अग्नि)

**बाधेत्** – पीडयेद् (पीड़ित करे) बाध् + विधि लिङ्, प्र.पु., एकवचन

**वारिधारासहस्रैः** – असंख्यजलधाराभिः (जल की हजारों धाराओं से) धाराणां सहस्र–धारासहस्रं, वारीणां धारा सहस्रैः (षष्ठी तत्पुरुष)

**आपन्नार्तिप्रशमनफलाः** – दुखितजनपीड़ानिवारणप्रयोजनाः (दुःखी प्राणियों की पीडा शान्त करने के प्रयोजन वाली) आपन्नानां आर्ति प्रशमनं फलं यस्याः ताः (बहुव्रीहि)

**लक्षयेथा** – अभिजानीया (पहचान लेना)

**न पुष्यति खलु** – निश्चयेन न धारयति (निश्चित ही धारण नहीं करता है।)

**संन्यस्ताभरणम्** – कृशत्वात् परित्यक्ताभूषणम् (कमजोर हो जाने के कारण परित्यक्त आभूषणों वाले),सम् + नि + अस् + क्त, संन्यस्तानि आभरणानि येन तत् (गात्र का विशेषण)

**असकृत्** – वारम्वारम् (बार–बार), न सकृत, असकृत् (नञ् समास)।

**शय्योत्सङ्गे** – पर्यङ्कमध्ये (शय्या के मध्य में)

**पेशलं गात्रम्** – स्थापितंकोमलंशरीरम् (रखे हुए कोमल शरीर को)

**अस्त्रम्** – अश्रुम् (आँसुओं को)

**मोचयिष्यति** – विसर्जयिष्यति (छोडेगी), मुच्+णिच् लृट्+प्र.पु+एकवचन।

**आर्द्रान्तरात्मा** – मृदुलहृदयः (कोमल हृदय वाला), आर्द्रः अन्तरात्मा यस्य सः (बहुव्रीहि समास)

**करुणावृत्तिः** – करुणस्वभावः (कोमल स्वभाव वाला) करुणाशीला वृत्तिः यस्य सः (बहुव्रीहि)

**इति आख्याते** – एवं प्रकारेण कथिते सति, (यक्ष के इस प्रकार कहे जाने पर)

**मैथिली इव** – सीता इव (सीता के समान), मिथिला + अण् + ङीप्

**उत्कण्ठोच्छ्वसितहृदया** – औत्सुक्येनविकसितचित्ता, (उत्कण्ठा से विकसित हृदय वाली) उत्कण्ठया उच्छ्वसितं हृदयं यस्याः सा (बहुव्रीहि समास)

**अवहिता** – सावधाना (सति), (सावधान होती हुयी) अव + धा धातु + क्त प्रत्यय + टाप्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **सीमन्तिनीनाम्** | – | नारीणाम् (स्त्रियों का) |
| **सुहृदुपनतः** | – | प्रियस्य मित्र मुखेन प्राप्तः (प्रियतम के मित्र द्वारा प्राप्त) |
| **कान्तोदन्तः** | – | प्रियतमसन्देशः, कान्तस्य उदन्तः (षष्ठी तत्पुरुष) |
| **संगमात्** | – | पतिमिलनात् (पति मिलन से) |
| **बहु विगणयन्** | – | पूर्वापरं सर्वं विचारयन् (शापान्त पर ऐसा करुँगा, ऐसा बहुत विचार करता हुआ) |
| **नितरांकातरत्वम्** | – | अत्यन्त अधीरताम् (अत्यन्त अधीरता को) |
| **उपनतम्** | – | प्राप्तम्, उप + नम् + क्त |
| **चक्रनेमिक्रमेण** | – | रथाङ्गपरिपाट्या (पहिये की परिधि के समान) |
| **बन्धुकृत्यम्** | – | मित्रस्यकार्यम् (मित्र द्वारा करणीय कार्य) बन्धोः कृत्यम् (षष्ठी तत्पुरुषः) |
| **व्यवसितं कच्चित्** | – | अवश्यं करिष्यामि इति निश्चितं किम् |
| **प्रत्यादेशात्** | – | करिष्यामि इति उत्तरदानात् (करुँगा इस प्रकार के उत्तर देने को ही) |
| **धीरतां न कल्पयामि** | – | गम्भीरतां न समर्थयामि (अर्थात आप यदि उत्तर नहीं दे रहे हो तो भी मैं आश्वस्त हूँ कि आप मेरा कार्य करोगे) |
| **निःशब्दः अपि** | – | गर्जनध्वनिरहितोऽपि (गर्जना किये बिना भी) |
| **प्रणयिषु** | – | प्रार्थिजनेषु याचकेषु वा (याचना करने वालों के विषय में) |
| **ईप्सितार्थक्रिया** | – | इच्छितकार्यसम्पादनमेव (यथेष्ट कार्य का सम्पादन) |
| **प्रयुक्तं भवति** | – | प्रतिवचनम् (प्रत्युत्तर होता है– अर्थात् श्रेष्ठ लोग कार्य करने का वचन भर दें अथवा नहीं दे, कार्य करते अवश्य हैं) |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

१. यक्षः कियत् काल पर्यन्तम् शापितः आसीत्–

(क) एक मास पर्यन्तम् (ख) एक वर्ष पर्यन्तम्

(ग) त्रिमास पर्यन्तम् (घ) षड्मास पर्यन्तम् ( )

२. अतिकोमलं आशा बन्धः कस्य भवति–

(क) अङ्गनानाम् (ख) पुरुषाणाम्

(ग) यक्षाणाम् (घ) मेघस्य ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. क्षामच्छायं भवनमधुना.........। इत्यस्मिन् पदे क्षामच्छायं कः अस्ति–

(क) यक्षः (ख) भवनम्

(ग) मेघः (घ) सूर्यः ( )

४. चातकेभ्यः जलं कः ददाति–

(क) मेघः (ख)यक्षः

(ग) इन्द्रः (घ) कुबेरः ( )

## अधोलिखितेषु रिक्तस्थानं पूरयत–

१. .........................हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु।

२. प्राप्ते............................भवति विमुखः किं पुनर्यस्तथोच्चैः।

३. तां कस्याञ्चिद्..........................सुप्तपारावतायाम्।

४. प्रायः सर्वो भवति..........................वृत्तिरार्द्रान्तरात्मा।

५. याच्ञा मोघा वरमधिगुणे.................लब्धकामाः।

## लघूत्तरात्मकाः प्रश्नाः–

१. दूरबन्धुर्गतः कः अस्ति?

२. केषां सम्पदः दुखितजनपीड़ा निवारणाय भवन्ति?

३. पाठे यक्षण्याः उपमा कया सह कृता?

४. मनुष्याणां कृते सुखदुःखयोः दशा किमिव भवति?

## निबन्धात्मकाः प्रश्नाः–

१. अस्य पाठस्य द्वितीय–तृतीय संख्यकानां पद्यानां सप्रसङ्ग व्याख्या कार्या।

२. पाठे प्रयुक्तानां सूक्तीनां जीवने महत्त्वं प्रतिपादयत।

३. पाठस्य एकादश द्वादश संख्यकानां पद्यानां सप्रसङ्गव्याख्या कार्या।

## व्याकरणात्मकाः प्रश्नाः–

**प्र. १ अधस्तनेषु पदेषु नामोल्लेखपूर्वकं सन्धिकार्यः–**

| | | सन्धिरूपम् | सन्धि नाम |
|---|---|---|---|
| (क) | स्व +अधिकारात् | .............................. | ................................... |
| (ख) | हि + उत्तमानाम् | .............................. | ................................... |
| (ग) | आत्मना + एव | .............................. | .................................. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(घ) क्षुद्रः+अपि ............................... ...................................

(ङ) प्रत्यादेशात् + न ............................... ...................................

**प्र. २ अधस्तनपदेषु सन्धिविच्छेदो विधेयः-**

| पदानि | सन्धि विच्छेदः |
|---|---|
| (क) रामगिर्याश्रमेषु | ............................................ |
| (ख) सुकृतापेक्षया | ............................................ |
| (ग) पुण्योदकेषु | ............................................ |
| (घ) ह्यङ्गनानाम् | ............................................ |
| (ङ) यक्षश्चक्रे | ........................................... |

**प्र. ३ अधोलिखितेषु पदेषु नामोल्लेखपूर्वकं समासोविधीयताम्–**

| पदानि | समस्तपदम् | समास नाम |
|---|---|---|
| (क) कान्तायाः विरहः | ............................... | ................................... |
| (ख) न व्यापन्नाम् | ............................... | ................................... |
| (ग) पुष्कराश्च आवर्तकाश्च | ............................... | ................................... |
| (घ) आम्राः कूटेषु यस्य सः | ............................... | ................................... |
| (ङ) शोभनं हृदयं यस्य सः | ............................... | ................................... |

**प्र. ४ अधोलिखितेषु समस्तपदेषु समासविग्रहोविधीयताम्–**

| समस्त पदं | समास विग्रहः |
|---|---|
| (क) धूमज्योतिःसलिलमरुतां | ............................................... |
| (ख) मद्वियोगः | ............................................... |
| (ग) प्रकृतिपुरुषम् | ............................................... |
| (घ) करुणावृत्तिः | ............................................... |
| (ङ) चक्रनेमिः | ............................................... |

**प्र. ५ अधोलिखितेषु सुबन्तपदेषु विभक्तिः वचनञ्च निर्दिश्यताम्–**

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| (क) भर्तुः | ............................... | ................................... |
| (ख) प्राणिभिः | ............................... | ................................... |
| (ग) चातकेभ्यः | .............................. | .................................. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | |
|---|---|---|---|
| (घ) | साधो | ............................... | .................................... |
| (ङ) | मूर्ध्ना | ............................... | .................................... |
| (च) | गर्जितानाम् | ............................... | .................................... |
| (छ) | एभिः | ............................... | .................................... |

**प्र. ६ निम्नलिखितानां तिङ्न्त पदानां धातुः लकारः पुरुषः वचनञ्च पृथक्-पृथक् निर्दिष्यताम्–**

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | दृक्ष्यसि | ........... | ............ | ............ | .............. |
| (ख) | रुणद्धि | ........... | ............ | .............. | ............ |
| (ग) | वक्ष्यति | ........... | ............ | ............. | ............. |
| (घ) | लप्स्यते | ........... | ............ | ............ | .............. |
| (ङ) | जानामि | ........... | ............ | ............ | .............. |
| (च) | मोचयिष्यति | ........... | ............ | ............ | .............. |
| (छ) | रमसे | ........... | ............ | ............ | .............. |
| (ज) | सरति | ........... | ............ | ............ | .............. |

**प्र. ७ अधोलिखितेषु पदेषु प्रकृतिप्रत्ययोः निर्धारणं कुरुत–**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | अधिकारः | ........... | ............ |
| (ख) | जातम् | ........... | ............ |
| (ग) | भोग्यम् | ........... | ............ |
| (घ) | स्थातव्यम् | ........... | ............ |
| (ङ) | निहितम् | ........... | ............ |
| (च) | नीत्वा | ........... | ............ |
| (छ) | शमयितुम् | ........... | ............ |
| (ङ) | दृष्ट्वा | ........... | ............ |

**प्र. ८ अधोलिखितेषु पदेषु धातूपसर्गयोः निर्धारणं कुरुत–**

| | पदम् | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|---|
| (क) | प्रमत्तः | ............... | ................ | .................. |
| (ख) | सन्निपातः | ............... | ................ | .................. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ग) उपनतम् ............... ................ ..................

(घ) विगणयन् ............... ................ ..................

(ङ) सम्भाव्यः. .............. ................ ..................

**प्र. ९ अधस्तनेषु वाक्येषु रेखाङ्कित पदानां शुद्धिं कुरुत-**

(क) यक्षः **भर्तुशापात्** क्षीणप्रभावः आसीत्।

(ख) क्षुद्रोऽपि **मित्रेण** प्राप्ते विमुखः न भवति।

(ग) मेघः **चातकान्** जलं ददाति।

(घ) **सुर्याय** अस्तंगते कमलं न पुष्यति।

(ङ) यक्षः **रामगिरिम्** दुःखेन जीवनं धारयति स्म।

**प्र. १० अधस्तनेषु वाक्येषु प्रश्न निर्माणं कुरुत–**

(क) ..........................................................................?

उत्तर – यक्ष रागगिरि–आश्रमेषु निवसति स्म।

(ख) ..........................................................................?

उत्तर – धूमज्योतिःसलिलमरुतांसन्निपातः क्व मेघः।

(ग) ..........................................................................?

उत्तर – सुखदुःखंचक्रनेमिक्रमेण क्रमशः नीचैरुपरि भवति।

## रचनात्मकं कार्यम्–

पाठस्थितानां पद्यानां मन्दाक्रान्ता छन्दसि सामूहिक सस्वरं गायनस्य शिक्षक सहयोगेन अभ्यासं कुरुत।

### उत्तरमाला

वस्तुनिष्ठात्मकाः प्रश्नाः – १. (ख), २. (क), ३. (ख), ४. (क)

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# षष्ठः पाठः
# चारुत्वं चारुदत्तस्य

अस्य नाट्यांशस्य कथावस्तुनः सम्बन्धः 'शूद्रक'-विरचितस्य 'मृच्छकटिकम्' इति नामधेयस्य प्रकरणस्य प्रस्तावनायां वर्णितस्य नायकस्य चारुदत्तस्य चारित्रिकौदार्येण अस्ति। को नाम शूद्रकः? किं च तस्य स्थितिकालः? मृच्छकटिकम् तस्य कृतिरस्ति नास्ति वा? इत्यादिषु विषयेषु बहुशः विवदमानाऽपि साहित्यसमीक्षा परम्परा स्वीकरोति यत् ईशापूर्वद्वितीयशताब्द्यां उज्जयिन्यां कोऽपि कविः शूद्रको नाम राजा आसीत् 'मृच्छकटिकं' च तस्य नाट्य कृतिरस्ति। रूपकस्य नाटकादिषु दशप्रकारेषु-'मृच्छकटिकं' प्रकरण विधात्मकं रूपकमस्ति। प्रकरणस्य लक्षणानुसारं मृच्छकटिकस्य कथानकं लोकाश्रितं कवि कल्पितञ्च, प्रधानरसः शृङ्गारः नायकश्च उज्जयिन्याः दरिद्र द्विजसार्थवाहः चारुदत्तः अस्ति। द्वे नायकेऽत्र, एका कुलजा घूता अपरा च बसन्तसेना नाम गणिका।

दश-अङ्केषु विभक्तेऽस्मिन् प्रकरणे उज्जयिन्याः गुणमुग्धया गणिकया वसन्तसेनया उदारशीलदरिद्रद्विजचारुदत्तेन सह कृतस्य प्रणयं परिणयञ्च प्रामुख्येन प्रतिपादितम्। अत्रकितवद्यूतकारविटचेटशकारादीनामपि चरित्रं प्रकाशितं। एवं सामाजिकयथार्थचित्रणमाध्यमेन लोकजीवनदर्शनदृष्ट्या प्रकरणमेतत् संस्कृतनाट्यसाहित्ये अनुपमा निधि रूपेण राजते।

पाठोऽयम् मृच्छकटिकस्य नामाख्यस्य प्रकरणस्य, 'अलंकार न्यासः' इति नामकात् प्रथम अङ्कात् गृहीतः। प्रारम्भे आमुखे कृति-कृतिकारकथानकादीनां परिचयपुरस्सरं नटी सूत्रधारयोः हास-परिहासात्मकः संवाद अभिनीतः। अनन्तरं चारुदत्तस्य कृते तस्य मित्रेणं जूर्णवृद्धेन प्रेषितं प्रावारकं स्वीकृत्य विदूषकः-मैत्रेयः उपस्थितः भवति। चारुदत्तस्य मैत्रेयेण सह संवाद भवति। संवादेऽस्मिन् निर्धनता कारणात् सामाजिकजीवनव्यवहार व्यवधानविषये चारुदस्य चिन्ता गुणचारुता च प्रदर्शिता।

**अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः।**
**गुणानुरक्ता गणिका च यस्य बसन्तशोभेव बसन्त सेना।। १।।**
**तयोरिदं सत्सुरतोत्सवाश्रयं नय प्रचारं व्यवहार दुष्टतां**
**खल स्वभावं भवितव्यतां तथा चकार सर्वं किल शूद्रको नृपः।।२।।**

(परिक्रम्यावलोक्य च) अये शून्येयमस्मत्सङ्गीतशाला। क्व नु गताः कुशीलवाः भविष्यन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आ ज्ञातम्।

**शून्यमपुत्रस्य गृहं चिर शून्यं नास्ति यस्य सन्मित्रम्।**
**मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य ।।३।।**

कृतञ्च सङ्गीतकं मया। अनेन चिरसङ्गीतोपासनेन ग्रीष्मसमये प्रचण्डदिनकरकिरणोच्छुष्कपुष्करबीजमिव प्रचलिततारके क्षुधा ममाक्षिणी खटखटायते। तद्यावद् गृहिणीमाहूय प्रच्छामि अस्ति किमिञ्चित्प्रातराशो न वेति।

(नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् ।

| | | |
|---|---|---|
| नटी | : | (प्रविश्य) आर्य इयमस्मि। |
| सूत्रधारः | : | आर्ये स्वागतं ते । |
| नटी | : | आज्ञापयत्वार्यः को नियोगोऽनुष्ठीयतामिति । |
| सूत्रधारः | : | आर्ये (चिरसङ्गीतोपासनेन इत्यादि पठित्वा) आर्ये, अस्ति किमप्यस्माकं गेहेऽशितव्यं न वेति ? |
| नटी | : | आर्य, सर्वमस्ति। |
| सूत्रधारः | : | किं किं अस्ति ? |
| नटी | : | तद्यथा–गुडौदनं घृतं दधिः तण्डुलाः आर्येणात्तव्यं रसायनं सर्वमस्तीति एवं तव देवा आशासन्ताम् । |
| सूत्रधारः | : | किमस्माकं गेहे सर्वमस्तीति। अथवा परिहससि। |
| नटी | : | (स्वगतम्) परिहसिष्यामि तावत् (प्रकाशम्) आर्य अस्त्यापणे । |
| सूत्रधारः | : | (सक्रोधम्) आः अनार्ये, एवं तवाशां छेत्स्यति। अभावं च गमिष्यसि । |
| नटी | : | मर्षतु मर्षत्वार्यः परिहासः खल्वेषः। |
| सूत्रधारः | : | तत्किं पुनरिदं नवमिव संविधानकं वर्तते। एका वर्णकं पिनष्टि, अपरा सुमनसो गुम्फति, इयं च पञ्चवर्ण कुसुमोपहारशोभिता भूमिः। |
| नटी | : | अद्योपवासो गृहीतः । |
| सूत्रधारः | : | किं नामधेयोऽयमुपवासः? |
| नटी | : | अभिरुपपतीनाम् । |
| सूत्रधार | : | आर्ये ! इहलौकिकोऽथवा पारलौकिकः । |
| नटी | : | आर्य पारलौकिकः । |
| सूत्रधारः | : | (सरोषम्) प्रेक्षन्तां प्रेक्षन्तामार्यमिश्राः। मदीयेन भत्तपरिव्ययेन |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पारलौकिको भर्तान्विष्यते।

नटी : आर्य, प्रसीद प्रसीद त्वमेव जन्मान्तरे भविष्यसीति।

सूत्रधारः : अयमुपवासः केन तवोपदिष्टः ।

नटी : आर्यस्येव प्रियवयस्येन जूर्णवृद्धेन ।

सूत्रधारः : (सकोपम्) आ दास्याः पुत्र जूर्णवृद्धः कदा नु खलु त्वां कुपितेन राज्ञा पालकेन नववधूकेशहस्तमिव सुगन्धं छेद्यमानं प्रेक्षिष्ये ?

नटी : प्रसीदत्वार्यः आर्यस्यैव पारलौकिकोऽयमुपवासः (इति पादयोः पतति) ।

सूत्रधारः : आर्ये, उत्तिष्ठ। कथयात्रोपवासे केन कार्यम् ?

नटी : अस्मादृशजनयोग्येन ब्राह्मणेनोपनिमन्त्रितेन ।

सूत्रधारः : अतो गच्छत्वार्या अहमप्यस्मादृशजनयोग्यं ब्राह्मणमुपनिमन्त्रयामि।

नटी : यदार्य आज्ञापयतिं (इति निष्क्रान्ता)

सूत्रधारः : (परिक्रम्य) आश्चर्यम् तस्मात्कथं मयैवं सुसमृद्धायामुज्जयिन्यामस्मादृशजनयोग्यो ब्राह्मणोऽन्वेषितव्यः। एष चारुदत्तस्य मित्रं मैत्रेय इत एवागच्छति। भवतु। प्रक्ष्यामि तावत्। अद्य मैत्रेय, अस्माकं गृहेऽशितुमग्रणीर्भवत्वार्यः।

**( नेपथ्ये )**

(भोः अन्यं ब्राह्मणमुपनिमन्त्रयतु भवान्। व्यापृत इदानीमहम्)

सूत्रधारः : आर्य, सम्पन्नं भोजनं निःसपत्नं च। अपि च दक्षिणापि ते भविष्यति।

**( पुनर्नेपथ्ये )**

भोः इदानीं प्रथमेव प्रत्यादिष्टोऽसि, तत्किं इदानीं ते निर्बन्धः पदे-पदे मामनुरोद्धुं। भवतु। अन्यं ब्राह्मणमुपनिमन्त्रय (इति निष्क्रान्तः)

**( इत्यामुखम् )**

(प्रविश्य प्रावार हस्तः)

मैत्रेय : एष चार्यचारुदत्तस्य प्रियवयस्येन जूर्णवृद्धेन जातीकुसुमवासितः प्रावारकोऽनुप्रेषितः सिद्धीकृतदेवकार्यस्यार्य- चारुदत्तस्योपनेतव्य इति। तद्यावदार्यचारुदत्तं पश्यामि। एष चारुदत्तः सिद्धीकृतदेवकार्यो गृहदेवतानां बलिं हरन्नित एवागच्छति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विदूषक: : (उपसृत्य) एष आर्य चारुदत्त:। तद्यावत्साम्प्रतमुपसर्पामि। (उपसृत्य) स्वस्ति भवते। वर्धतां भवान्।

चारुदत्त: : सर्वकाल मित्रं मैत्रेय प्राप्त: सखे स्वागत। आस्यताम्।

विदूषक: : यद् भवानाज्ञापयति भो वयस्य एष ते प्रियवयस्येन जूर्णवृद्धेन जातीकुसुमवासित: प्रावारकोऽनुप्रेषित:। सिद्धीकृतदेवकार्यस्यार्यचारुदत्तस्य त्वयोपनेतव्य इति (समर्पयति) चारुदत्तो गृहीत्वा सचिन्त: स्थित:।

विदूषक : भो किमिदं चिन्तयते ।

चारुदत्त: : वयस्य

**सुखं हि दु:खान्यनुभूय शोभते**
**घनान्धकारेष्विव दीपदर्शनम्।**
**सुखात्तु यो याति नरो दरिद्रतां**
**धृत: शरीरेण मृत: स जीवति।।४।।**

विदूषक: : भो वयस्य अलं सन्तपितेन। प्रणयिजनसंक्रमित विभवस्यसुरजनपीतशेषस्य प्रतिपच्चन्द्रस्येव परिक्षयोऽपि तेऽधिकतरं रमणीय:।

चारुदत्त: : वयस्य न ममार्थन्प्रति दैन्यं । पश्य।

**एतत्तु मां दहति यद्गृहमस्मदीयं,**
**क्षीणार्थमित्यतिथय: परिवर्जयन्ति।**
**संशुष्कसान्द्रमदलेखमिव भ्रमन्त:,**
**कालात्यये मधुकरा: करिण: कपोलम्।।५।।**

विदूषक: : भो वयस्य एते खलु दास्या: अर्थकल्यवर्ता वरटाभीता: इव गोपालदारका अरण्ये यत्र यत्र न खाद्यन्ते तत्र तत्र गच्छन्ति।

चारुदत्त: : वयस्य

**सत्यं न मे विभवनाशकृतास्तिचिन्ता,**
**भाग्यक्रमेण हि धनानि भवन्ति यान्ति।**
**एतत्तु मां दहति नष्टधनाश्रयस्य**
**यत्सौहृदादपि जना: शिथिली भवन्ति।।६।।**

अपि च –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो**
**निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते ।**
**निर्विण्ण शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते,**
**निर्बुद्धिः क्षयमेत्यहो निर्धनता सर्वापदामास्पदम्।।७ ।।**

विदूषकः : भो वयस्य, तमेवार्थकल्यवर्तं स्मृत्वालं संतापितेन ।

चारुदत्तः : वयस्य कृतो मया गृहदेवताभ्यो बलिः। गच्छ। त्वमपि चतुष्पथे मातृभ्यो बलिमुपहर।

विदूषकः : न गमिष्यामि ।

चारुदत्तः : किमर्थम्

विदूषकः : यत् एवं पूज्यमाना अपि देवता न ते प्रसीदन्ति। तत्को गुणो देवष्वर्चितेषु ।

चारुद८ाः : वयस्य मा मैवम्। गृहस्थस्य नित्योऽयं विधिः।

**तपसा मनसा वाग्भिः पूजिता बलिकर्मभिः।**
**तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः।।८ ।।**

भवतु। तिष्ठ तावत्। अहं समाधिं निवर्तयाभि।

❀ ❀ ❀

## पद्यानामन्वयः–

१ अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः चारुदत्तः किल (आसीत्), बसन्तशोभेव बसन्तसेना (नामिका) गणिका च यस्य गुणानुरक्ता (आसीत्)।

२. तयोः सत् सुरतोत्सवाश्रयं नयप्रचारं, व्यवहारदुष्टतां, खलस्वभावं, तथा भवितव्यतां च सर्वं शूद्रकः (नाटककारः) चकार।

३. अपुत्रस्य गृहं शून्यं, यस्य सन्मित्रं नास्ति (तस्य) चिरंशून्यं, मूर्खस्य दिशः शून्याः, दरिद्रस्य सर्वं शून्यम् (अस्ति)।

४. (मित्र!) घनान्धकारेषु दीपदर्शनं इव दुःखान्यनुभूय हि सुखं शोभते। तु (किन्तु) यो नरः सुखात् दरिद्रतां याति सः शरीरेण घृतः (अपि) मृतः (इव) जीवति।

५. भ्रमन्तः मधुकराः कालात्यये संशुष्कसान्द्रमदलेखं करिणः कपोलम् इव यद् अतिथयः क्षीणार्थमिति अस्मदीयं गृहं परित्यजन्ति, एतत्तु मां दहति।

६. सत्यं विभवनाशकृता मे चिन्ता नास्ति। (यतः) हि घनानि (तु) भाग्यक्रमेण भवन्ति यान्ति (च)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

नष्टधनाश्रयस्य (मम) सौहृदादपि जनाः शिथिली भवन्ति एतत्तु मां दहति।

७. दारिद्र्यात् ह्रियमेति, ह्रीपरिगतः तेजसः प्रभ्रश्यते, निस्तेजाः परिभूयते, परिभवात् निर्वेदमापाद्यते, निर्विण्ण शुचमेति, शोकपिहित बुद्ध्या परित्यज्यते, निर्बुद्धिः क्षयमेति, अहो! निर्धनता सर्वापदामास्पदम्।

८. तपसा, मनसा, वाग्भिः बलिकर्मभिश्चपूजिता देवताः शमिनां नित्यं तुष्यन्ति। (अतः) विचारितैः किं (प्रयोजनम्)।

## शब्दार्थाः टिप्पण्यश्च

**द्विज सार्थवाहः** – वाणिज्यपरः ब्राह्मणः (ब्राह्मण व्यापारी), सार्थं वणिक समूहं वहति नयति इति सार्थवाहः (उपपद समास), द्विजश्च असौ सार्थवाहश्च– द्विजसार्थवाहः (कर्मधारय समास)।

**सुरतोत्सवाश्रयं** – नयप्रचार–आनन्दोत्सवाधारितं नीतिव्यवहारम् (आनन्दोत्सव पर आधारित नीति व्यवहार) सुरतोत्सवं परस्पर प्रगाढप्रेमजन्यआनन्दः एव आश्रयः आधारः यस्य (बहुब्रीहि समास), तादृशं नय प्रचारं नीतिव्यवहारः।

**व्यवहारदुष्टताम्** – विवादविचारसदोषताम् (न्यायालयादि विभिन्नव्यवहार सम्बन्धी विकृतियों को) व्यवहारस्य दुष्टता– व्यवहारदुष्टता तां (षष्ठी तत्पुरुषः समास)।

**खलस्वभाव** – शकारदीनांधूर्तानां–स्वभावम् (इस रूपक में वर्णित शकारादि धूर्त पात्रों के चरित्र–चित्रण के माध्यम से दुष्टों का स्वभाव भी वर्णित है)

**चकार किल्** – निश्चयेन रचितवान् (रचना की है)

**कुशीलवाः** – नटाः (अभिनेता), नटाचारणाश्च कुशीलवाः इत्यमरः।

**अपुणस्य** – पुत्रहीनस्य (पुत्रहीन का) न पुत्रः – अपुत्रः तस्य (नञ् समास)

**सङ्गीतकम्** – नृत्यगीतवाद्यकानां समाहारः (नृत्यगीतवाद्यादि का संयुक्त रूप– नृत्य गीतं तथा वाद्यं सङ्गीतकमुच्यते)

**प्रचण्डदिनकरकिरणो–च्छुष्कपुष्करबीजमिव** – अतितप्तसूर्यकिरणशुष्ककमलबीजमिव (प्रचण्ड सूर्य की तप्त करणों से सुखाये गये कमल बीज के समान)–प्रचण्डः यः दिनकरः (कर्मधारय समास), तस्य किरणैः शुष्कं कृतं पुष्कर बीजम् कमलबीजम् इव (कर्मधारय, तत्पुरुष)

**प्रचालिततारिके** – चञ्चलपुतलिके (चञ्चल पुतलियों वाली)

**ममाक्षिणी** – मम नेत्रौ (मेरी आँखें)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रातराशो** – प्रात:काले करणीयं अल्पाहार (प्रात:कालीन अल्पाहार:)
**गुडौदनम्** – गुडेनमिश्रितम् ओदनम् (गुडमिश्रित भात)
**रसायनम्** – सरसभोज्यम् (सरस भोज्य, पेय इत्यादि)
**नियोग:** – कर्तव्य (करने योग्य कार्य)
**आशितव्यम्** – भोजनयोग्यम् (खोन योग्य), अश् + तव्यत्
**देवा आशासन्ताम्** – प्रसादविषयीकुर्वन्तु (देवता आशीर्वाद प्रदान करें)
**संविधानकम्** – आयोजनम् (कार्यक्रम)
**प्रियवयस्येन** – प्रियमित्रेण (आत्मीय मित्र द्वारा)
**वर्णकम्** – सुगन्धित द्रव्यम्
**व्यापृत:** – कार्यान्तरेषु व्यस्त: (अन्य कार्यों में लगा हुआ)
**प्रत्यादिष्ट:** – निषिद्ध: (मना कर दिया गया है)
**निबर्न्ध:** – दुराग्रह: (बार–बार हठपूर्वक आग्रह)
**आमुख:** – प्रस्तावना (आमुख या प्रस्तावना रूपक का पारिभाषिक शब्द है। आमुख के अन्तर्गत संक्षेपत: कथावस्तु का कथन या सङ्केत किया जाता है। आमुख में सूत्रधार के साथ नट, विदूषक या पारिपार्श्विक पात्रों का संक्षिप्त और नाटकीय संवाद होता है, उस संवाद से ही भावी घटनाओं तथा कथानक की सूचना मिल जाती है। (साहित्य दर्पण ६–३१–६२) प्रस्तावना पाँच प्रकार की होती है उनमें से यहाँ प्रयोगातिशय नामक प्रस्तावना भेद है। प्रयोगातिशय भेद वहाँ होता है जहाँ एक प्रसंग को छोड़कर दूसरा प्रसङ्ग उपस्थित कर दिया जाता है, उसी से पात्र का प्रवेश होता है। यहाँ निमन्त्रण के लिए ब्राह्मण अन्वेषण की घटना से ही चारुदत्त के मित्र मैत्रेय का प्रवेश है)।
**जातिकुसुमवासित:** – जातिनामकपुष्पै: सुगन्धित:
**प्रावारक:** – उत्तरीयं वस्त्रम्
**प्रणयिजनसंक्रमितविभवस्य**– प्रियजनसमर्पितसमृद्धे: (प्रियजनों के लिए अपनी समृद्धि का समर्पण करने वाले आपका)–प्रणयिजनेभ्य: संक्रमितं विभव: येन तादृशस्य चारुदत्तस्य (बहुब्रीहि)
**सुरजनपीतशेषस्य** – देवपानशेषस्य (देवताओं के पी लेने से शेष)
**प्रतिपच्चचन्द्रस्येव** – प्रतिपदाया: तिथे चन्द्रस्येव (प्रतिपदा तिथि के चन्द्र के समान)
**परिक्षयोऽपि** – क्षीणता (चन्द्रस्य पक्षे) निर्धनता वा (चारुदत्तस्य पक्षे)
**भ्रमन्त: मधुकरा:** – इतस्तत: गन्छन्त: भ्रमरा: (इधर उधर दौड़ने हुए भ्रमर)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **कालात्यये** | – | मदजलस्यसमयेव्यतीते (मदजल का समय बीत जाने पर) |
| **संशुष्कसान्द्रमदलेख** | – | शोषप्राप्तसघनदानराजिम् (सूखी हुयी गहरी मदलेखा वाले) संशुष्का सान्द्रा मदलेखा यस्य तादृशं करिणम् (हाथी के कपोल पर उसके ही बहते हुए मदजल से एक रेखा बन जाती है, जिसको मदलेखा, दानराजि, मदपंक्ति आदि नामों से जाना जाता है। मद की न्यूनता होने पर वह मदलेखा सूख जाती है) |
| **क्षीणार्थम्** | – | नष्टधनम् (निर्धन को) क्षीणं अर्थं यस्य तादृशम् (बहुब्रीहि समास) |
| **अर्थकल्यवर्ताः** | – | अर्थाः कल्यवर्ता इव (प्रातःकालीन अल्पाहार के समान अल्पकाल तक ही भोग सुख प्रदान करने वाले तुच्छ–धनादि |
| **वरटाभीता इव गोपालदारकाः** | | –बर्र से डरे हुए ग्वालों के समान |
| **विभवनाशकृता** | – | धनक्षयेण–उत्पन्ना (धन के विनाश से उत्पन्न) |
| **नष्टधनाश्रयस्य** | – | नष्टसमृद्धेः (नष्ट समृद्धि वाले से) धनं एवं आश्रयं यस्य–धनाश्रयः (बहुब्रीहि) नष्टं धनाश्रयं यस्य तादृशस्य (बहुब्रीहि समास) |
| **सौहृदादपि** | – | मैत्रीभावादपि (मित्रता से भी) |
| **शिथिली भवन्ति** | – | विमुखाः भवन्ति (मुँह मोड़ लेते हैं) |
| **दारिद्र्याद्ध्रियमेति** | – | निर्धनत्वात् ह्रियं लज्जां एति प्राप्नोति (निर्धनता से लज्जित होता है) |
| **ह्रीपरिगतः** | – | लज्जितः–ह्रिया परिगतः (तृतीया तत्पुरुष) |
| **तेजसः** | – | आत्मप्रतापात् प्रभावात् वा (आत्म तेज से अथवा स्वाभिमान भाव से) |
| **प्रभ्रश्यते** | – | प्रभ्रष्टो भवति, निस्तेजः भवति इत्यर्थः (तेजहीन हो जाता है) |
| **परिभूयते** | – | तिरस्क्रियते–(तिरस्कृत हो जाता है)। |
| **परिभवात्** | – | तिरस्कारात् (तिरस्कार से) |
| **निर्वेदम्** | – | ग्लानिम् (ग्लानि को) |
| **आपाद्यते** | – | प्राप्नोति (प्राप्त करता है) |
| **निर्विण्णः** | – | ग्लानि प्राप्तः– (निर् + विद् + क्त) |
| **शोकपिहितः** | – | शोकयुक्तः |
| **सर्वापदामास्पदम्** | – | सर्वासां विपदां कारणम् (सभी प्रकार की आपदाओं का स्थान या कारण) |
| **वाग्भिः** | – | वचनैः स्तुति पाठैः वा (स्तुतियों से), वाक् तृतीया बहुवचनम्। |
| **बलिकर्मभिः** | – | पूजोपचारैः (पूजा के कार्यों तथा साधनों से) |
| **शमिनाम्** | – | शान्तचित्तानां (शान्ति से युक्त चित्तवालों का) |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

(१) दरिद्रस्य कृते शून्यं अस्ति–
(क) गृहं (ख) दिशं
(ग) नगरं (घ) सर्वम् ( )

(२) अवन्तिपूर्यां गणिका आसीत् –
(क) वसन्त सेना (ख) रदनिका
(ग) मदनिका (घ) धूता ( )

(३) चारुदत्तस्य मित्रम् आसीत्
(क) माढव्यः (ख) वसन्तकः
(ग) मैत्रेयः (घ) स्थावरकः ( )

(४) जूर्णवृद्धेन कस्य कृते जातीकुसुमवासितः प्रावारको प्रेषितः–
(क) विदूषकस्य (ख) चारुदत्तस्य
(ग) शर्विलकस्य (घ) सूत्रधारस्य ( )

(५) सुखं कम् अनुभूय शोभते –
(क) दुःखम् (ख) संतोषम्
(ग) ग्रीष्मम् (घ) लाभम् ( )

### अतिलघूत्तरात्मकाः प्रश्नाः–

(१) दरिद्र ब्राह्मणस्य किं नाम?
(२) चारुदत्तः कुत्र निवसति स्म?
(३) जूर्णवृद्धेन चारुदत्तस्य कृते किं प्रेषितम्?
(४) कः जनः धृतः शरीरेण मृतवत् जीवति?
(५) सर्वापदां स्थानम् किम् ?

### लघूत्तरात्मकाः प्रश्नाः–

(१) वसन्तसेना कं स्नेहं करोति ?
(२) केन विना गृहं शून्य भवति ?
(३) कालात्यये संशुष्कसान्द्रमदलेखेव के करिणः कपोलम् परिवर्जयन्ति ?
(४) घनान्धकारे कस्य दर्शनम् शोभते ?
(५) नष्ट धनाश्रयस्य जनाः कस्मात् भावात् शिथिलीभवन्ति ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अधोलिखित प्रश्नानां उत्तरं विस्तरेण लिखत–**

१. सुखं हि दु:खान्यनुभूय शोभते, घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु याति यो नर: दरिद्रतां:, धृत: शरीरेण मृत: स जीवति।।
अस्य पद्यस्य व्याख्यां कुरुत।

२. चारुदस्य दरिद्रता–विषये विचारान् लिखत ?

३. अहो निर्धनता सर्वापदामास्पदम्? पङ्क्त्या: भावं सोदाहरणं लिखत।

**व्याकरण प्रश्ना: –**

**(१) अधोलिखित शब्दानां सन्धिविच्छेद कृत्वा नामोल्लेखं कुरुत–**

| | पदम् | सन्धि विच्छेद: | नाम: |
|---|---|---|---|
| (क) | गुणानुरक्ता | ...............+................ | ....................... |
| (ख) | शोभेव | ...............+................ | ....................... |
| (ग) | सुरतोत्सवाश्रयम् | ...............+................ | ....................... |
| (घ) | एषोऽस्मि | ...............+................ | ....................... |
| (ङ) | खल्वेष: | ...............+................ | ....................... |
| (च) | कुसुमोपहार: | ...............+................ | ....................... |
| (छ) | मयैव | ...............+................ | ....................... |

**(२) अधोलिखित शब्दानां समास विग्रहं कृत्वा नामोल्लेखं कुरुत–**

| | समस्त पदम् | समास विग्रह: | नाम: |
|---|---|---|---|
| (क) | गुणानुरक्ता: | ....................... | ....................... |
| (ख) | गुडौदनं | ....................... | ....................... |
| (ग) | कुसुमोपहार: | ....................... | ....................... |
| (घ) | जातीकुसुमवासित: | ....................... | ....................... |
| (ङ) | दु:खान्यनुभूय | ....................... | ....................... |
| (च) | विभवनाश: | ....................... | ....................... |
| (छ) | सर्वापदामास्पदम् | ....................... | ....................... |
| (ज) | गृहदेवताभ्य: | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(३) अधोलिखितशब्दानां उपसर्ग-प्रकृति-प्रत्ययः लिखत–

| | शब्दः | उपसर्गः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|---|
| (क) | उपदिष्टः | ...................... | ...................... | ...................... |
| (ख) | संवृत्तः | ...................... | ...................... | ...................... |
| (ग) | प्रविश्यः | ...................... | ...................... | ...................... |
| (घ) | उपनेतव्यः | ...................... | ...................... | ...................... |
| (ङ) | अन्वेषितव्य | ...................... | ...................... | ...................... |
| (च) | निर्दिष्टः | ...................... | ...................... | ...................... |
| (छ) | परिक्रम्य | ...................... | ...................... | ...................... |
| (ज) | निर्विण्णः | ...................... | ...................... | ...................... |
| (झ) | परिगतः | ...................... | ...................... | ...................... |

(४) अधोलिखित शब्दानां विभक्तिः वचनञ्च लिखत–

| | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | मया | ...................... | ...................... |
| (ख) | गेहे | ...................... | ...................... |
| (ग) | तव | ...................... | ...................... |
| (घ) | केन | ...................... | ...................... |
| (ङ) | वृद्धेन | ...................... | ...................... |
| (च) | मित्रम् | ...................... | ...................... |
| (छ) | वाग्भिः | ...................... | ...................... |
| (ज) | अस्माद् | ...................... | ...................... |
| (झ) | तेषु | ...................... | ...................... |

(५) अधोलिखितधातूनां लकार-पुरुष-वचनञ्च लिखत–

| | पदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) | पृच्छामि | ...................... | ...................... | ...................... |
| (ख) | अस्ति | ...................... | ...................... | ...................... |
| (ग) | हसिष्यामि | ...................... | ...................... | ...................... |
| (घ) | छेत्स्यति | ...................... | ...................... | ...................... |
| (ङ) | पतति | ...................... | ...................... | ...................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(च) शोभते ..................... ..................... .....................
(छ) पश्य ..................... ..................... .....................
(ज) गच्छन्ति ..................... ..................... .....................
(झ) तिष्ठ ..................... ..................... .....................

**(६) अधोलिखित-अव्ययानां प्रयोगं कृत्वा वाक्य निर्माणं कुरुत–**

| अव्यय: | | वाक्यम् |
|---|---|---|
| (क) | किल | ........................................................................ |
| (ख) | कदा | ........................................................................ |
| (ग) | नु | ........................................................................ |
| (घ) | अपि | ........................................................................ |
| (ङ) | एव | ........................................................................ |
| (च) | अध: | ........................................................................ |
| (छ) | तावत् | ........................................................................ |
| (ज) | भो | ........................................................................ |

**(७) अधोलिखित वाक्यानां शुद्ध रूपं पुन: लिखत–**

१. ........................................................................

स्वस्ति भवान्।

२. ........................................................................

अलं सन्तापस्य ।

३. ........................................................................

वयस्य न मम अर्थस्य प्रति दैन्यम्।

४. ........................................................................

त्वम् गच्छतु।

५. ........................................................................

एष आर्य चारुदत्त:।तावत् अहं उपसर्पति।

उत्तरमाला–

वस्तुनिष्ठात्मका: प्रश्ना: –१. घ २. क ३. ग ४. ख ५. क

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# सप्तमः पाठः
# नन्दिनी कथा

(रघुवंशमहाकाव्यम्-द्वितीयसर्गाधारितम्)

महाकविः कालिदासः संस्कृतसाहित्ये अप्रतिमकवि रुपेण आद्रियते। कवेरस्य स्थितिः काल ख्रीस्तपूर्वप्रथमशताब्दौ स्वीक्रियते। कविरस्य जन्मस्थान-वंश-जीवनविषये विद्वांसः विवदमानाः अपि जनश्रुतिभिः, अनुमानैः, तस्य रचनासाक्ष्यैश्च स्वीकुर्वन्ति यत् कवेरस्य जन्मः ब्राह्मणवंशेऽभवत्, उज्जयिनी तस्य वासभूमिरासीत्। महाकविरयं भारतीयसंस्कृति-साहित्य-जीवन्दर्शनानाञ्च प्रतिनिधिकविरूपेण राजते।

कालिदासस्य काव्ये काव्योचितभावगाम्भीर्यं - प्रेमाभिव्यक्ति-प्रकृतिचित्रणं - शास्त्रोचित भव्यतौदार्यं रसछन्दालङ्कारादीनि काव्यकलानिकषानि प्रतिमानानि च अतिशयेन फलितानि। कालिदासः वैदर्भी-रीति-प्रयोगेऽन्यतमः, उपमाऽर्थान्तरन्यासालङ्कार प्रयोगे तस्य प्रतिभा वैलक्षण्यं स्वीकुर्वद्भिः समीक्षकैः तस्य प्रशस्ति-'उपमाकालिदासस्य' इत्याभाणकेन स्वीकृता। अयं कविः विद्वद्समाजे 'कविताकामिनीविलासः', 'दीपशिखा' इत्यादिभिः उपाधिभिः बहु सम्मानितास्ति। किं बहुना तस्य विलक्षण-वर्णननैपुण्यं अद्भुताञ्च काव्यशैलीं संवीक्ष्य एव समीक्षकैः उच्यते यत्-

**पुरा कवीना गणनाप्रसङ्गे कनिष्ठिकाधिष्ठतः कालिदासः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती वभूव ।।**

अस्य महाकवेः साम्प्रतं सप्त रचनाः समुपलभ्यन्ते। (क) महाकाव्यद्वयं- (१) रघुवंशम् (२) कुमारसंभवम्। (ख) नाट्यग्रन्थाः त्रयः- (३) अभिज्ञानशाकुन्तलम् (४) विक्रमोर्वशीयम् (५) मालविकाग्निमित्रम् (ग) गीतकाव्यद्वयम्- (६) मेघदूतम् (७) ऋतु संहारम्।

एकोनविंशति-सर्गात्मकं रघुवंशमहाकाव्यं कालिदासस्य महत्तमं महाकाव्यम्। कालिदासस्य कवित्व-प्रतिभा-भारतीयसंस्कृतेरभिव्यक्तिश्च यादृशीरघुवंशे तादृशी अन्यत्र दुर्लभैव। अस्य ग्रन्थस्य वैलक्षण्यादेव कविरयं 'रघुकारः' इति नाम्ना विश्रुतः।

अस्य पाठस्य मूल स्रोतः रघुवंशमहाकाव्यस्य द्वितीयसर्गे वर्णिता रघुवंशप्रदीपस्य दिलीपस्य गोसेवावृत्तस्य कथानकमस्ति। सन्तानहीनो स भूपतिः स्वकुलगुरोः वशिष्ठस्य आदेशात् कामधेनोः पुत्र्याः नन्दिन्याः सेवां कृतवान्। तस्यैव कृपया रघुनामकं पुत्रं लब्धवान्। उपाख्यानेऽस्मिन् अस्माकं देशे शासकानां गोभक्तिः, तपोवृत्तिः सांस्कृतिक मूल्यान् प्रति श्रद्धाश्च वर्णिताः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आसीत् पयोधिपर्यन्तपृथ्वीप्रशासकः इक्ष्वाकुवंशोद्भवः लोकललामः दिलीपो नाम भूपतिः, मगधराजपुत्री सुदक्षिणा तस्य सहधर्मचारिणी चासीत्। कुलगुरुवशिष्ठस्य त्रिकालदर्शिनः परामर्शं प्रसादमेति मत्वा सन्तानहीनो स सम्राट् पुत्रप्राप्तीच्छया कामिन्यासुदक्षिणया सह–आत्मानं कामधेनुप्रसूतेः नन्दिन्याः सेवायां नियोजितवान्।

एकदा प्रभाते गुरोराज्ञया स प्रजाधिपः गन्धमाल्यादिभिः स्वपत्न्या सम्पूजितां पीतप्रतिबद्धवत्सां तां धेनुं वनाय मुक्तवान्। पवित्रपांसुमार्गमनुगच्छतां दयितां निवर्त्य धीरः स नृपः शरीररक्षार्थमनुयायिवर्गमपि न्यषेधयन् एवं उक्तवान्–

**न चान्यतस्तस्य शरीर रक्षा स्ववीर्य गुप्ता हि मनोप्रसूतिः।**

नन्दिन्यनुचरो स सम्राट् विविधैः तत्सन्तुष्टिकरैरुपायैः तस्याः सपर्यायामनुरक्तो अभवत्। स कदाचित् रसवद्भिः तृणैः कदाचित् कण्डूयनैः दंश निवारणैः स्वच्छन्दगमनैश्च तां सेवितवान्। भूपतिरसौ जातः पूर्णानुचरो नन्दिनी व्यवहाराणां। तद्यथा–

**स्थितः स्थितामुच्चलितः प्रयातां,**
**निषेदुषीमासनबन्धधीरः।**
**जलाभिलाषी जलमाददानां,**
**छायेव तां भूपतिरन्वगच्छत्।।**

सा नन्दिनीं प्रतिदिनं दिवसपर्यन्तम् स्वपरिभ्रमणेन दिगन्तराणि पूतानि विधाय सायंकाले वशिष्ठाश्रमं प्रत्यावर्तमाना अपि तेन मध्यमलोकपालेनानुगता धर्मानुष्ठानतोषिता साक्षात् श्रद्धेव शोभते स्म। राज्ञः धर्मपत्न्यपि वशिष्ठधेनोरनुयायिनं तं वनान्तात् आवर्तमानं निर्निमेषलोचनाभ्यामवलोकयन्ती तृप्तिं न लेभे। अहो दिव्यमेतत् दृश्यं भवति स्म तदानीं प्रत्यावर्तनकालस्य–

**पुरस्कृता वर्त्मनि पार्थिवेन,**
**प्रत्युद्गतापार्थिवधर्मपत्न्याः।**
**तदन्तरे सा विरराजधेनुः**
**दिनक्षपामध्यगतेव सन्ध्या।।**

साक्षतपात्रहस्ता सुदक्षिणा प्रतिसायं प्रत्युद्गतां तां प्रणम्यार्थसिद्धेः द्वारमिवास्याः शृङ्गान्तरं पूजयति स्म। सा पयस्विन्यपि स्तिमिता सती तां सपर्यां स्वीकरोति स्म। भक्त्योपपन्नेषु तद्विधानां प्रसाद चिह्नानि पुरःफलानि भवन्तीति मत्वा तौ दम्पती परमानन्दमलभेताम्। सान्ध्यविधिं समाप्य तौ प्रतिदिनं दोहावसाने निषण्णां तां दोग्ध्रीं प्रतिदिनं असेवेताम्। रात्रावपि तामन्तिकन्यस्तबलिप्रदीपां सम्पूज्य गृहिणीसहायः दिलीपः समुपविष्टां तामनूपविश्य क्रमेण यथाक्रमं सुप्तां शयनमभजत्। प्रातःकाले सुप्तोत्थितायां तस्याम् उत्थितवान्। इत्थं प्रजार्थं गोसेवावृत्तं पालयतः करुणावतारस्य तस्य धीरस्यैकविंशति दिनानि व्यपगतानि।

द्वाविंशे दिने सा मुनिहोमधेनुः आत्मानुचरस्यभावं जिज्ञासमाना हिमालयगुहायां प्रविष्टवती। नन्दिनी मनसापि हिंस्रैः न कदापि दमनीया इत्यवगत्य स राजा अद्रिशोभादर्शने तत्परोऽभवत्। तदन्तरे अलक्षिताभ्युत्पतनः मृगेन्द्रैकः तां नन्दिनी बलादाकृष्य वधाय प्रवृत्तः। तदाक्रान्दितं श्रुत्वा नगेन्द्रासक्तां



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दृष्टिमाकृष्य स राजा यदा गां विलोकयति स्म तदा गविस्थितमेकं केसरिणमपश्यत्।

सहसा शरण्यः स मृगेन्द्रगामी मृगेन्द्रवधाय निषङ्गाच्छरमुद्धर्तुमैच्छत्। तस्य दक्षिणकरसायकपुङ्खेसक्ताङ्गुलिः अभवत्। विबृद्धमन्युः स धनुर्धरः पुरःस्थितमप्यागस्कृतं न किंचिदपि कुर्वाणो स्वतेजोभिरन्तः अतप्यत्। तं सिंहोरूसत्वं विस्मितं विस्मापयन् सिंहः मनुष्यवाचा एवमुक्तवान् –



**अलं महीपाल! तव श्रमेण,**
**प्रयुक्तमप्यस्तिमितोवृथा स्यात्।**
**न पादपोन्मूलन शक्ति रहः**
**शिलोच्चये मूर्च्छति मारुतस्य।।**

पुनश्च पुरोदृश्यमाणमेकं देवदारुं प्रति सङ्केतं विधाय सिंहोपुनरवदत् यत् अहं भगवतावृषभध्वजेन पुत्रीकृतस्यास्य देवदारोः सुरक्षार्थं अङ्कागतसत्ववृत्तिः सिंहत्वं विधाय नियुक्तः कुम्भोदरनामः अष्टमूर्तेः किङ्करोऽस्मि। एषा मम बुभुक्षितस्य तृप्त्येव परमेश्वरेणोपस्थापिता। राजन्! गुरुंप्रति दर्शितशिष्यभक्तिर्भवान् लज्जां विहाय निवर्तस्व यतोहि कृते प्रयत्ने शस्त्ररक्ष्यस्य रक्षणे विफले जातेऽपि शस्त्रभृतां यशः न क्षिणोति। एवं मृगाधिराजस्य प्रगल्भं वचो निशम्य सः पुरुषाधिराजः पुनरुवाच– हे! मृगेन्द्र। सत्यम् चराचराणां सर्गस्थितिप्रत्यवहारहेतोर्भगवतः शिवस्य शासनं मयाऽपि शिरसा धार्यः किन्तु मम गुरोः घनेदमपि नोपेक्षणीयमिति मन्ये। अस्त्येकरुपायः आवयोरुभयोः ध्येयसिद्धेः। तच्चास्ति, यत् भवान् दिनावसानोत्सुकबालवत्सां गामिमां विसृज्य विकल्पेन मदीयेन देहेन स्ववृत्तिं साधयतु। एतत् श्रुत्वा किञ्चित् विहस्य निर्मितभीतिः स भूतेश्वरपार्श्ववर्ती पुनरुक्तवान्–



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**एकातपत्रं जगतः प्रभुत्वं,**
**नवं वयः कान्तमिदं वपुश्च ।**
**अल्पस्य हेतोर्बहुहातुमिच्छन्,**
**विचारमूढः प्रतिभासि मे त्वम् ।।**

अन्यच्च प्रजानाथ। प्राणिपरित्राणभावादपि प्राणोत्सर्गः त्वया नोचितः यतो हि तव नाशे सति गौरेका स्वस्तिमती भवेत् परं जीविते सति तु भवान् असंख्यप्रजानां संरक्षको भविष्यतीति। कोटिशः धेनुददता भवता गुरुक्रोधोऽपि अपनेयोऽस्ति। स्वर्गोपमे ते राज्ये भूतले सति त्वया स्वर्गकामना पुनः कथं नु करणीया? अतो हि रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम्। निशम्येतत् देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच–

**क्षतात् किल त्रायत इत्युदग्रः,**
**क्षत्रस्य शब्दः भुवनेषु रूढः।**
**राज्येन किं तद्विपरीत वृत्तेः**
**प्राणैरूपक्रोशमलीमसैर्वा ।।**

अन्यच्च मृगेन्द्र। रुद्रौजसा भवता आक्रान्तेयं सौरभेयी। नास्याः कोऽपि विकल्पः गुरोः क्रोधोऽपनेतुम्। तद् भवानेव आत्मवत् सेवकस्य पारतन्त्र्यं विचार्य एकान्तविध्वंसिनं मदीयं शरीरं स्वीकृत्य मे यशःशरीरे दयालु भव। एवं बहुशः प्रणयवचोभिः प्रार्थितः स सिंहः राज्ञः प्रस्तावं स्वीकृतवान्। तदा न्यस्तशस्त्रः भूपालः स्वदेहं आमिषपिण्डमिव हरये समर्पितवान् तस्योग्रमाक्रमणं च प्रतीक्षते स्म। तदन्तरे अधोमुखस्य प्रजावत्सलस्योपरि विद्याधरैः मुक्त हस्तैः सुमनवृष्टिः कृता। नन्दिन्यपि उक्तवती– उत्तिष्ठ, वत्स! उत्तिष्ठ निशम्येतत् अमृतायमानं वचः उत्थितः सन् राजा स्वामग्रतः जननीमिव गामेवापश्यत् न तु सिंहम्। तं विस्मितं धेनुरुवाच साधो! अलं चिन्तया मयैव कपट सिंहत्वं कल्पयित्वा तव परीक्षार्थमेतत् सर्वं कृतं, नास्त्यत्र कोऽपि भूतार्थः। प्रीतास्म्यहं ते गुरौ भक्त्या मय्यनुकम्पया च। वरं वृणीस्व। राजा वंशस्य कर्तारमनन्तकीर्ति तनयं च सुदक्षिणायां ययाचे।

तथैवेति प्रतिश्रुत्य सा कामदुधा तमाज्ञापितवती यत् पुत्राभिलाषी त्वं मदीयं पयः पत्रपुटे दुग्ध्वा पिब। एवं तयादिष्टः सः सविनयं पुनरुवाच–

**वत्सस्य होमार्थ विधेश्चशेष-**
**मृषेरनुज्ञामधिगम्य मातः।**
**उधस्यमिच्छामि तवोपभोक्तुं**
**षष्ठांशमूर्व्या इव रक्षितायाः।।**

एवं विज्ञापिता सा पयस्विनी प्रीतितरा जाता। तदा उभावेव गौरीगुरोगह्वराद् सानन्दं वशिष्ठाश्रमं प्रत्यागतौ। ज्ञातवृत्तस्य गुरोरनुमतिमधिगम्य सद्वत्सलो स राजा वत्सहुतावशेषं नन्दिनी– पयः प्रीत्या पीतवान्। अपरेद्यु वशी वशिष्ठः सपत्नीकं तं राजधानीं प्रति प्रस्थापयामासः एवं सुखेन राज्यधुरं धारयतः तस्य प्रजापालकस्य जायायां नन्दिनीप्रसादात् रघोरुदारशीलस्य पुत्रस्य जन्मः अभवत्। धन्येयं संस्कृतिः गोसम्वर्द्धिनी। धन्यास्ते भूपालाः तयोः समुपासकाः।

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## पद्यानामन्वयः

१. भूपतिः तां स्थितां स्थितः (सन्) प्रयाताम् उच्चलितः (सन्) निषेदुषीम् आसनबन्धधीरः जलम् आददानाम् जलाभिलाषी (सन्) छाया इव अन्वगच्छत्।

२. वर्त्मनि पार्थिवेन पुरस्कृता, पार्थिवधर्मपत्न्या प्रत्युद्गता सा धेनुः तदन्तरे दिनक्षपामध्यगता सन्ध्या इव विरराज।

३. महीपाल ! तव श्रमेण अलं, इतः प्रयुक्तं अपि अस्त्रम् वृथा स्यात्। हि पादपोन्मूलनशक्ति मारुतस्य रहः शिलोच्चये न मूर्च्छति।

४. एकातपत्रं जगतः प्रभुत्वं नवं वयः इदं कान्तं वपुश्च (इत्येव) बहु अल्पस्य हेतोः हातुम् इच्छन् त्वम् मे विचारमूढः प्रतिभासि।

५. उदग्रः क्षत्रस्य शब्दः क्षतात् त्रायते इति भुवनेषु रुढः (अस्ति) किल तद्विपरीत वृत्तेः जनस्य राज्येन किं उपक्रोशमलीमसैः प्राणैः वा किम्।।

६. हे मातः ! वत्सस्य होमार्थविधेश्च शेषं तव उधस्यं रक्षितायाः ऊर्व्याः षष्ठांशमिव ऋषे अनुज्ञाम् अधिगम्य उपभोक्तुम् इच्छामि।

## शब्दार्थाः टिप्पण्यश्च

**पयोधिपर्यन्तपृथ्वीप्रशासकः** – सागरं यावत् विस्तीर्णां धरित्र्याः समर्थः राजा (सागर तक फैली हुयी पृथ्वी का सक्षम सार्वभौम सम्राट)

**लोकललामः** – भुवनश्रेष्ठः (लोक में श्रेष्ठ) लोकेषुललामः (षष्ठी तत्पुरुषः)

**सहधर्मचारिणी** – धर्मपत्न्या सह, धर्मं चरतीत्यर्थे, सह + धर्म + चर् + णिनि प्रत्यय।

**कामधेनुप्रसूतेः** – कामधेनोः सन्ततिः (कामधेनु नामक गाय की सन्तान अथवा पुत्री)

**गन्धमाल्यादिभिः** – चन्दनमालादिभिः पूजनद्रव्यैः (चन्दनमालादि पूजन उपचारों से)

**पवित्रपांसुमार्गमनुगच्छता** – पवित्ररेणुमार्गप्रचलिताम् (पवित्र धूल वाले मार्ग में अनुगमन करते हुए), पवित्रा पांसवः यस्य तं मार्गम् अनुगच्छताम् (बहुव्रीहि समासः)

**दयिताम्** – प्रियां भार्यां सुदक्षिणाम् (आत्मीया पत्नी सुदक्षिणा को)

**निवर्त्य** – परावर्त्य (लौटाकर) निर् +वृत् + ल्यप्।

**धीरः** – धैर्ययुक्तः मनस्वी वा (जो विपरीत परिस्थितियों में भी अपने कर्तव्य में उत्साहित रहता है, उसे धीर कहते हैं)।

**अनुयायिवर्गम्** – सेवकसमूहम् (सेवक समुदाय को), अनुयान्तीति अनुयायिनः, तेषां वर्गः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **मनो:प्रसूति:** | – | मनो: नामकस्य आद्यस्य राज्ञ: सन्तति: मनुष्य: इत्यर्थ। |
| **स्ववीर्यगुप्ता** | – | स्वपराक्रमसंरक्षिता (अपने स्वयं के पुरुषार्थ से संरक्षित) |
| **नन्दिन्यनुचर:** | – | नन्दिन्या: सेवक: (नन्दिनी का सेवक) |
| **सम्राट्** | – | सार्वभौमराजा (सम् + राज् +क्विप् प्रत्यय) शास्ति यश्चाज्ञया राज्ञ: स: |
| **सपर्यायाम्** | – | सेवायाम् (सेवा में) |
| **कण्डूयनै:** | – | खर्जनै: (खुजलाने के द्वारा) कण्डू + यक् +ल्युट् + तृतीया बहुवचन। |
| **दंशनिवारणै:** | – | वनमक्षिकादिदूरीकरणै: (पशु को काटने वाले बड़े मच्छर आदि को भगाकर) |
| **प्रयातां** | – | प्रस्थिताम् (प्रस्थान करने वाली को) प्र + या + क्त + टाप् |
| **निषेदुषीम्** | – | उपविष्टाम् (आरामपूर्वक बैठी हुयी को) नि + सद् + क्वसु +ङीप् |
| **प्रत्यावर्तमाना** | – | प्रत्यागच्छमाना (लौटती हुयी) प्रति + आ + वृत् + शानच् + टाप् |
| **मध्यमलोकपालेन** | – | पृथ्वीपालकेन (सात ऊर्ध्व लोक तथा सात अधोलोकों वाले चतुर्दशलोकात्मक भुवन मण्डल में पृथ्वी लोक मध्यम लोक है)। |
| **र्निनिमेषलोचनाभ्याम्** | – | अपलकनेत्राभ्याम् (अपलक नेत्रों से) निर्गतानि निमेषानि ययो: ते लोचने (बहुब्रीहि समास) ताभ्याम्। |
| **वर्त्मनि** | – | मार्गे (मार्ग में) वर्त्मन् शब्द, सप्तमी एकवचन। |
| **पार्थिवेन** | – | पृथ्वीपालकेन (पृथ्वीपालक राजा द्वारा) पृथिवी + अण् = पार्थिव:। |
| **पुरस्कृता** | – | अग्रेकृता (आगे की गयी) |
| **प्रत्युद्गता** | – | स्वागतार्थम् अग्रत: आगत्य आदृता (स्वागतार्थ आदरपूर्वक अगवानी की गयी)। |
| **दिनक्षपामध्यगतेवसन्ध्या** | – | दिनरात्रिमध्यप्राप्ता सन्ध्या इव (दिन और रात के बीच में उपस्थित सन्ध्या के समान) (दिनश्चरात्रिश्च) तयो: मध्यगता सन्ध्या इव। |
| **विरराज** | – | सुशोभितवती (सुशोभित हुई) वि+राज्, लिट्, प्रथम पुरुष, एकवचन। |
| **साक्षतपात्रहस्ता** | – | अक्षतादिपूजनोपकरणपात्रहस्ता (अक्षत-चावल, कुंकुम आदि पूजनसामग्री के पात्र से युक्त हाथ वाली), सुदक्षिणा इत्यभिप्राय:। |
| **पयस्विनी** | – | प्रशस्तदुग्धा (विशुद्ध गुणकारीदूधदेने वाली) पयस् + विनि +ङीप् (ई) |
| **स्तिमिता** | – | निश्चला (निश्चला होकर), स्तिम्+ क्त (त)+ इडागम (इ) + टाप् (आ) |
| **भक्त्योपपन्नेषु** | – | भक्त्या अनुराग युक्तेषु (पूज्य जनों के प्रति अनुराग युक्त जनों के विषय में) उपपन्नेषु= उप + पद् + क्त + सप्तमी, बहुवचन। |
| **प्रसादचिह्नानि** | – | प्रसन्नताचिह्नानि (प्रसन्नता सूचक चिह्न) |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **पुरःफलानि** | – | अभीष्टफलप्राप्तिसूचकानि (यथेष्ट फलप्राप्ति के सूचक) |
| **निषण्णाम** | – | सुखोपविष्टाम् (सुखपूर्वक बैठी हुयी), नि+ सद् +क्त + टाप् । |
| **दोग्ध्रीम्** | – | दोहनशीलाम् (दोह ली गयी)–दुह्+ तृच् (तृ)+ ङीप् (ई) |
| **तामन्तिकन्यस्तबलिप्रदीपा** | – | समीपस्थस्थापित पूजोपहारदीपाम् तां नन्दिनीम् (जिसके पास पूजा की सामग्री एवं प्रज्वलित दीपक तथा भोज्य पदार्थ रखे गये हैं), अन्तिकं न्यस्ताः बलिप्रदीपाः यस्याः ताम् नन्दिनीम् (बहुव्रीहि समास) |
| **गृहिणीसहायः** | – | पत्नीसहायः (पत्नी के साथ) गृहिणी सहाया यस्य (बहुब्रीहि)। |
| **व्यपगतानि** | – | व्यतीतानि (व्यतीत हो गये)। |
| **आत्मानुचरस्य भावम्** | – | स्वसेवकस्य निष्ठाम् (अपने सेवक की निष्ठा को) |
| **जिज्ञासमाना** | – | ज्ञातुम् इच्छन्ती (जानने की इच्छा करती हुयी), जिज्ञास +शानच्। |
| **दमनीया** | – | आक्रमण योग्या (आक्रमण करने योग्य) |
| **अवगत्य** | – | विचार्य (सोचकर), अव + गम् + ल्यप्। |
| **अद्रिशोभादर्शने** | – | पर्वतस्य सुषमा अवलोकने (पर्वत की सुन्दरता देखने में) |
| **अलक्षिताभ्युत्पतनः** | – | अदृष्टाभिमुखाक्रमणः (जिसके सामने से किये गये आक्रमण का पता ही नहीं चला), अलक्षितः अभ्युत्पतनः यस्य तादृशः सिंहः। |
| **आक्रन्दितम्** | – | आर्तनादम् (करुणाभरी चीत्कार को)। |
| **नगेन्द्रासक्ताम्** | – | पर्वतसंलग्नाम् (पर्वत पर टिकी हुयी), नगानां पर्वतानां इन्द्रः, नगेन्द्रः हिमालयः इत्यर्थः तस्मिन् आसक्तां संलग्नाम् (दृष्टेः विशेषणम्) |
| **शरण्यः** | – | शरणागतवत्सलः (शरणागत के लिए कोमल हृदय) |
| **मृगेन्द्रगामी** | – | सिंहवत् गमनशीलः (सिंह के समान चाल वाला) |
| **निषङ्गाद्** | – | तूणीराद् (तरकस से) |
| **उद्धर्तुम्** | – | निष्कासयितुम् (निकालने के लिए) उत् + हृ + तुमुन्। |
| **सायकपुङ्खे** | – | बाणमूले (बाण की जड़ में) |
| **सक्ताङ्गुलिः** | – | संलग्नाङ्गुलिः (चिपकी हुयी उँगलियों वाला) |
| **विवृद्धमन्युः** | – | समुद्दीप्तक्रोधः (बढ़े हुए क्रोध वाला) |
| **आगस्कृतम्** | – | अपराधिनम् (अपराधी को), आगं अपराधं करोति इति आगस्कृत् । |
| **स्वतेजोभिः** | – | आत्मदीप्त्यैः (अपने अन्त तेज से), तेजस् तृतीया बहुवचन। |
| **सिंहोरूसत्त्वम्** | – | सिंहेवविपुलमनोबलशीलम् (सिंह के समान अपराजेय मनोबल से युक्त) सिंह इव उरु विपुलं सत्त्वं मनोबलं यस्य तादृशं दिलीपम्। |
| **महीपालः** | – | भूपालः (राजा), महीं पालयतीति महीपालः (उपपद समास)। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**पादपोन्मूलनशक्तिरहः** – बालवृक्षोत्खननशक्तिवेगः (छोटे वृक्षों को उखाड़ने की शक्ति से युक्त वेग वाला), पादपानां उन्मूलनं पादपोन्मूलनं, पादपोन्मूलने एव शक्ति रहः वेगं यस्य सः वायु।

**शिलोच्चये** – शिलानां उच्चये पर्वते इत्यर्थः (शिला समूह अर्थात् पर्वत पर)

**वृषभध्वजेन** – शङ्करेण (शिव द्वारा) वृषभस्य ध्वजा यस्य तेन (बहुब्रीहि)

**पुत्रीकृतस्य** – पुत्ररूपे स्वीकृतस्य (पुत्र स्वीकार किये गये मेरे लिए)

**अङ्कागतसत्ववृत्तिः** – समीपागतप्राणि जीवनोपायः (पास आये हुए प्राणियों से जीविका चलाने वाला) अङ्कं आगतानि यानि सत्वानि तैरेव वृत्तिः यस्य।

**अष्टमूर्ते** – शिवस्य (अष्टमूर्ति शिव का), अष्ट मूर्तयः यस्य इति अष्टमूर्तिः कालिदास ने जल,वायु, अग्नि, आकाश, पृथ्वी, सूर्य, चन्द्रमा और यजमान (सृष्टि रूपी यज्ञ में कर्तव्यनिष्ठ प्राणी), इन आठ प्रकृति तत्त्वों को शिवरूप मानकर शिव को अष्टमूर्ति कहा है।

**प्रगल्भम्** – गर्वोक्तिपूर्णम् (धृष्टता और अहङ्कार युक्त)

**सर्गस्थितिप्रत्यवहारहेतुः** – जन्मपालनविनाशहेतुः (उत्पत्ति, पालन एवं विनाश के कारण), सर्गश्च स्थितिश्च प्रत्यवहारश्च तेषां हेतुः (द्वन्द्व समास)।

**दिनावसानोत्सुकबालवत्साम्** – दिनान्तोत्सुकबालवत्साम् (सन्ध्या के समय पर आतुर बछड़े वाली नन्दिनी को), दिनस्य अवसाने–दिनावसाने (षष्ठीतत्पुरुषः), दिनावसाने उत्सुकः बाल वत्सः यस्याः तां नन्दिनीम् (बहुब्रीहि समास)।

**निर्मितभीतिः** – उत्पन्नभयः (भय उत्पन करने वाला) – निर्मिता भीतिः भयम् येन।

**भूतेश्वर पार्श्ववर्ती** – शिवसमीपवर्ती (शिव का समीपवर्ती), भूतानां प्राणीनां ईश्वरः,

**एकातपत्रम्** – एकछत्राधिपत्यम् (एकछत्र स्वामित्व)।

**हातुम्** – त्यक्तुम् (छोड़ने के लिए)

**विचारमूढः** – कर्त्तव्याकर्त्तव्यविचारणेमूर्खः (कर्त्तव्याकर्त्तव्य के चिन्तन में असमर्थ)

**प्राणिपरित्राणभावादपि** – प्राणिरक्षाविचारादपि (प्राणियों की रक्षा के विचार से भी)

**प्राणोत्सर्गः** – प्राणत्यागः, प्राणानाम् उत्सर्गः (षष्ठी तत्पुरुषः)

**भोक्तारम्** – भोग कर्तारम्, भुज् + तृच् + द्वितीया एकवचनम्।

**ऊर्जस्वलम्** – ऊर्जासम्पन्नं, बलवन्तम् वा

**उदग्रः** – उन्नतशील (प्रतिष्ठित)

**क्षतात्** – पीडाभिः (पीड़ाओं से)

**उपक्रोशमलीमसैः** – लोकनिन्दाकलुषितैः (लोकनिन्दा से कलुषित या निन्दित प्राणों से)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **रुद्रौजसा** | – | शिवप्रभावेण (शिव के प्रभाव से) |
| **सौरभेयी** | – | सुरभे: सन्तति: (सुरभि की सन्तान नन्दिनी) |
| **एकान्तविध्वंसिनम्** | – | अनिवार्यत: विनाशशीलम् (अनिवार्यत: क्षण भंगुर) |
| **प्रणयवचोभि:** | – | प्रेमपूर्वक वचनै: (प्रेमपूर्वक वचनों से) |
| **आमिषपिण्डमिव** | – | माँसकवलमिव (माँस के कवल के समान) |
| **अमृतायमानम्** | – | अमृतसमानं (अमृत के समान मधुर वचन) |
| **कल्पयित्वा** | – | रचयित्वा (बनाकर) |
| **भूतार्थ:** | – | परमार्थ: (वास्तविक तथ्य) |
| **कामदुधा** | – | सर्वकामनापूरयित्री (सभी कामनाओं को पूर्ण करने वाली) |
| **वत्सस्यहोमार्थविधे च शेष** | – | वत्सपीतं होमानुष्ठानेन अवशिष्टञ्च( बछड़े के दूध पी लेने तथा होमानुष्ठान से बचे हुए |
| **उधस्यम्** | – | दुग्ध, उधांसि भव (दूध को) |
| **ऊर्व्या:** | – | पृथिव्या: (धरती का) |
| **गौरीगुरोगह्वराद्** | – | हिमालयगुहाया: (हिमालय की गुफा से)–गौर्या–पार्वत्या:, पितु गुरो:– पितु:, गह्वराद्, गुहाया:। |
| **प्रस्थापयामास:** | – | प्रेषितवान् (विदा किया)। |
| **राज्यधुरम्** | – | राज्यदायित्वम् (राज्य के दायित्व को) |

## अभ्यास:

### वस्तुनिष्ठात्मका: प्रश्ना:–

(१) दिलीपस्य सहधर्मचारिणी आसीत्–

(क) नन्दिनी  (ख) सुदक्षिणा

(ग) कामिनी  (घ) सन्तति:  (    )

(२) दिलीपस्य परीक्षार्थं नन्दिनी हिमालयगुहायां प्रविष्टवती–

(क) एकविंशतितमे दिवसे  (ख) द्वाविंशे दिवसे

(ग) त्रयोविंशतितमे दिवसे  (घ) विंशतितमे दिवसे  (    )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(३) पाठेऽस्मिन् भूतेश्वरपार्श्ववर्ती विशेषणं अस्ति–

(क) शिवस्य (ख) सिंहस्य

(ग) राज्ञः (घ) भूतानाम् ( )

(४) अस्मिन् पाठे 'मनुष्यदेवः' इत्यस्य शब्दस्य प्रयोगः अस्ति–

(क) रूपकम् (ख) उपमा

(ग) श्लेषः (घ) यमकम् ( )

## अधोलिखितेषु रिक्त स्थानं पूरयत–

१. स्ववीर्य गुप्ता हि .................................... ।

२. राजा गविस्थितमेकं .................................. अपश्यत्।

३. ...................................... प्रतिभासि मे त्वम्।

४. क्षतात् किल ........................................ इत्युदग्रः।

५. प्रजावत्सलस्योपरि ........................... मुक्तहस्तैः सुमनवृष्टिः कृताः।

## लघूत्तरात्मकाः प्रश्नाः–

१. राजा दिलीपः छायेव काम् अन्वगच्छत्?

२. सर्गस्थितिप्रत्यवहार हेतुः कः अस्ति ?

३. दिलीपः आमिषपिण्डमिव सिंहाय किं समर्पितवान् ?

४. मातुः दुग्धे प्रथमाधिकारः कस्य भवति ?

५. नन्दिनी प्रसादात् कस्य जन्मः अभवत् ?

## निबन्धात्मकाः प्रश्नाः–

१. पाठस्थितयोः प्रथम–द्वितीयपद्ययोः सप्रसङ्गव्याख्या विधेया ।

२. चतुर्थ–पञ्चमयोः सप्रसङ्गव्याख्या विधेया।

३. अस्यपाठस्य भारतीयसंस्कृतिदृष्ट्या महत्त्वं लिखत।

## व्याकरणात्मकाः प्रश्नाः–

**१. अधोलिखितेषुपदेषु नामोल्लेखपूर्वकं सन्धिकार्यः–**

| | | सन्धिः | सन्धि नाम |
|---|---|---|---|
| (क) | नन्दिनी + अनुचरः | .................................. | .................................. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | |
|---|---|---|---|
| (ख) | भक्त्या + उपपन्नेषु | ................................ | ................................ |
| (ग) | रात्रौ + अपि | ................................ | ................................ |
| (घ) | तृप्ति + एव | ................................ | ................................ |
| (ङ) | प्रजा + अधिप | ................................ | ................................ |
| (च) | भूपतिः + असौ | ................................ | ................................ |
| (छ) | भवन्ति + इति | ................................ | ................................ |
| (ज) | अस्ति + एकः | ................................ | ................................ |
| (झ) | आवयोः + उभयोः | ................................ | ................................ |

**२. अधस्तनेषु पदेषु सन्धिविच्छेदं विधेयः –**

| | पदम् | सन्धि विच्छेदः |
|---|---|---|
| (क) | प्राप्तीच्छया | ............ + ................ |
| (ख) | गुरोराज्ञया | ............ + ................ |
| (ग) | भूपतिरन्वगच्छत् | ............ + ................ |
| (घ) | पयस्वन्यपि | ............ + ................ |
| (ङ) | श्रद्धेव | ............ + ................ |
| (च) | दिगन्तराणि | ............ + ................ |
| (छ) | तामनूपविश्य | ............ + ................ |
| (ज) | नोपेक्षणीयम् | ............ + ................ |

**३. अधोलिखितेषु रिक्तस्थानानि पूरयन्तु–**

| | समस्तपदम् | समासविग्रहः | समासस्य नाम |
|---|---|---|---|
| (क) | ...................... | मगधस्य राजा | ........................... |
| (ख) | प्रतिदिनम् | .................................... | .......................... |
| (ग) | प्रजार्थम् | .................................... | .......................... |
| (घ) | ...................... | मृगेन्द्र इव गमनं यस्य | .......................... |
| (ङ) | अष्टमूर्तिः | अष्ट मूर्तयः यस्य सः | ......................... |
| (च) | ..................... | चराणाम् च अचराणाम् च | द्वन्द्वः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | |
|---|---|---|---|
| (छ) | प्राणोत्सर्गः | ...................................... | तत्पुरुषः |
| (ज) | ....................... | भूतानाम् ईश्वरः | ........................... |

४. **अधोलिखितेषु सुबन्तप्रयोगेषु रिक्त स्थानानि पूरयन्तु–**

| | पदम् | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | त्रिकालदर्शिनः | .............. | षष्ठी | एकवचनम् |
| (ख) | कामिन्या | कामिनी | .............. | एकवचनम् |
| (ग) | ............... | आत्मन् | द्वितीया | एकवचनम् |
| (घ) | वनाय | वन | .............. | ............. |
| (ङ) | ............... | दयिता | द्वितीय | एकवचनम् |
| (च) | व्यवहाराणाम् | ............ | .............. | ............. |
| (छ) | मनसा | मनस् | तृतीया | ............... |
| (ज) | ............... | अस्मद् | षष्ठी | द्विवचनम् |
| (झ) | सुदक्षिणायाम् | ............... | ............... | एकवचनम् |

५. **निम्नलिखितानां भूतकालिक रूपाणां वर्तमानकालिकं रूपं लिखत–**

| | भूतकालिकः | वर्तमानकालिकः |
|---|---|---|
| **(क)** | **आसीत्** | **अस्ति** |
| (ख) | अभवत् | ....................... |
| (ग) | शोभते स्म | ....................... |
| (घ) | भवति स्म | ....................... |
| (ङ) | अलभेताम् | ....................... |
| (च) | ऐच्छत् | ........................ |
| (छ) | अपश्यत् | ........................ |

६. **अधोलिखितेषु प्रकृतिप्रत्यययोः निर्धारणं कुरुत–**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | मत्वा | ............... | ............... |
| (ख) | मुक्तवान् | ............... | ............... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | |
|---|---|---|---|
| (ग) | उक्तवान् | ............... | ............... |
| (घ) | जातः | ............... | ............... |
| (ङ) | स्थितः | ............... | ............... |
| (च) | हातुम् | ............... | ............... |
| (छ) | दमनीया | ............... | ............... |
| (ज) | धार्यः | ............... | ............... |
| (झ) | दुग्ध्वा | ............... | ............... |

**७. अधोलिखितेषु धातूपसर्गप्रत्यययानां निर्धारणं कुरुत–**

| | पदम् | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|---|
| (क) | अनुरक्तः | ............... | ............... | ............... |
| (ख) | निवर्त्य | ............... | ............... | ............... |
| (ग) | प्रत्यावर्तमानाः | ............... | ............... | ............... |
| (घ) | अवलोकयन्ती | ............... | ............... | ............... |
| (ङ) | समाप्य | ............... | ............... | ............... |
| (च) | अनूपविश्य | ............... | ............... | ............... |
| (छ) | प्रतिश्रुत्य | ............... | ............... | ............... |
| (ज) | अधिगम्य | ............... | ............... | ............... |
| (झ) | विज्ञापिता | ............... | ............... | ............... |

**८. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां शुद्धिः विधेया–**

(क) राजा दिलीपः सुदक्षिणायाः सह नन्दिन्याः सेवकः अभवत्।

(ख) अलं महीपाल तव श्रमस्य।

(ग) राजा गुरोः प्रति दर्शितभक्तिः आसीत्।

(घ) अल्पस्य हेतुः बहु हातुमिच्छन् त्वं विचारमूढः असि।

(ङ) राजा सिंहम् प्राणान् दत्तवान्।

**९. अधस्तनेषु वाक्येषु कोष्ठकाङ्कितशब्दात् प्रारभ्य प्रश्न निर्माणं कुरुत–**

(क) दिलीपः नन्दिन्याः सेवां कृतवान्।

.........................................................? (कस्याः)

.........................................................? (कः)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ख) नन्दिनी एकदा हिमालय गुहायां प्रविष्टवती।

.........................................................? (कुत्र)

.........................................................? (का)

(ग) पुरुषाधिराजः मृगाधिराजमवदत्।

.........................................................? (कः)

.........................................................? (कम्)

(घ) राजा ऋषेः आज्ञां अधिगम्य नन्दिन्याः दुग्धं पीतवान्।

.........................................................? (कस्य)

.........................................................? (कस्याः)

(ङ) सुदक्षिणायां नन्दिनीप्रसादात् रघोः जन्मः अभवत्।

.........................................................? (कस्याः)

.........................................................? (कस्य)

## रचनात्मकं कार्यम्

१. अस्मिन् पाठे आगतानां राज्ञः, पत्न्याः गोः सिहस्य च वाचकान् पदानि चित्वा तेषामर्थभेदं लिखत।

### उत्तरमालाः –

वस्तुनिष्ठात्मकाः प्रश्नाः– १. ख, २. ख, ३. ख, ४. क

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अष्टमः पाठः
# यक्ष-युधिष्ठिरयोः संवादः

महर्षिणा वेदव्यासेन विरचितं 'महाभारतम्' इति नामधेयं महाकाव्यं 'विश्वकोषः' इति नाम्ना प्रसिद्धः। अस्य महाकाव्यस्य वैशिष्ट्यविषये उक्तं यत् 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' अर्थात् अस्मिन् महाकाव्ये यद् वर्णितं तत् अन्यत्र दृश्यते किन्तु यद् अत्र नास्ति तत्तु अन्यत्र कुत्रापि नोपलभ्यते।

विशालकलेवरेऽस्मिन् महाकाव्ये एकलक्षपरिमितं श्लोकाः सन्ति। अत एव अस्य अपरं नाम 'शतसाहस्री संहिता' इत्यपिमन्यते। अस्मिन् महाकाव्ये अष्टादशपर्वाणि सन्ति, एतेषु पर्वेषु कौरव-पाण्डवानां युद्धवर्णनेन सहैव अनेकानि आख्यानोपाख्यानि समाविष्टानि सन्ति। उपाख्यानेषु च कर्मनिष्ठा-ईश्वरभक्तिः-लोकजीवनस्य विविधविषयाणाञ्च सम्यक् चित्रणमस्ति। भारतीयसंस्कृतौ समाजे च वाल्मीकिरामायणवत् अस्य महाकाव्यस्यापि वैशिष्ट्यं विद्यते।

अस्मिन् अध्याये सङ्कलितांशः महाभारतस्य वनपर्वतः गृहीतोऽस्ति। आरण्यकपर्वणः एकस्मिनाख्याने अस्य कथानकस्य वर्णनं विद्यते। पाण्डवाः वनवासकाले यदा द्वैतवने न्यवसन् तदानीम् एकस्मिन् दिवसे एकस्य ब्राह्मणस्य वृक्षोपरिस्थितं अरणीमन्थनकाष्ठं मृगस्य शृङ्गे प्रविष्टम्। मृगश्च तं नीत्वा पलायितः। एतद् दृष्ट्वा सः ब्राह्मणः पाण्डवान् न्यवेदयत्। तदा पाण्डवाः तं मृगम् अन्वगच्छन् प्रयासाधिक्येनापि ते तं हन्तुं न शक्नुवन्। अन्ते च ते गहनारण्ये पिपासा पीड़िताः सञ्जाताः तदा युधिष्ठिरस्य आज्ञां सम्प्राप्य सर्वप्रथमः नकुलः जलस्य अन्वेषणं कर्तुम् अगच्छत्।

जलाशयं प्राप्य यदा सः जलं पातुम् उद्यतोऽभवत् तदानीं तत्र एकः यक्षः समागत्य कथयति यत् 'मे प्रश्नानाम् उत्तरं प्रदाय एव जलं पिबतु इति' किन्तु नकुलः यक्षस्य प्रश्नानामुत्तरं प्रदानं विना जलं पातुं यदा उद्यतोऽभवत् तदा सः मूर्छितः सञ्जातः। एतदनन्तरं क्रमशः सहदेवस्य, अर्जुनस्य, भीमस्यापि सैव स्थितिः सञ्जाता। तदन्तरं युधिष्ठिरः स्वयमागत्य भ्रातॄन् जीवनप्रदानानन्तरम् एव अहं जलं स्वीकरिष्यामि इति यक्षम् अकथयत्। यक्षः तस्य भ्रातॄन् जीवनदानम् अयच्छत्। अयमेव अंशः अत्र पाठरूपेण निर्धारितः। एषः प्रश्नोत्तरात्मकः संवादः नूनं ज्ञानवर्द्धकः चारित्रिक शिक्षया च संयुक्तः वर्तते।

**स ददर्श हतान् भ्रातॄँल्लोकपालानिव च्युतान्।**
**युगान्ते समनुप्राप्ते शक्रप्रतिमगौरवम् ।। १ ।।**

**बुद्ध्या विचिन्तयामास वीराः केन निपातिताः।**
**गाहमानश्च तत् तोयमन्तरिक्षात् स शुश्रुवे।। २ ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



यक्ष उवाच–

इमे ते भ्रातरो राजन् वार्यमाणा मया सकृत्।
बलात् तोयं जिहीर्षन्तस्ततो वै मृदिता मया।। ३ ।।

पार्थ ! मा साहसं कार्षीर्मम पूर्वपरिग्रहः।
प्रश्नानुक्त्वा तु कौन्तेय! ततः पिब हरस्व च।। ४ ।।

युधिष्ठिर उवाच–

न चाहं कामये यक्ष तव पूर्वपरिग्रहम्।
यथाप्रज्ञं तु ते प्रश्नान् प्रतिवक्ष्यामि पृच्छ माम्।। ५ ।।

यक्ष उवाच–

किंस्विदावपतां श्रेष्ठं किंस्विन्निवपतां वरम्।
किंस्वित् प्रतिष्ठमानानां किंस्वित् प्रसवतां वरम् ।। ६ ।।

युधिष्ठिर उवाच–

वर्षमावपतां श्रेष्ठं बीजं निवपतां वरम्।
गावः प्रतिष्ठमानानां पुत्रः प्रसवतां वरम् ।। ७ ।।

यक्ष उवाच–

इन्द्रियार्थाननुभवन् बुद्धिमाँल्लोकपूजितः।
सम्मतः सर्वभूतानामुच्छ्वसन् को न जीवति।। ८ ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

युधिष्ठिर उवाच–

देवतातिथिभृत्यानां पितृणामात्मनश्च यः।
न निर्वपति पञ्चानामुच्छ्वसन् न स जीवति।। ९ ।।

यक्ष उवाच–

किंस्विद् गुरुतरं भूमेः, किंस्विदुच्चतरं च खात्।
किंस्विच्छीघ्रतरं वायोः, किंस्विद् बहुतरं तृणात् ।। १० ।।

युधिष्ठिर उवाच–

माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात् ।। ११ ।।

यक्ष उवाच–

किंस्वित्प्रवसतो मित्रं, किंस्विन्मित्रं, गृहे सतः।
आतुरस्य च किं मित्रं, किंस्विन्मित्रं मरिष्यतः।। १२ ।।

युधिष्ठिर उवाच–

सार्थः प्रवसतो मित्रं, भार्या मित्रं गृहे सतः।
आतुरस्य भिषङ्मित्रं, दानं मित्रं मरिष्यतः ।। १३ ।।

यक्ष उवाच–

कः शत्रुर्दुर्जयः पुंसां, कश्च व्याधिरनन्तकः।
कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः।। १४ ।।

युधिष्ठिर उवाच–

क्रोधः सुदुर्जयः शत्रुर्लोभो, व्याधिरनन्तकः।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ।। १५ ।।

यक्ष उवाच–

कोऽहङ्कार इति प्रोक्तः कश्च दम्भः प्रकीर्तितः।
किं तद् दैवं परं प्रोक्तं किं तत् पैशुन्यमुच्यते ।। १६ ।।

युधिष्ठिर उवाच–

महाज्ञानमहङ्कारो, दम्भो धर्मो ध्वजोच्छ्रयः।
दैवं दानफलं प्रोक्तं, पैशुन्यं परदूषणम्।। १७ ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यक्ष उवाच–

**व्याख्याता मे त्वया प्रश्ना याथातथ्यं परन्तप।**
**तस्मात् त्वमेकं भ्रातृणां, यमिच्छसि स जीवतु ।। १८ ।।**

युधिष्ठिर उवाच–

**आनृशंस्य परो धर्मः परमार्थाच्च मे मतम्।**
**आनृशंस्यं चिकीर्षामि नकुलो यक्ष ! जीवतु।। १९ ।।**

यक्ष उवाच–

**तस्य तेऽर्थाच्च कामाच्च आनृशंस्यं परं मतम्।**
**तस्मात् ते भ्रातरः सर्वे जीवन्तु भरतर्षभ! ।। २० ।।**

❀ ❀ ❀

## शब्दार्थाः

| | | |
|---|---|---|
| **युगान्तेः** | = | प्रलयकाले (प्रलय काल में) |
| **शक्रप्रतिमगौरवम्** | = | इन्द्र के सामन गौरवशाली, |
| **निपातिताः** | = | गिराया, |
| **ददर्श** | = | दृश् धातु लिट् लकार, प्रथम पुरुष, एकवचन (देखा) |
| **आहमाने** | = | प्रविष्ट होते हुए, |
| **तोयम्** | = | जलम् (पानी) |
| **वार्यमाना** | = | रोके जाते हुए, |
| **पूर्व परिग्रहः** | = | पहले से अधिगृहीत वस्तु, |
| **हरस्व** | = | ले जाओ, |
| **कामये** | = | चाहता हूँ, |
| **प्रतिवक्ष्यामि** | = | प्रत्युत्तर दूंगा, |
| **आवपताम्** | = | कृषि करने वालों को, |
| **निवपताम** | = | बौने वालों को, |
| **खात्** | = | गगनात् (आकाश से), |
| **वातात्** | = | वायु से |
| **बहुतरी** | = | अत्यधिक |
| **प्रवसत्** | = | प्रवासी का |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **किंस्वित्** | = | क्या |
| **सतः** | = | रहते हुए का |
| **आतुरस्य** | = | आतुर शब्द षष्ठी एकवचन (रोगी का) |
| **मरिष्यतः** | = | मरने वाले का |
| **अनन्तकः** | = | असाध्य |
| **दम्भः** | = | कपटाभिमान |
| **दैवम्** | = | भाग्यम् (भाग्य) |
| **पैशुन्यम्** | = | चुगलखोरी |
| **ध्वजा** | = | पताका |
| **आनुवंशस्यम्** | = | दया तथा समता भाव को |
| **यथातथ्यम्** | = | ठीक से |
| **चिकीर्षामि** | = | करना चाहता हूं |
| **भरतर्षभ** | = | भारत वर्ष में श्रेष्ठ , भरत + ऋषभ = भरतर्षभ (गुण सन्धि) |
| **उक्त्वा** | = | कहकर, वच् + क्त्वा = उक्त्वा |
| **पृच्छ** | = | पूछिए |
| **वरम्** | = | श्रेष्ठ |
| **गुरुतरम्** | = | बड़ा |
| **भिषज्** | = | औषधि |
| **परदूषणम्** | = | दूसरों में दोष खोजने वाला |
| **जीवन्तु** | = | जीवित होंवे |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. 'सार्थम् प्रवसतो मित्राम्' इत्यत्र 'सार्थम्' इति पदस्य कोऽर्थः?

(क) विद्वान् (ख) धनवान्

(ग) सहयात्री (घ) भार्या ( )

२. कः शत्रुर्दुर्जयः पुंसाम्?

(क) अहङ्कारः (ख) दम्भः

(ग) क्रोधः (घ) व्याधिः ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. गगनाद्–उच्चतर क:?
(क) माता (ख) पिता
(ग) मित्रम् (घ) वायु: ( )

४. 'पैशुन्य' किम् उच्यते?
(क) अहंकार: (ख) क्रोध:
(ग) परदूषणम् (घ) दम्भ: ( )

## लघूत्तरात्मकप्रश्ना: –

१. प्रवसतां किं मित्रम् ?
२. असाधु: कीदृश: स्मृत: ?
३. आतुरस्य किं मित्रम् ?
४. तृणात् किंस्विद् बहुतरम् ?
५. दम्भ: क: परिकीर्तित: ?

## निबन्धात्मकप्रश्ना: –

१. 'यक्ष–युधिष्ठिर' इति संवादं स्वभाषया संस्कृतेन लिखतु।
२. यक्ष: जलं पीतमानं युधिष्ठिरं किम् अवदत् ?

## व्याकरणात्मक–प्रश्ना: –

**(क) अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धेर्नाम अपि लेख्यम् -**

| | पदम् | विच्छेद: | सन्धिनाम |
|---|---|---|---|
| १. | प्रोक्तम् | ...................... | ...................... |
| २. | इन्द्रियार्थान् | ...................... | ...................... |
| ३. | भरतर्षभ | ...................... | ...................... |
| ४. | देवतातिथि: | ...................... | ...................... |
| ५. | कश्च | ...................... | ...................... |

**(ख) निम्नलिखितपदानां समास विग्रहं कृत्वा समास नामोल्लेख करणीय: -**

| | पदम् | विग्रह: | नाम |
|---|---|---|---|
| १. | यथाप्रज्ञम् | ............................... | ............................... |
| २. | लोकपूजित: | ............................... | ............................... |
| ३. | परदूषणम् | ............................... | ............................... |
| ४. | महाज्ञानम् | ............................... | ............................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**( ग ) निम्नाङ्कितानां प्रकृति-प्रत्ययौ लेख्य –**

| | पदम् | उपसर्गः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|---|
| १. | प्रवसतः | .................. | .................. | .................. |
| २. | अनुभवन् | .................. | .................. | .................. |
| ३. | प्रोक्तम् | .................. | .................. | .................. |
| ४. | कौन्तेय | .................. | .................. | .................. |

**( घ ) अधोलिखित पदानां मूलशब्दं विभक्तिश्च दर्शय –**

| | पदम् | मूलशब्दः | विभक्तिः |
|---|---|---|---|
| १. | आतुरस्य | ...................... | ...................... |
| २. | बुद्ध्या | ...................... | ...................... |
| ३. | मया | ...................... | ..................... |
| ४. | तस्मात् | ...................... | ...................... |

**( ङ) निम्नलिखितपदेषु मूलधातुं लकारञ्च चिनुत–**

| | पदम् | धातुः | लकारः |
|---|---|---|---|
| १. | हरस्व | ...................... | ...................... |
| २. | जीवतु | ...................... | ...................... |
| ३. | चिकीर्षामि | ...................... | ...................... |
| ४. | निर्वपति | ...................... | ...................... |

**( च ) निम्नलिखित वाक्यानाम् आधारेण प्रश्ननिर्माणं करोतु–**

१. पाण्डवाः पञ्च भ्रातरः आसन्।

.................................................................................................?

२. पाण्डवेषु युधिष्ठिरः ज्येष्ठः आसीत्।

.................................................................................................?

३. गृहे भार्या मित्रं भवति।

.................................................................................................?

४. 'महाभारतं' शतसाहस्री संहिता इत्यपि कथ्यते।

.................................................................................................?

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## नवम पाठः
## महाकविः माघः

मरुभूमिः राजस्थानं न केवलं वीराणां भक्तानाञ्च भूमिः अस्ति, अपितु विदुषां महाकवीनामपि भूमिः। संस्कृतसाहित्ये 'बृहत्त्रयी' इति नाम्ना प्रसिद्धानि, त्रीणि महाकाव्यानि सन्ति– भारविकवेः 'किरातार्जुनीयं' माघस्य 'शिशुपालवधं' श्रीहर्षस्य च 'नैषधीयचरितम्'।

एषु शिशुपालवधस्य रचयितामहाकवेः माघस्य जन्म राजस्थानस्य जालौर–जनपदान्तर्गते भीनमालनगरे श्रीमालीब्राह्मणपरिवारे अभवत्। भीनमालनगरस्य पुरातनं नाम 'भिन्नमाल' इति आसीत्। श्रीमालीब्राह्मणानां बाहुल्यात् अस्य क्षेत्रस्य अपरं नाम 'श्रीमालक्षेत्रम्' अपि आसीत्।

माघस्य पितामहः सुप्रभदेवः वर्मलातनामकस्य राज्ञः प्रधानमन्त्री आसीत्। माघस्य पिता दत्तकः विद्वान् दानशीलः चासीत्। दत्तकस्य गृहे विक्रमस्य सप्तम–शताब्द्यां माघस्य जन्म अभवत्। पितृवत् माघोऽपि विद्वान् दानशीलः च। भोजप्रबन्धनाम्नि ग्रन्थे माघस्य जीवनवृत्तं लिखितमस्ति। राजा भोजः माघस्य आश्रयदाता मित्रं चासीत्। एकदा दानशीलः माघ निर्धनः जातः। माघस्य पत्नी एकां कवितां स्वीकृत्य भोजसमीपे गच्छति। भोजः तस्यै प्रभूतं धनं ददाति। यदा सा गृहं प्रति आगच्छति तदा मार्गे याचकेभ्यः सर्वं धनं ददाति। रिक्तहस्ता सा गृहम् आगच्छति। तदानीम् अपि गृहस्य द्वारे बहवः याचकाः आसन्। याचकानां कृते माघस्य समीपे धनं न आसीत्, अतएव सः बहु–दुःखितः भूत्वा स्वप्राणान् एव अत्यजत्।

माघेन 'शिशुपालवधं' इति एकमेव महाकाव्यं लिखितम्। अस्य कथायाः आधारः महाभारतम् (सभा पर्वः) अस्ति। विंशतिः सर्गात्मकेऽस्मिन् महाकाव्ये १६५० श्लोकाः सन्ति। अस्य कथानकं महाभारतात् गृहीतमस्ति। वीररसः मुख्यरूपेण अस्ति। महाकाव्यस्यास्य नायकः श्रीकृष्णः। माघकाव्यस्य वर्णनशैली यद्यपि महाकविभारविमनुकरोति, तथापि प्रौढरचनाशैली प्राञ्जलाभिव्यक्तिः माधुर्यमयपदगुम्फनञ्च माघकाव्ये विशिष्टाञ्चमत्कृतिं प्रकटयति। विद्वद्भिः कालिदासस्य कृतिषु उपमानां प्राधान्यं, भारवेः काव्ये अर्थगौरवस्य वैशिष्ट्यं, दण्डिनश्च दशकुमारचरिते पदलालित्यं स्वीकृतम्, माघस्य कृतौ शिशुपालवधे तु त्रयाणामपि गुणानामेकत्र समावेशोऽस्ति।

वस्तुतः माघस्य काव्ये उपमा, अर्थगौरवं पदलालित्यञ्च त्रयो गुणाः सन्ति। अत एव कथ्यते–

**''उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।**

अस्य सूक्तकथनस्याऽयं भावो यदसौ माघः काव्यकलायामतिनिपुणः प्रतिभाविलाससमन्वितश्च आसीत्। अस्य महाकाव्ये यथा भावपक्षः प्रशस्यः, तथैव कलापक्षोऽपि प्रशस्यातिप्रशस्यतमः। अलङ्काराणां



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रयोगे, छन्दोरचनाकौशले, व्याकरणनैपुण्यप्रदर्शने, कोमलकान्तपदावल्याः संधाने, शास्त्रीयज्ञानप्रतिपादने च माघः सर्वानपि अन्यान् कवीन् अतिशेते। अयं नीतिशास्त्रनिपुणो दर्शनशास्त्रपारङ्गतः सङ्गीतस्वरसाधकश्च सिध्यति, यतो ह्यस्य महाकाव्ये चमत्कारजननमेव यदि मधुरं किमपि तत्त्वं भवति तत्रापि माघः प्राथम्यं भजते।

कालिदासस्य यथा मेघदूतं प्रसिद्धम् तथैव माघस्य काव्यमिदमपि प्रसिद्धमस्ति। द्वयोः काव्ययोः सौन्दर्यं दृष्ट्वा एव उक्तम् यद्– **'मेघे माघे गतं वयः।'** महाकविः माघेन शिशुपालवधमहाकाव्यस्य प्रथमनवसर्गेषु स्व अक्षय शब्दकोषस्य पूर्ण प्रदर्शनं कृतम्। तेन प्रयत्नपूर्वकं एकस्य भावस्य कृते अथवा भिन्न-भिन्नार्थस्य कृते नूतनशब्दानां प्रयोगः कृतः। अतएव कथ्यते– **'नवसर्गगते माघे नवशब्दो न विद्यते।'**

समीक्षकाणां दृष्टावपि माघ एव श्रेष्ठः अस्ति। तेषामनुसारेण भारवेः शोभाः माघस्योदयात् पूर्वम् इति यावदेव अस्ति। अत एव उच्यते– **'तावद् भा भारवेर्भाति यावन्माघस्य नोदयः।'**

माघस्योपमावैशिष्टस्य उदाहरणं –

**उदयति विततोर्ध्वरश्मिरज्जा बहिमरुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बि-घण्टा-द्वय-परिवारित-वारणेन्द्र-लीलाम्।।**

अयं दृष्ट्वा एव माघः 'घण्टामाघः' इति नाम्ना प्रसिद्धोऽभूत्। माघस्यार्थगौरवस्य सौन्दर्यमपि दृश्यते यथा– **'महीयांसः प्रकृत्या मितभाषिणः'**, **'सर्वः स्वार्थं समीहते'**, **'समय एव करोति बलाबलम्'** **'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः'**।

पदलालित्यस्य वैशिष्ट्यमपि एकस्मिन् श्लोके दृश्यतेऽत्र–

**मधुरया मधुबोधितमाधवी, मधुसमृद्धिसमेधितः-मेधया।**
**मधुकराङ्गनया मुहुरुन्मद- ध्वनिभृता निभृताक्षरमुज्जगे।।**

संक्षेपतः स्पष्टमेव यन्माघः काव्यनिर्माणे यथा कलापक्षमुत्कृष्टतमं स्वीकरोति तथापि भावपक्षदृष्ट्या अस्य लेखनीं सुललितं माधुर्यपूर्णञ्चास्ति। संस्कृतसाहित्ये बृहत्त्व्यामस्य महाकाव्यस्य गणना क्रियते। सुरभारतिसमुपासकानां कृतेऽयं महाकविर्माघः परमसमादरणीयः।

## शब्दार्थाः

| | | |
|---|---|---|
| **मरुभूमिः** | = | मरुस्थलम् (रेगिस्तान) |
| **बृहत्त्रयी** | = | त्रयाणां विशालकाव्यानां समूहः |
| **पुरातनम्** | = | प्राचीनम् |
| **अपरम्** | = | द्वितीयम् (अन्य, दूसरा) |
| **राज्ञः** | = | नृपस्य (राजन् शब्द, षष्ठी, एकवचनम्) |
| **प्रभूतम्** | = | अत्यधिकम् |
| **याचकेभ्यः** | = | भिक्षुकेभ्यः (याचक शब्द, चतुर्थी, बहुवचनम्) |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **रिक्तहस्ता** | = | रिक्तं हस्तं यस्याः सा |
| **बहवः** | = | बहु शब्द, प्रथमा, बहुवचनम् |
| **अत्यजत्** | = | त्यज् धातु, लङ्लकार प्रथमपुरुषः, एकवचनम् |
| **तथैव** | = | तद्वत्, तथा + एव (वृद्धि सन्धिः) |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. भारविकवेः रचना अस्ति–
(क) किरातार्जुनीयम् (ख) शिशुपालवधम्
(ग) नैषधीयचरितम् (घ) मेघदूतम् ( )

२. माघस्य पितुः नाम आसीत्–
(क) सुप्रभदेवः (ख) दत्तकः
(ग) भोजः (घ) विक्रमः ( )

३. माघस्य जीवनवृत्तं लिखितम् अस्ति –
(क) शिशुपालवधे (ख) मेघदूते
(ग) भोजप्रबन्धे (घ) किरातार्जुनीये ( )

४. माघस्य आश्रयदाता आसीत् –
(क) वर्मलातः (ख) सुप्रभदेवः
(ग) विक्रमः (घ) भोजः ( )

५. शिशुपालवधे सर्गाः सन्ति–
(अ) विंशतिः (ब) त्रयः
(स) अष्टादश (द) षोडश ( )

### लघूत्तरात्मकप्रश्नाः –

१. राजस्थानं कीदृशानां जनानां भूमिः अस्ति?
२. माघस्य जन्म कुत्र अभवत्?
३. शिशुपालवधस्य नायकः कः अस्ति?
४. शिशुपालवधस्य कथायाः आधारः किम् अस्ति?
५. माघस्य काव्ये कति गुणाः सन्ति?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### निबन्धात्मकप्रश्नाः–

१. माघस्य जीवनवृत्तस्य वर्णनं कुरुत।

२ शिशुपालवधस्य काव्यवैशिष्ट्यं लिखत।

### व्याकरणात्मक प्रश्नाः–

**१. अधोलिखितपदेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत-**

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| अभवत् | भू | लङ् | प्रथमः | एकवचनम् |
| आसीत् | .................... | .................... | .................... | .................... |
| आसन् | .................... | .................... | .................... | .................... |
| अस्ति | .................... | .................... | .................... | .................... |
| सन्ति | .................... | .................... | .................... | .................... |
| गच्छति | .................... | .................... | .................... | .................... |
| ददाति | .................... | .................... | .................... | .................... |
| अत्यजत् | .................... | .................... | .................... | .................... |

२. अधोलिखितपदेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुत-

| पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| माघस्य | माघ | षष्ठी | एकवचनम् |
| नगरस्य | .................... | .................... | .................... |
| दत्तकस्य | .................... | .................... | .................... |
| भक्तानां | .................... | .................... | .................... |
| वीराणां | .................... | .................... | .................... |
| कवेः | .................... | .................... | .................... |
| विदुषां | .................... | .................... | .................... |
| गृहे | .................... | .................... | .................... |
| याचकेभ्यः | .................... | .................... | .................... |

**३. अधोलिखितपदेषु प्रत्ययस्य निर्देशनं कुरुत-**

लिखितम्- लिख् + क्त

जातः – ........................ + ......................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | | |
|---|---|---|---|---|
| स्वीकृत्य | – | ........................ | + | ........................ |
| भूत्वा | – | ...................... | + | ...................... |
| दृष्ट्वा | – | ........................ | + | ........................ |

४. **अधोलिखितपदेषु समासविग्रहं कृत्वा समासस्य नामनिर्देशनं कुरुत–**

| | | | |
|---|---|---|---|
| आश्रयदाता | – | आश्रयस्य दाता | (षष्ठी तत्पुरुष:) |
| भोजसमीपे | – | ................................ | ........................ |
| अर्थगौरवं | – | ................................ | ........................ |
| पदलालित्यं | – | ................................ | ........................ |
| जीवनवृत्तं | – | ................................. | ........................ |

५. **अधोलिखितपदेषु काल ( लकार ) परिवर्तनं कुरुत–**

| | | | |
|---|---|---|---|
| अभवत् | – | (लट्) | भवति |
| आसीत् | – | (लट्) | ........................ |
| गच्छति | – | (लङ्) | ........................ |
| अत्यजत् | – | (लट्) | ........................ |
| ददाति | – | (लृट्) | ........................ |
| आगच्छति | – | (लृट्) | ...................... |
| सन्ति | – | (लङ्) | ........................ |

६. **अधोलिखितपदेषु वचनपरिवर्तनं कुरुत–**

| | | | |
|---|---|---|---|
| कवे: | – | (बहुवचनम्) | कवीनाम् |
| भक्तानां | – | (एकवचनम्) | .................... |
| वीराणां | – | (एकवचनम्) | .................... |
| विदुषां | – | (एकवचनम्) | .................... |
| राज्ञ: | – | (बहुवचनम्) | .................... |
| याचकेभ्य: | – | (एकवचनम्) | .................. |

७. **अधोलिखितशब्दानाम् आधारेण वाक्यनिर्माणं कुरुत–**

| | | |
|---|---|---|
| एकदा | – | माघ: एकदा निर्धन: जात:। |
| प्रभूतं | – | ..............................................................................................। |
| विंशति: | – | ..............................................................................................। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

त्रयः – ..................................................................................।

यदा–तदा– ..................................................................................।

तथैव – ..................................................................................।

कति – ..................................................................................।

अपरं – ..................................................................................।

८. **अधोलिखितानाम् उत्तराणामाधारेण प्रश्ननिर्माणं कुरुत–**

उदा. – माघस्य जन्म भीनमालनगरे अभवत।

प्रश्नः– माघस्य जन्म कुत्र अभवत् ?

१. भीनमालनगरस्य पुरातनं नाम भिन्नमाल इति आसीत्।

**प्रश्नः**– ..................................................................................................?

२. माघः विद्वान् दानशीलः च आसीत् ।

**प्रश्नः**– ..................................................................................................?

३. शिशुपालवधे मुख्यरूपेण वीररसः अस्ति।

**प्रश्नः**–..................................................................................................?

४. कालिदासस्य मेघदूतं प्रसिद्धम् अस्ति।

**प्रश्नः**– ..................................................................................................?

५. माघस्य पितामहः सुप्रभदेवः आसीत्।

**प्रश्नः**– ..................................................................................................?

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# दशमः पाठः

# कारुण्यं रामभद्रस्य

महाकविः भवभूतिः संस्कृतवाङ्मयस्य मूर्धन्यः कविः अस्ति। प्रायः वीरशृङ्गाररसप्रधाने काव्यजगति एकेन भवभूतिना एव करुणं रसं आधृत्य नाटकं रचितम्। भवभूतिः विविधानां पात्राणाम् मनोवैज्ञानिकचित्रणस्य भावोन्मेषस्य, भावानां अन्तर्द्वन्द्वस्य च अप्रतिमः रचयिता अस्ति। यत्र सर्वे कवयः प्रकृत्या सुन्दरं रूपं एव चित्रितवन्तः तत्रैव भवभूतिना प्रकृत्याः भयावहस्वरूपस्यापि स्वाभाविकं, हृदयग्राही च चित्रणं कृतम्। कवेः तिस्रः कृतयः सन्ति मालतीमाधवम्, महावीरचरितम्, उत्तररामचरितम् इति। उत्तररामचरितम् कवेः अन्तिमा रचना अस्ति। अस्मिन् करुणो रसः अङ्गीरसः अस्ति। अस्मिन् श्रीरामचन्द्रस्य राज्याभिषेकोपरान्तस्य कथानकः वर्णितः। सीतायाः अपवादः पुनः वनवासः, लवकुशयोः जन्म, शम्बूकस्य वधः, अन्ततः वाल्मीकिआश्रमे समग्रपरिवारजनानां सम्मेलनम् अत्र वर्णितः। अस्य नाटकस्य तिस्रः विशिष्टताः सन्ति प्रथमा- चित्रवीथिदर्शनम् (प्रथमाङ्के), द्वितीया- छायाङ्कः, (तृतीयाङ्के), तृतीया- गर्भाङ्कः (सप्तमाङ्के)।

राज्ञः रामचन्द्रस्य लोकरञ्जकः स्वरूपः, रामराज्यस्य चावधाराणा उत्तररामचरितस्य सारभूतः तत्त्वः अस्ति। भवभूतिना महावीरचरिते, मालतीमाधवे च स्वपरिचयं सङ्केतितः। अस्य पूर्वजाः तैत्तिरीयशाखाध्यायिनः काश्यपगोत्रीयाः ब्राह्मणाः आसन्। जननी जतुकरणी, पिता च नीलकण्ठः आसीत्। भवभूतिः न्याय-मीमांसा-व्याकरणशास्त्राणां मूर्धन्यः विद्वान् आसीत्।

प्रस्तुतः पाठः उत्तरामचरितस्य 'छायाङ्क' इति नाम्ना तृतीयाङ्कात् उद्धृतः। सीतात्यागोपरान्तः रामः शम्बूकवधहेतुना दण्डकारण्ये गच्छति, यत्र स्वप्रियाम् सीताम् स्मृत्वा मर्मभेदी विलापं करोति। सीताऽपि स्वपुत्रयोः कुशलवयोः वर्षग्रन्थौ वाल्मीकि-आश्रमे गच्छति। दण्डकारण्ये रामञ्च पश्यति। गङ्गायाः प्रसादेन अदृश्या सीता रामं स्वशीतलस्पर्शेन पुनः पुनः नवजीवनं ददाति। श्रीरामस्य भावान्, करुण विलापं च श्रुत्वा सा स्वाकारण परित्यागस्य दुःखमपि विस्मृत्य मुक्ता भवति। लोकरञ्जनाय त्यागोपरान्तः रामविषयकः विलापः रामस्य पत्नीव्रतं, सीतां प्रति प्रेमञ्च अभिव्यञ्जति। अत्र भवभूतेः करुणरसः पुनः पुनः दीप्तः।

(ततः प्रविशति नदीद्वयम्)

एका – सखि मुरले, किमसि सम्भ्रान्तेव ?

मुरला – सखि तमसे, प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुम्। जानास्येव यथा वधूपरित्यागात् प्रभृति-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।**
**पुटपाकप्रतीकाशो रामस्य करुणो रसः।। १।।**

मुरला – तेन च तथाविधेष्टजन-कष्टविनिपातजन्मना प्रकृष्टतां गतेन दीर्घशोकसंतापेन संप्रत्यतितरां परिक्षीणो रामभद्रः। तमवलोक्य कंपितमिव कुसुमसमबन्धनं मे हृदयम्। अधुना च प्रतिनिवर्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः प्रदेशाः द्रष्टव्याः। तत्र निसर्गधीरस्याप्येवं विधायामवस्थाया-मतिगम्भीराभोगशोकक्षोभसंवेगात् पदे पदे महाप्रमादानि शोकस्थानानि शङ्कनीयानि रामभद्रस्य। तद् भगवति गोदावरी त्वया तत्र-भवत्या सावधानया भवितव्यम्।

**वीचिवातैः शीकरक्षोदशीतै, राकर्षद्भिः पद्मकिंजल्कगन्धान्।**
**मोहे मोहे रामभद्रस्य जीवं, स्वैरं स्वैरं प्रेरितैस्तर्पयेति ।। २।।**

तमसा – उचितमेव दाक्षिण्यं स्नेहस्य। सञ्जीवनोपायस्तु मौलिक एव रामभद्रस्याद्य संनिहितः।

मुरला – कथमिव ?

तमसा – तत्सर्वं श्रूयताम्-पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य निवृत्ते सति लक्ष्मणे सीता देवी प्राप्तप्रसववेदनमतिदुःख संवेगादात्मानं गङ्गाप्रवाहे निक्षिप्तवती।

तदैव तत्र द्वारकद्वयं च प्रसूता। भगवतीभ्यां भगीरथी-पृथिवीभ्यामस्युपपन्ना रसातलं च नीता। स्तन्यत्यागात् परेण दारकद्वयं च तस्य प्राचेतस्य महर्षे गङ्गादेव्या समर्पितं स्वयम्।

मुरला – (सविस्मयम्)

**ईदृशानां विपाकोऽपि जायते परमाद्भुतः।**
**यत्रोपकरणीभाव-मायात्येवं विधो जनः।। ३।।**

मुरला – अहमप्येतं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि। रामभद्रोऽप्यागत एवेति तर्कयामि।

तमसा – तदियं गोदावरी हृदान्निर्गत्य-

**परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम्।**
**करुणस्य मूर्तिरथवा शरीरिणी, विरहव्यथेव वनमेति जानकी।। ४।।**

मुरला – इयं हि सा-

**किसलयमिव मुग्धं बन्धनाद् विप्रलूनं**
**हृदयकमलशोषी दारुणो दीर्घशोकः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**ग्लपयति परिपाण्डु क्षाममस्याः शरीरं**
**शरदिज इव घर्मः केतकीगर्भपत्रम्।। ५।।**

(इति परिक्रम्य निष्क्रान्ते)

**( नेपथ्ये )**

जात ! जात !

(ततः प्रविशति पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता)

सीता – अहो, जानामि प्रियसखी वासन्ती व्याहरतीति।

(पुनर्नेपथ्ये)

**सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रै,**
**रग्रे लोलः करिकलभको यः पुरा वर्धितोऽभूत्।**

सीता – किं तस्य?

(पुनर्नेपथ्ये)

**वध्वा सार्धं पयसि विहरन् सोऽयमन्येन दर्पा-**
**दुद्दामेन द्विरदपतिना संनिपत्याभियुक्तः।। ६।।**

सीता – (ससम्भ्रमं कतिचित् पदानि गत्वा) परित्रायस्व परित्रायस्व। मम तं पुत्रकम्। (विचिन्त्य) हा धिक् आर्यपुत्र! हा धिक् ! तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति। हा आर्यपुत्र! (इति मूर्च्छति)

(प्रविश्य)

समाश्वसिहि। समाश्वसिहि।

(नेपथ्ये) विमानराज अत्रैव स्थीयताम्।

सीता – अहो जलभर-भरितमेघमन्थरस्तनित गम्भीरमांसलः कुतोन्वेष भारतीनिर्घोषो भ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटित्युत्सुकयति।

तमसा – (सस्मितास्रम्) अयि वत्से!

**अपरिस्फुटनिक्वाणे कुतस्त्येऽपि त्वमीदृशी।**
**स्तनयित्नोर्मयूरीव चकितोत्कण्ठितं स्थिता।। ७।।**

सीता – भगवति! किं भणसि अपरिस्फुटेति? स्वरसंयोगेन प्रत्यभिजानामि नन्वार्यपुत्रेणैवैतद् व्याहृतम्।

तमसा – वत्से समाश्वसिहि, समाश्वसिहि।

(नेपथ्ये)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अनेन पञ्चवटीदर्शनेन–

**अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः।**
**उत्पीडइव धूमस्य मोहः प्रागावृणोति माम्।।८।।**

हा देवि दण्डकारण्यप्रियसखि विदेहराजपुत्रि! (इति मूर्च्छति)

सीता – हा धिक्, हा धिक्, मां मन्दभागिनीं व्याहृत्यामीलित नेत्र–नीलोत्पलो मूर्च्छित एव। हा कथं धरणीपृष्ठे निरूद्ध–निःश्वासनिःसहं विपर्यस्तः? भगवति तमसे परित्रायस्व, परित्रायस्व, जीवयार्यपुत्रम्। (इति पादयोः पतति)

तमसा –

**त्वमेव ननु कल्याणि! संजीवय जगत्पतिम्।**
**प्रियस्पर्शो हि पाणिस्ते तत्रैष निरतो जनः।।९ ।।**

सीता – यद्भवतु तद् भवतु। यथा भगवत्याज्ञापयति।
(ततः प्रविशति भूम्यां निपतितः सास्रया सीतया स्पृश्यमानः सोह्लादोच्छ्वासो रामः)

सीता – जाने पुनः प्रत्यागतमिव जीवितं त्रैलोक्यस्य।

रामः – हन्त भोः, कमेतत्?

**स्पर्शः पुरा परिचितो नियतं स एव,**
**सञ्जीवनश्च मनसः परितोषणश्च।**
**सन्तापजां सपदि यः परिहृत्य मूर्च्छा–**
**मानन्दनेन जड़तां पुनरातनोति।। १०।।**

सीता – (ससाध्वसकरुणमुपसृत्य) एतावदेदानीं मम् बहुतरम्।

रामः – (उपविश्य) न खलु वत्सलया देव्याऽभ्युपपन्नोऽस्मि?

सीता – हा धिक्, हा धिक् किमित्यार्यपुत्रो मां मार्गिष्यते?

रामः – भवतु, पश्यामि।

सीता – भगवति तमसे अपसराव तावत् मां प्रेक्ष्यानभ्युनुज्ञातेन संनिधानेन राजाधिकं कोपिष्यति।

तमसा – अयि वत्से, भगीरथीप्रसादाद् वनदेवतानामप्यदृश्यासि संवृत्ता।

सीता – अस्ति खल्वेतत्?

रामः – हा प्रिये जानकि!

सीता – आर्यपुत्र, असदृशं खल्वेततस्य वृत्तान्तस्य। (सास्रम्) भगवति किमिति व्रजमयी जन्मान्तरेष्वपि पुनरप्यसम्भावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्यैवंवादिन–आर्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अहमेवैतस्य हृदयं जानामि, ममैषः।

राम: – (सर्वतोवलोक्य) (सनिर्वेदम्) हा न किञ्चिदत्र। देवि –

**प्रसाद इव मूर्तस्ते स्पर्शः स्नेहार्द्रशीतलः**
**अद्याप्यानन्दयति मां त्वं पुनः क्वासि नन्दिनि।। ११ ।।**

सीता – एते खलु तेऽगाधमानसंदर्शितस्नेहसंभारा आनन्दनिष्यन्दिनः सुधामया आर्यपुत्रस्योल्लापाः। जाने प्रत्यनेन निष्कारणपरित्याग-शल्यितोऽपि बहुमतो मे जन्मलाभः।

राम: – (सर्वतोऽवलोक्य) हा, कथं नास्त्येव? नन्वकरुणे वैदेहि!

सीता – अकरुणास्मि यैवंविधं त्वां पश्यन्त्येव जीवामि।

राम: – क्वासि प्रिये! देवि! प्रसीद प्रसीद। न मामेवं विधं त्यक्तुमर्हसि। कष्टं भोः

**व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्यं हरीणां वृथा,**
**प्रज्ञा जाम्बवन्तो न यत्र, न गतिः पुत्रस्य वायोरपि।**
**मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः**
**सौमित्रेरपि पत्रिणामविषये तत्र प्रिये! क्वासि मे।।१२।।**

सीता – बहुमानितास्मि पूर्वविरहे।

राम: – दुःखायैव सुहृदामिदानीम् रामदर्शनम्। तदनुजानीहि मां गमनाय।

सीता – (तमसामाश्लिष्य) हा भगवति तमसे, गच्छतीदानीमार्यपुत्रः। किं करोमि? (इति मूर्च्छति)

तमसा – वत्से जानकि! समाश्वसिहि। विधिस्तवानुकूलो भविष्यति। तदायुष्मतोः कुशलवयोर्वर्षर्द्धिमङ्गलानि संपादयितुं भागीरथीपदान्तिकमेव गच्छावः।

राम: – अस्ति चेदानीमश्वमेधसहधर्मचारिणी मे।

सीता – (साक्षेपम्) आर्यपुत्रः कः?

वासन्ती – परिणीतमपि किम्?

राम: – नहि, नहि, हिरण्यमयी सीताप्रतिकृतिः।

सीता – (सोच्छ्वासास्रम्) आर्यपुत्र, इदानीमसि त्वम्। अहो उत्खातितमिदानीं मे परित्यागशल्यमार्यपुत्रेण।

वासन्ती – महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं प्रति यथा कार्यहानिर्न भवति तथा कार्यम्।

राम: – तथास्तु।

(सर्वे निष्क्रान्ताः)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## पद्यानाम् अन्वयः-

१. गभीरत्वात् अनिर्भिन्नः अन्तर्गूढघनव्यथः रामस्य करुणः रसः पुटपाकप्रतीकाशः।

२. शीकरक्षोदशीतैः पद्मकिंजल्कगंधान् आकर्षद्भिः स्वैरं स्वैरं प्रेरितैः वीचिवातैः रामभद्रस्य मोहे मोहे जीवम् तर्पय इति।

३. ईदृशानां विपाकः अपि परमाद्भुतः जायते। यत्र एवंविधः जनः उपकरणीभावम् आयाति।

४. परिपाण्डुदुर्बलकपोलसुन्दरम् विलोलकबरीकम् आननम् दधती, जानकी करुणस्य मूर्तिः अथवा शरीरिणी विरहव्यथा इव वनम् एति।

५. हृदयकमलशोषी दारुणः दीर्घशोकः बन्धनात् विप्रलूनम् मुग्धम् किसलयमिव परिपाण्डु क्षामम् अस्याः शरीरं, शरदिजः घर्मः केतकीगर्भपत्रम् इव ग्लपयति।

६. पुरा अग्रे लोलः यः करिकलभकः सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रैः वर्धितः अभूत्। स अयम् वध्वा सार्धम् पयसि विहरन् अन्येन उद्दामेन द्विरदपतिना दर्पात् संनिपत्य अभियुक्तः।

७. स्तनयित्नोः अपरिस्फुटनिक्वाणे मयूरी इव त्वम् कुत्स्त्ये अपि ईदृशी चकितोत्कण्ठितं स्थिता।

८. अन्तर्लीनस्य अद्य उद्दामं ज्वलिष्यतः दुःखाग्नेः धूमस्य उत्पीडः इव मोहः माम् प्राक् आवृणोति।

९. कल्याणि! त्वम् एव ननु जगत्पतिम् संजीवय, हि ते पाणिः प्रियस्पर्शः तत्र एष जनः निरतः।

१०. पुरा परिचितः संजीवनः च मनसः परितोषणः च नियतम् स एव स्पर्शः यः सन्तापजां मूर्च्छाम् परिहृत्य सपदि आनन्देन पुनः जड़ताम् आतनोति।

११. स्नेहार्द्रशीतलः ते स्पर्शः मूर्तः प्रसादः इव अद्यापि माम् आनन्दयति, नन्दिनि! त्वम् पुनः क्व असि?

१२. यत्र मे कपीन्द्रसख्यम् अपि व्यर्थम्, हरीणाम् वीर्यम् वृथा, यत्र जाम्बवन्तः प्रज्ञा न, वायोः पुत्रस्य अपि यत्र गतिः न, यत्र विश्वकर्मतनयः नलः अपि मार्गम् कर्तुम् न क्षमः, सौमित्रेः अपि पत्रिणाम् अविषये तत्र क्व मे प्रिये असि?

## कठिनः शब्दार्थाः

| | | |
|---|---|---|
| **अनिर्भिन्नो** | – | अविदीर्णः, अव्यक्तः। |
| **गभीरत्वाद्** | – | स्वभावगाम्भीर्यात्, सघनवस्त्रमृत्तिकालेपसंयुक्तत्वात्। |
| **अन्तर्गूढ** | – | अन्तःकरणे गुप्तः। |
| **घनव्यथ** | – | प्रगाढ़ा व्यथा यस्य सः। |
| **पुटपाकप्रतीकाशः** | – | पुटे पात्रे पचनं तेन सदृशः। |
| **प्रकृष्टतां** | – | पराकाष्ठाम् प्राप्ताम्। |
| **परिक्षीणो** | – | अतीव कृशः। |
| **कुसुमसमबन्धनं** | – | कुसुमं इव कोमलं बन्धनम्। |
| **अतिगम्भीराभोग** | – | अति गम्भीरः यः आभोगः विस्तारः (गहरे विस्तार वाले)। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **वीचिवातैः** | – | तरङ्गवायुभिः (लहरों की वायु से)। |
| **शीकरक्षोदशीतैः** | – | जलकणानां क्षोदाः चूर्णाः तैः शीतलाः (जलकणों के बिन्दुओं से शीतल)। |
| **पद्मकिंजल्कगन्धान्** | – | कमलानां केसराः तेषां गन्धान् (कमल-पराग से सुगन्धित)। |
| **स्वैरं-स्वैरं** | – | मन्दं मन्दं (धीरे-धीरे)। |
| **दाक्षिण्यं** | – | औदार्यम् (उदारता)। |
| **सन्निहितः** | – | निकटस्थः (समीप)। |
| **निक्षिप्तवती** | – | समर्पितवती (सीता ने स्वयं को फेंक दिया)। |
| **प्राचेतस्य** | – | वाल्मीकेः (वाल्मीकि के)। |
| **विपाको** | – | विषमः परिणामः। |
| **उपकरणीभावम्** | – | सहायत्वम् प्राप्नोति (सहायता को प्राप्त होती है)। |
| **तर्कयामि** | – | चिन्तयामि (सोचती हूँ)। |
| **परिपाण्डु** | – | अतिशयं पीतवर्णम् (अत्यन्त पीले)। |
| **विलोलकबरीकमाननम्** | – | चञ्चलः केशपाशः यस्मिन् तत् आननम् (चञ्चल, बिखरे बालों वाले मुख को)। |
| **विप्रलूनम्** | – | विच्छिन्नम् (टूटे हुए)। |
| **दारुणो** | – | भयङ्करः, कठोरः। |
| **ग्लपयति** | – | म्लानं करोति (मुर्झा देता है)। |
| **क्षामम्** | – | कृशम्। |
| **घर्मः** | – | आतपः (धूप)। |
| **स्वकरकलितैः** | – | स्वहस्तेन दत्तैः (अपने हाथ से दी गई)। |
| **करिकलभकः** | – | हस्तिशावकः (हाथी का बच्चा)। |
| **सन्निपत्याभियुक्तः** | – | वेगात् समीपम् आगत्य आक्रान्तः (तेजी से पास आकर दबा लिया)। |
| **परित्रायस्व** | – | रक्ष (रक्षा करो)। |
| **समाश्वसिहि** | – | धैर्यं धारयतु (धैर्य धारण करो)। |
| **स्तनितः** | – | गम्भीरः गर्जनः। |
| **निर्घोषो** | – | स्वरः। |
| **अपरिस्फुटनिक्वाणे** | – | अस्पष्टः ध्वनिः तस्मिन्। |
| **प्रागावृणोति** | – | पूर्वं आच्छादयति। |
| **उत्पीडः** | – | राशिः। |
| **विदेहराजपुत्रि** | – | सीता (सम्बोधन)। |
| **नेत्रनीलोत्पलो** | – | नेत्रे एव नीलकमले येन सः। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **धरणीपृष्ठे** | – | पृथिवीतले, भूमौ। |
| **सास्त्रया** | – | अश्रु सहितया। |
| **सोल्हादोच्छ्वासो** | – | आह्लादेन, उच्छ्वासेन च युक्त:। |
| **सन्तापजां** | – | सन्तापेन जनितां, विरहदु:खोत्पन्नाम्। |
| **सपदि** | – | शीघ्रमेव। |
| **परिहृत्य** | – | दूरीकृत्य। |
| **पुनरातनोति** | – | पुन: प्रसारयति। |
| **उपसृत्य** | – | निकटं गत्वा। |
| **मार्गिष्यते** | – | अन्विष्यते (खोजेंगे)। |
| **प्रेक्ष्यानभ्युनुज्ञातेन** | – | प्रेक्ष्य (देखकर) आज्ञया विना (आज्ञा के बिना)। |
| **निरनुक्रोशा** | – | निर्दया। |
| **स्नेहार्द्रशीतल:** | – | स्नेहेन (प्रेम्णा) आर्द्र: स चासौ शीतल: शान्तिप्रद: (प्रेम से आर्द्र और शीतल)। |
| **नन्दिनि** | – | आनन्ददायि सीते (सम्बोधन)। |
| **आनन्दनिष्यन्दिन:** | – | रसवर्षिण:। |
| **उल्लापा:** | – | विलापा:। |
| **कपीन्द्रसख्यम्** | – | वानराणाम् इन्द्र: कपीन्द्र: सुग्रीव: तेन मित्रता (सुग्रीव की मित्रता)। |
| **हरीणां** | – | वानराणां। |
| **सौमित्रेरपि** | – | सुमित्राया: पुत्र: लक्ष्मण: तस्य अपि (लक्ष्मण के भी)। |
| **पत्रिणाम्** | – | बाणानाम्। |
| **अनुजानीहि** | – | आज्ञापयतु। |
| **आश्लिष्य** | – | आलिंग्य। |
| **हिरण्यमयी** | – | स्वर्णमयी (स्वर्ण से निर्मित)। |
| **उत्खातितम्** | – | दूरीकृतम् (काँटा निकाल दिया है)। |
| **शल्यम्** | – | कण्टकम्। |
| **व्यतिकरो** | – | समागम:। |
| **प्रसाद:** | – | अनुग्रह:। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठ-प्रश्नाः–

१. तमसा, मुरला च का स्तः ?

(क) लताद्वयम् (ख) पात्रद्वयम्

(ग) नदीद्वयम् (घ) सखिद्वयम् ( )

२. परित्यागोपरान्तः सीता आत्मानं कुत्र निक्षिप्तवती ?

(क) गोदावरीप्रवाहे (ख) गंगाप्रवाहे

(ग) रसातले (घ) वाल्मीकि-आश्रमे ( )

३. छायारूपिणी सीता रामं कुत्र अमिलत् ?

(क) दण्डकारण्ये (ख) जनस्थाने

(ग) पञ्चवटीवने (घ) आश्रमे ( )

४. सीता कस्य प्रसादात् अदृश्याऽभवत् ?

(क) लोपामुद्राप्रसादात् (ख) तमसाप्रसादात्

(ग) वनदेवताप्रसादात् (घ) भगीरथीप्रसादात् ( )

### अतिलघूत्तरात्मक-प्रश्नाः

प्र.१. विदेहराजपुत्री का आसीत् ?

प्र.२. सीतायाः पुत्रयोः किम् अभिधानम् ?

प्र.३. रामस्य अश्वमेध-सहधर्मचारिणी का आसीत् ?

प्र.४. स्तन्यत्यागोपरान्तं सीतायाः दारकद्वयं कुत्र नीतम् ?

प्र.५. 'कपीन्द्र' शब्दः कस्य कृते प्रयुक्तः ?

### लघूत्तरात्मक-प्रश्नाः–

प्र.१. गोदावरीह्रदात् आगच्छती सीता कीदृशी आसीत् ?

प्र.२. रामाय सीतायाः स्पर्शः कीदृशः आसीत् ?

प्र.३. तमसा सीतां कुत्र अनयत् ?

प्र.४. रामचन्द्रेण कृतानि सीतायाः सम्बोधननामानि लिखत ।

### निबन्धात्मक-प्रश्नाः–

प्र.१. रामानुसारेण सीताायाः प्राप्ति विषये के के व्यर्थाः अभवन् ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्र. २. अस्मिन् पाठे करुणरसस्य विश्लेषणं कुरुत ।

प्र. ३. 'छायाङ्क' इति नामस्य सार्थकतां प्रतिपादयतु।

**व्याकरणात्मक-प्रश्नाः–**

१. **अधो-लिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः -**

| | | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | एव + इति | = | ........................... | .......................... |
| (ख) | सन्निपत्य + अभियुक्तः | = | ........................... | .......................... |
| (ग) | कुतो +नु + एष | = | ........................... | .......................... |
| (घ) | निः + अनुक्रोशा | = | ........................... | .......................... |
| (ङ) | आर्यपुत्रस्य + उल्लापाः | = | ........................... | .......................... |

२. **अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विग्रहो विधेयः -**

| | सन्धिपदम् | | विग्रहः | सन्धिनाम |
|---|---|---|---|---|
| (क) | सम्भ्रान्तेव | = | ........................... | .......................... |
| (ख) | खल्वेतत् | = | ........................... | .......................... |
| (ग) | तत्रैष | = | ........................... | .......................... |
| (घ) | वर्धितोऽभूत् | = | ........................... | .......................... |
| (ङ) | प्रागावृणोति | = | ........................... | .......................... |

३. **निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः -**

| | समस्तपदम् | | विग्रहः | समासनाम |
|---|---|---|---|---|
| (क) | घनव्यथः | = | .................................... | ............................ |
| (ख) | विश्वकर्मतनयः | = | .................................... | ............................ |
| (ग) | जगत्पतिम् | = | .................................... | ............................ |
| (घ) | दीर्घशोकः | = | .................................... | ............................ |
| (ङ) | कपीन्द्रसख्यम् | = | .................................... | ............................ |

४. **अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -**

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | रामभद्रेण | .................. | ..................... | .................... |
| (ख) | भगवतीभ्याम् | .................. | ..................... | .................... |
| (ग) | त्रैलोक्यस्य | .................. | ..................... | .................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | | |
|---|---|---|---|---|
| (घ) | मनसः | .................... | ..................... | .................... |
| (घ) | वध्वा | .................... | ..................... | .................... |
| (ङ) | माम् | .................... | ..................... | .................... |

५. **निम्नलिखितानां तिङन्तपदानां धातुः लकारः पुरुषः वचनं च पृथक् निर्दिश्यताम् -**

| | तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | करोमि | ................. | ............... | .............. | .................. |
| (ख) | अस्ति | ................. | ............... | .............. | .................. |
| (ग) | आज्ञापयति | ................. | ............... | .............. | .................. |
| (घ) | ग्लपयति | ................. | ............... | .............. | .................. |
| (ङ) | भविष्यामि | ................. | ............... | .............. | .................. |
| (च) | गच्छाव: | ................. | ............... | .............. | .................. |

६. **निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक्-पृथक् लिख्यताम् -**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | भवितव्यम् | ........................ | ........................ |
| (ख) | स्पृश्यमानः | ........................ | ........................ |
| (ग) | नीता | ........................ | ........................ |
| (घ) | सम्पादयितुम् | ........................ | ........................ |
| (ङ) | परिहृत्य | ........................ | ........................ |
| (च) | निक्षिप्तवती | ........................ | ........................ |

**उत्तरमाला**

वस्तुनिष्ठात्मक-प्रश्नाः १. (ख) २. (घ) ३. (ग ) ४. (क)

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# एकादशः पाठः
# नीत्या स्वकार्यं साधनीयम्

पञ्चतन्त्रं नीतिकथासाहित्यस्य प्रथमं काव्यमस्ति। अस्य रचनाकारः विष्णुशर्मा आसीत्। पञ्चतन्त्रे पूर्वं द्वादशभागाः निबद्धा आसन् किन्तु साम्प्रतं पञ्चभागाः एव उपलभ्यन्ते– मित्रभेदः, मित्रलाभः, सन्धिविग्रहः, लब्धप्रणाशः, अपरीक्षितकारञ्चेति। सम्पूर्णे पञ्चतन्त्रे गद्यभागेन सह ११३ श्लोकाः ७५ उपकथाश्च समुल्लसन्ति। पञ्चतन्त्रस्य प्रथमोऽनुवादः पहलवी–भाषायां ख्रिस्तस्य षष्ठशताब्द्याम् अभवत्। पञ्चतन्त्रस्य रचनाकालः ईसवीयस्य तृतीयशताब्दी आसीत् इतिविदुषां विवेचनानुसारेणप्रतीयते।

महिलारोप्यराजा अमरशक्तेः त्रयः पुत्राः परं ते च मूर्खाः आसन्। एकदा स विष्णुशर्मणो शिक्षणविषये माहात्म्यं श्रुतवान् अतएव सत्कृत्य तमानीतवान्। अमरशक्तिः पुत्रत्रयं शिक्षयितुं निवेदितवान्। विद्वान् पं. विष्णुशर्मा अपि तान्पाठयितुं प्रतिज्ञातवान्। कथात्मकशिक्षणेन ते त्रयोऽपिराजपुत्राः स्वल्पकालेन एव विद्वांसः नीतिनिपुणश्चाभवन्।

सङ्कलितकथा पञ्चतन्त्रस्य चतुर्थ तन्त्रः लब्धप्रणाशतः गृहीता यस्यां प्रधानशिक्षा मिलति यद् बुद्धिमान् मनुष्यः स्वकार्यं नीत्या साधयति। अस्मिन् संसारे अनेकैः मनुष्यैः सह सम्पर्कः भवति, ते च भिन्न–भिन्नविचारवन्तः सन्ति। अधिकबलशालिनः अपि सन्ति, निर्बलाः अपि सन्ति। तैः सह पृथक्–पृथक् व्यवहारेण स्वकार्यं साधनीयम्। मूर्खास्तु केवलं अहङ्कारेण स्वकार्यहानिम् एव कुर्वन्ति। उत्तमपुरुषं नम्रतया प्रणम्य स्वकार्यं साधनीयम्, शूरः भेदनीत्या स्वानुकूलः कार्यः, यः निकृष्टः अस्ति किन्तु बलशाली वर्तते तस्य कृते स्वल्पप्रदानम् उचितम्, यश्च समपराक्रमः किं वा दुर्बलः सः पराक्रमेण जेतव्यः। एतदेव राजनीतेः मूलमन्त्रम्।

आसीत् कस्मिंश्चित् वनप्रदेशे महाचतुरको नाम श्रृगालः, तेन कदाचित् अरण्ये स्वयं मृतो गजः समासादितः। सः तस्य समन्तात् परिभ्रमति, परं कठिनां त्वचं भेत्तुं न शक्नोति। अथ अत्र अवसरे इतश्चेतश्च विचरन् कश्चित् सिंहस्तत्रैव प्रदेशे समाययौ। अथ सिंहः समागतं दृष्ट्वा, स क्षितितलविन्यस्तमौलिमण्डलः, संयोजितकरयुगलः, सविनयमुवाच– 'स्वामिन्! त्वदीयोऽहं लागुडिकः स्थितस्त्वदर्थं गजमिमं रक्षामि। तदेनं भक्षयतु स्वामी'।

तं प्रणतं दृष्ट्वा सिंहः प्राह – भो! नाहमन्येन हतं सत्त्वं कदाचिदपि भक्षयामि। उक्तञ्च –

**'वनेऽपि सिंहा मृगमांसभक्ष्याः, बुभुक्षिता नैव तृणं चरन्ति।**
**एवं कुलीना व्यसनाभिभूताः, न नीतिमार्गं परिलङ्घयन्ति'।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तत्तवैव गजोऽयं मया प्रसादीकृत:। तत् श्रुत्वा शृगाल: सानन्दमाह- युक्तमिदं स्वामिनो निजभृत्येषु। अथ सिंहे गते, कश्चित् व्याघ्र: समाययौ, तमपि दृष्ट्वा असौ व्यचिन्तयत्- अहो! एकस्तावद् दुरात्मा प्रणिपातेन अपवाहित:। तत्कथमिदानीमेनमपवाहयिष्यामि ? नूनं शूरोऽयं । न खलु भेदं विना साध्यो भविष्यति। उक्तञ्च यत: -

**'न यत्र शक्यते कर्तुं साम दानमथापि वा ।**
**भेदस्तत्र प्रयोक्तव्यो यत: स वशकारक:'** ।।

किञ्च- सर्वगुणसम्पन्नोऽपि भेदेन बध्यते, एवं सम्प्रधार्य तस्याभिमुखो भूत्वा गर्वादुन्त- कन्धर: ससम्भ्रममुवाच्– माम ! कथमत्र भवान् मृत्युमुखे प्रविष्ट:!। येन एष: गज: सिंहेन व्यापादित:। स च मामेतद्रक्षणे नियुज्य नद्यां स्नानार्थं गत:। तेन च गच्छता मम समादिष्टं– 'यदि कश्चिदिह व्याघ्र: समायाति तर्हि त्वया सुगुप्तम् ममाऽवेदनीयम्। येन वनमिदं मया निर्व्याघ्रं कर्तव्यम् । यत:- पूर्वं व्याघ्रेणैकेन मया व्यापादितो गज: शून्ये भक्षयित्वा उच्छिष्टतां नीत:। तद्दिनादारभ्य व्याघ्रान्प्रति प्रकुपितोऽस्मि।'

तत् श्रुत्वा व्याघ्र: सन्त्रस्त: तमाह– 'भो भागिनेय ! देहि मे प्राणदक्षिणाम्। त्वया तस्य अत्र चिराय आयातस्य अपि मदीया काऽपि वार्ता न आख्येया।' एवमभिधाय सत्वरं पलायाञ्चक्रे। अथ गते व्याघ्रे, तत्र कश्चित् द्वीपी समायात:। तमपि दृष्ट्वा असौ व्यचिन्तयत दृढदंष्ट्रोऽयं चित्रक:। तदस्य पार्श्वादस्य गजस्य यथा चर्मच्छेदो भवति, तथा करोमि। एवं निश्चित्य, तमप्युवाच– 'भो भगिनीसुत! किमिति चिरात् दृष्टोऽसि ? कथञ्च बुभुक्षित: इव लक्ष्यसे ? तदतिथिरसि मे। तदेष गज: सिंहेन हतस्तिष्ठति, अहञ्चास्य तदादिष्टो रक्षपाल:। परं- तथापि यावत्सिंहो: न समायाति, तावदस्य गजस्य मांसं भक्षयित्वा, तृप्तिं कृत्वा, द्रुततरं व्रज'।

स आह– माम! यद्येवं तन्न कार्यं मे मांसाशनेन, यत:- 'जीवन्नरो भद्रशतानि पश्यति'। तद् अहमितोऽपयास्यामि। शृगाल: आह– भो अधीर! विस्रब्धो भूत्वा, भक्षय त्वम् । तस्य आगमनं दूरतोऽपि तवाहं निवेदयिष्यामि।'

तथाऽनुष्ठिते, द्वीपिना भिन्नां त्वचं विज्ञाय, जम्बुकेनाऽभिहितं– भो भगिनीसुत! गम्यताम् । एष सिंह: समायाति।' तद् श्रुत्वा चित्रको दूरं प्रनष्ट:।

अथ यावदसौ तद्भेदकृतद्वारेण किञ्चिन्मांसं भक्षयति, तावदतिसंक्रुद्धोऽपर: शृगाल: समाययौ। अथ तमात्मतुल्यपराक्रमं दृष्ट्वैनं श्लोकमपठत्-

**उत्तमं प्रणिपातेन, शूरं भेदेन योजयेत्।**
**नीचमल्पप्रदानेन, समशक्तिं पराक्रमै: ।।**

(ततश्च) तदभिमुखकृतप्रयाण: स्वदंष्ट्राभिस्तं विदार्य, दिगन्तभाजं कृत्वा, स्वयं सुखेन चिरकालं हस्तिमांसं बुभुजे।

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## शब्दार्थाः

| | | |
|---|---|---|
| **समासादितः** | – | प्राप्तः (प्राप्त किया) |
| **समन्तात्** | – | परितः (चारों ओर) |
| **भेत्तुम्** | – | भेदनं कर्तुम्, छेत्तुं वा |
| **इतश्चेतः** | – | यत्र-तत्र (इधर-उधर) |
| **समाययौ** | – | समागतः |
| **दृष्ट्वा** | – | अवलोक्य (देखकर) |
| **लागुडिकः** | – | प्रहरी (पहरेदार) |
| **बुभुक्षिताः** | – | क्षुधिताः (भूखे) |
| **व्यसनाभिभूताः** | – | दुःखपीडिताः |
| **साध्यः** | – | साधनीयः |
| **वशकारकः** | – | वशकारी |
| **बध्यते** | – | वशीक्रियते |
| **उवाच** | – | अवोचत् |
| **नियुज्य** | – | नियुक्तं कृत्वा |
| **व्यापादितः** | – | मारितः |
| **नीतः** | – | प्रापितः |
| **भागिनेयः** | – | भगिनीपुत्रः (बहिन का पुत्र) |
| **द्वीपीः** | – | चित्रकः (चीता) |
| **व्यचिन्तयत्** | – | शुशोच (विचार किया) |
| **पार्श्वात्** | – | निकटात् |
| **रक्षपालः** | – | प्रहरी |
| **विस्रब्धम्** | – | आश्वस्तः |
| **समायाति** | – | आगच्छति |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठात्मक-प्रश्नाः–

१. 'नीत्या स्वकार्यं साधनीयम्' पाठः समुद्धृतोऽस्ति ?

(क) पञ्चतन्त्रात् (ख) हितोपदेशात्

(ग) दशकुमारचरितात् (घ) कादम्बरीतः ( )

२. पञ्चतन्त्रस्य रचयिता वर्तते ?

(क) बाणभट्टः (ख) दण्डी

(ग) विष्णुशर्मा (घ) नारायणपण्डितः ( )

३. भो भगिनीसुत ! कथमतिचिरात् दृष्टोऽसि ? अत्र 'भगिनीसुत' शब्दः प्रयुक्तोऽस्ति–

(क) सिंहाय (ख) जम्बुकाय

(ग) चित्रकाय (घ) व्याघ्राय ( )

४. 'नाहमन्येन हतं सत्त्वं कदाचिदपि भक्षयामि'– इति कस्य कथनम् ?

(क) सिंहस्य (ख) चित्रकस्य

(ग) शृगालस्य (घ) व्याघ्रस्य ( )

### अतिलघूत्तरात्मक-प्रश्नाः–

१. वनप्रदेशे किम् नाम शृगालः वसति स्म ?

२. महाचतुरकः अरण्ये स्वयं कः प्राप्तः?

३. 'स्वामिन् ! त्वदीयोऽहं लागुडिकः स्थितः.....' इति कः कथयति?

४. सिंहे गते शृगालस्य समीपे कः समाययौ ?

५. गते व्याघ्रे तत्र कः समायातः ?

६. भो भागिनेय देहि में प्राणदक्षिणाम् इति कस्य कथनमस्ति ?

### लघूत्तरात्मक-प्रश्नाः–

१. पञ्चतन्त्रस्य रचयितुः परिचयो दीयताम् ?

२. पञ्चतन्त्रस्य किं वैशिष्ट्यम् ?

३. महाचतुरेण शृगालेन सिंहः कथम् अपवारितः ?

४. व्याघ्रं शृगालः किम् अकथयत् ?

५. शृगालेन चित्रकः कथं दूरीकृतः ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### निबन्धात्मक-प्रश्नाः–

१. 'नीत्या स्वकार्यं साधनीयम्' कथानुसारेण शृगालस्य चरित्र-चित्रणं कुरुत ?

२. पञ्चतन्त्र ग्रन्थस्य परिचयं लिखत ?

३. उपायचतुष्टयस्य वर्णनं कुरुत ?

### व्याकरणात्मक-प्रश्नाः–

**(क) अधोलिखितपदानां सन्धिविच्छेदं कृत्वा नामापि लेख्यम्-**

| पदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| इतश्चेतश्च | .............................. | ......................... |
| तस्याभिमुखो | .............................. | ......................... |
| वनेऽपि | .............................. | ......................... |
| निर्व्याघ्रम् | .............................. | ......................... |
| कश्चित् | .............................. | ......................... |
| व्यचिन्तयत् | .............................. | ......................... |
| पार्श्वादस्य | .............................. | ......................... |

**(ख) अधोलिखितपदानां समासविग्रहं कृत्वा तस्य नामापि लेखनीयम्-**

| सामासिकपदम् | समासविग्रहः | समासनाम |
|---|---|---|
| संयोजितकरयुगलः | ................. | ................. |
| मृगमांसभक्ष्या | ................. | ................. |
| वशकारकः | ................. | ................. |
| सर्वगुणसम्पन्नः | ................. | ................. |
| उन्नतकन्धरा | ................. | ................. |
| अल्पप्रदानेन | ................. | ................. |
| भगिनीसुत | ................. | ................. |
| अश्रद्धेयम् | ................. | ................. |
| सानन्दम् | ................. | ................. |

**(ग) अधोलिखितपदानां विभक्तिः वचनञ्च लिख्यताम्-**

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| अरण्ये | ...................... | ........................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| गर्वात् | ...................... | ........................... |
| सिंहेन | ...................... | ........................... |
| चित्रकः | ...................... | ........................... |
| भगिनीसुत ! | ...................... | ........................... |

(घ) **अधोलिखितपदानां धातुः लकारः पुरुषः वचनञ्च लेखनीय–**

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| आसीत् | .......... | ........... | ........... | .......... |
| परिभ्रमति | .......... | ........... | ........... | .......... |
| उवाच | .......... | ........... | ........... | .......... |
| भक्षयतु | .......... | ........... | ........... | .......... |
| भविष्यति | .......... | ........... | ........... | .......... |
| देहि | .......... | ........... | ........... | .......... |
| सन्ति | .......... | ........... | ........... | .......... |

(ङ) **निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम्-**

| पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|
| भेत्तुम् | .......................... | .......................... |
| अभिभूताः | .......................... | .......................... |
| श्रुत्वा | .......................... | .......................... |
| तृप्तिम् | .......................... | .......................... |
| कार्यम् | .......................... | .......................... |

(च) **अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत् –**

| पदम् | वाक्यम् |
|---|---|
| भूत्वा | ............................................................................................... |
| प्रणिपातेन | ............................................................................................... |
| नीतिमार्गम् | ............................................................................................... |
| प्रयोक्तव्यः | ............................................................................................... |
| समायाति | ............................................................................................... |
| नियुज्य | ............................................................................................... |

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# द्वादशः पाठः

## मातृवन्दना-गीतिः

मरूभूमिरियं आधुनिक संस्कृतसाहित्यस्य रचनास्थली अस्ति। जयपुरनगरं तु 'अपराकाशी' अपि कथ्यते। डॉ. हरिरामआचार्यस्य जन्मः राजस्थानप्रान्ते 'स्वर्णनगरी' इति नाम्ना विख्याते जैसलमेरनगरे श्रीगणेशदत्त आचार्य महोदयस्य गृहे १९३६ तमे ख्रिष्टाब्दे अभवत्।

आचार्यमहोदयेन लघुकाशी इतिनाम्ना विख्यातम् 'जयपुरनगरम्' स्वकर्मक्षेत्रं अङ्गीकृतम्। राजस्थानविश्वविद्यालये 'प्रोफेसर', 'डीनफैकल्टी' चेतिपदम् अलंकुर्वन्, असंख्यान् छात्रान् शिक्षयन् संस्कुर्वन् च सुरभारतीम् आराधना कृता। भवता 'पूर्वशाकुन्तलम्, 'गाहा-सतसई', 'मधुच्छन्दा' आदिग्रन्थाः विरचिताः। तेन हिन्दीभाषायाम् कविता-संग्रहः, जैनागमानां, प्राकृत-ग्रन्थानां, गाथानाम् च काव्यानुवादः अपि कृतः। रङ्गमञ्चे प्रस्तुतिहेतु अनेकेषाम् नाटकानां रचनया, मञ्चनेन सह आचार्यमहोदयस्य चलचित्रे, आकाशवाण्यामपि विशिष्टः योगदानमस्ति। भवता राजस्थानप्रान्तस्य 'संस्कृतअकादमी' इति संस्थायाः अध्यक्षपदमपि अलंकृतम्।

अनेन 'राजस्थान-साहित्य-अकादमी' नाम्ना संस्थायाः सर्वोच्च 'मीरापुरस्कार' (१९७२ ई.), 'राजस्थानसंस्कृतअकादमी' संस्थायाः सर्वोच्चनाट्य पुरस्कारः (१९९८ ई.), 'मधुच्छन्दा' इति गीतिकाव्यस्य कृते 'माघपुरस्कारः' (२००१ ई.) अपि प्राप्तः। संस्कृतभाषायाः विस्ताराय, नवोन्मेषाय च राष्ट्रपतिपुरस्कारेण अपि सम्मानितः।

संस्कृतसाहित्ये गीतिकाव्य परम्परायाम् वैदिककालादेव सरसानां गीतिकाव्यानाम् रचना अजस्रास्ति। इमामेव परम्परां निर्वहन् डॉ. आचार्यः हृद्यं, भव्यं, सुश्राव्यं च गीतिकाव्यम् 'मधुच्छन्दा' इति रचितवान्। अस्मिन् काव्ये नवीनेषु गेय-छन्दसु रचिताः गीतिकाः सरसाः, सुमधुराः आह्लादकाश्च सन्ति। अनेन युगबोधपरकानां, भाव-प्रवणानां, प्रयोगधर्मीविषयाणाम् गीतिकानां न केवलं रचना कृता अपितु काव्यमञ्चेषु तासां पाठमपि कृतम्।

प्रस्तुतः पाठः मधुच्छन्दायां 'राष्ट्रिय' विषयान्तर्गते रचिताभ्यः गीतिकाभ्यः सङ्कलितः। अस्यां कविना मातृभूभारतेः वन्दनायाः आह्वानं कृतम्। मातृभूमेः स्वरूपाख्यानेन सह सुधिजनैः आचरणीया राष्ट्रियतायाः आख्यानं कृतम्। शुभाशंसनापि कृता यत् भारत-राष्ट्रं सुराष्ट्रं भवतु। सुशासनस्य लोकशासनस्य च स्थापना भवतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## मातृवन्दना-गीतिः

गीयतां गीयतां गीयताम् ,
अद्य मातृवन्दना मधुस्वरेण गीयताम्।
मातृभूरियं हि कर्मभूः पुराणमङ्गला।
सुविश्रुता तपोव्रता सुदर्शना सुवत्सला।
अनादि-धर्म-मालिनी,
अनन्त-पुण्य-शालिनी।
समृद्धि-बुद्धि-शक्तिदा सदैव मुक्तशृङ्खला।
चीयतां चीयतां चीयताम्,
भारतीयशो भृशं समस्त दिक्षु चीयताम्।।
स्वतन्त्रतामृतं सुपर्णकैः दिवः समाहृतम्।
हुतात्मभिः समर्पितं प्रभा-रतं सु-भारतम्।
न तत्र रक्तमण्डनम्,
भवेन्न शान्ति-खण्डनम्।
विपन्न रक्षणं सदैव शस्त्रिणां महाव्रतम्।
लीयतां लीयतां लीयताम्,
अन्धतामसी घृणा-निशा क्षणेन लीयताम्।।
भवेत् क्वचिन्न भ्रष्टता, न सच्चरित्र-दूषणम्।
मनुष्यता भवेत् समस्त-सम्प्रदाय-भूषणम्।।
विभिन्न-मार्ग-मण्डनाः
सुबन्धवः समे जनाः,
अनेकतासु चैकता हि संस्कृतेर्विभूषणम् ।।
पीयतां पीयतां पीयताम्,
बन्धु-भावना-सुधा-मुदा सदैव पीयताम्।।
न दीनलोकमोषणं न हीनभावपोषणम्।
न हिंसनं भवेत् क्वचिन्न वञ्चनं न शोषणम्।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

हितैषितैव वर्तताम्,
सुराष्ट्रकं प्रवर्धताम् ।
अकण्टकं नु भारतं भवेतभीति-काननम्।
धीयतां धीयतां धीयताम्,
वीतकल्मषं हि लोकशासनं विधीयताम् ।।

❀ ❀ ❀

## शब्दार्थाः

| | | |
|---|---|---|
| **कर्मभूः** | – | कर्मणां भूः (कर्मभूमि) । |
| **पुराणमङ्गला** | – | पुरातना च मङ्गला च । |
| **सुविश्रुता** | – | बहुश्रुता, सुविख्याता । |
| **तपोव्रता** | – | तपो एव व्रतो यस्याः सा । |
| **सुदर्शना** | – | सुष्ठुदर्शना । |
| **सुवत्सला** | – | श्रेष्ठ-संततिसंयुक्ता । |
| **शक्तिदा** | – | शक्तिम् ददाति या सा । |
| **मुक्तशृङ्खला** | – | मुक्ताशृङ्खला यस्याः सा (स्वतन्त्रा) । |
| **चीयतां** | – | वृद्धिं प्राप्नोतु । |
| **भृशं** | – | बहु। |
| **सुपर्णकैः** | – | शोभनाः पक्षाः यस्य सः सुपर्णः तैः (गरुड़ पक्षी)। |
| **समाहृतम्** | – | सम्यक् रूपेण आहूतम् (सूर्य की किरणों द्वारा)। |
| **हुतात्मभिः** | – | हुता आत्मा यैः तैः (स्वतन्त्रतासेनानियों के द्वारा)। |
| **प्रभारतम्** | – | कान्तिमत्। |
| **रक्तमण्डनम्** | – | रक्तेन मण्डनम्। |
| **विपन्नरक्षणम्** | – | विपन्नानाम् किंवा दीनजनानाम् रक्षणम्। |
| **शस्त्रिणाम्** | – | शस्त्राणि धारयन्ति ये तेषां। |
| **लीयताम्** | – | लीनं भवतु। |
| **अन्धतामसी घृणा निशा** | – | घृणारूपीतामसी-अन्धकारेणसंयुक्ता निशा। |
| **दूषणम्** | – | दोषम्, क्षयम्। |
| **मण्डनाः** | – | सुशोभिताः। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **मुदा** | – | मोद सहितम्। |
| **दीनलोकमोषणम्** | – | दीनानां लोकानां च मोषणं न भवेत्। |
| **हिंसनम्** | – | हिंसा। |
| **वंचनम्** | – | छलं, कपटम्। |
| **हितैषितैव** | – | हितस्य इच्छा एव। |
| **प्रवर्धताम्** | – | वृद्धिं प्राप्नोतु। |
| **अकण्टकम्** | – | कण्टकेन रहितम् भवतु। |
| **धीयताम्** | – | धारयतु। |
| **संस्कृतेर्विभूषणम्** | – | संस्कृत्याः आभूषणम्। |
| **वीतकल्मषम्** | – | निर्मलम्। |
| **लोकशासनम्** | – | लोकानां, प्रजानां शासनम्। |
| **भवेदभीतिकाननम्** | – | भयरहितं काननं, वनमिव भवेत्। |

## अभ्यासः

### वस्तुनिष्ठात्मक-प्रश्नाः–

**प्र. १.** सुदर्शना, सुवत्सला का कथिता ?

(क) प्रदेशभूः (ख) मातृभूः

(ग) माता (घ) स्वसृ ( )

**प्र. २.** पाठानुसारेण किं वर्तताम् ?

(क) सुराष्ट्रकम् (ख) हितैषितैव

(ग) सदाचरणम् (घ) लोकशासनम् ( )

**प्र. ३.** समस्त-सम्प्रदाय-भूषणम् किं नु भवेत् ?

(क) मनुष्यता (ख) सदाशयता

(ग) भ्रष्टता (घ) बन्धुता ( )

**प्र. ४.** 'शस्त्रिणां महाव्रतं किं अस्ति ?

(क) रक्तमण्डनं (ख) दीनलोकमोषणं

(ग) शान्ति-खण्डनं (घ) विपन्नरक्षणं ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्र.५. रिक्तस्थानपूर्तिः क्रियताम्–**

(क) समृद्धि–बुद्धि–शक्तिदा ................................................................... ।।

(ख) ....................................................... क्षणेन लीयताम्।

(ग) न दीनलोकमोषणं .......................................................................न शोषणम् ।।

(घ) धीयतां ................................................................... विधीयताम्।

## अतिलघूत्तरात्मक–प्रश्नाः–

प्र.१. मातृवन्दना कीदृशेन स्वरेण गीयताम् ?

प्र.२. कस्य दूषणं न भवेत् ?

प्र.३. कस्य मोषणं न भवितव्यम् ?

प्र.४. लोकशासनं कीदृशं विधीयताम् ?

## लघूत्तरात्मक–प्रश्नाः –

प्र.१. मातृभूः विशेषणानां वर्णनं कुरुत।

प्र.२. संस्कृतेः किं विभूषणम् ?

प्र.३. शस्त्रिणां महाव्रतं किं अस्ति ?

## निबन्धात्मक–प्रश्नाः–

प्र.१. मातृभूमेः स्वरूपवर्णनम् कुरुत ।

प्र.२. सुराष्ट्रस्य लोकशासनस्य च किं अवधारणास्ति ?

प्र.३. संस्कृतेः संरक्षणाय किं कर्तव्यम् ?

## व्याकरणात्मक–प्रश्नाः–

**१. अधो–लिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः –**

| | | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | एव + इति | = | .......................... | ............................ |
| (ख) | सन्निपत्य + अभियुक्तः | = | .......................... | ............................ |
| (ग) | कुतो +नु + एष | = | .......................... | ............................ |
| (घ) | निः + अनुक्रोशा | = | .......................... | ............................ |
| (ङ) | आर्यपुत्रस्य + उल्लापाः | = | .......................... | ............................ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विच्छेदो विधेयः -

| | सन्धिपदम् | | विच्छेदः | सन्धिनाम |
|---|---|---|---|---|
| (क) | हुतात्मभिः | = | ............................... | ........................... |
| (ख) | भवेन्न | = | ............................... | ........................... |
| (ग) | चैकता | = | ............................... | ........................... |
| (घ) | संस्कृतेर्विभूषणं | = | ............................... | ........................... |
| (ङ) | मातृभूरियम् | = | ............................... | ........................... |

३. निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः -

| | समस्तपदम् | | विग्रहः | समासनाम |
|---|---|---|---|---|
| (क) | दीनलोकमोषणम् | = | ............................... | ........................... |
| (ख) | अकण्टकम् | = | ............................... | ........................... |
| (ग) | वीतकल्मषम् | = | ............................... | ........................... |
| (घ) | लोकशासनम् | = | ............................... | ........................... |
| (ङ) | मातृवन्दना | = | ............................... | ........................... |

४. अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | स्वरेण | ........................ | .................... | ..................... |
| (ख) | दिक्षु | ........................ | .................... | ..................... |
| (ग) | शस्त्रिणाम् | ........................ | .................... | ..................... |
| (घ) | काननम् | ........................ | .................... | ..................... |
| (ङ) | सुपर्णकैः | ........................ | .................... | ..................... |

५. निम्नलिखितानां तिङन्तपदानां धातुः लकारः पुरुषः वचनञ्च पृथक् निर्दिश्यताम् -

| | तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | चीयताम् | ..................... | ............... | .................. | ................... |
| (ख) | समाहृतम् | ..................... | ............... | .................. | ................... |
| (ग) | वर्तताम् | ..................... | ............... | .................. | ................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(घ) प्रवर्धताम् ..................... ............... .................. ...................

(ङ) विधीयताम् ..................... ............... .................. ...................

(च) भवेत् ..................... ............... .................. ....................

६. **निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम् –**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | समर्पितम् | ........................ | ............................ |
| (ख) | रक्षणम् | ........................ | ............................ |
| (ग) | वञ्चनम् | ........................ | ............................ |
| (घ) | मनुष्यता | ........................ | ............................ |
| (ङ) | भारतम् | ........................ | ............................ |

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# त्रयोदशः पाठः

## सङ्घे शक्तिः

प्रस्तुतः पाठः पं. नवलकिशोरकाङ्करेण विरचितात् प्रबन्धमकरन्दात् समुद्धृतः। रचनाकारस्य जन्म १९१० तमे ईस्वीयेवर्षे जयपुरे अभवत्। शिक्षां गृहीतवता नवलकिशोरेण स्वकीयप्रतिभाबलाद् गद्य-पद्यरचनायां प्रावीण्यमधिगतं। शास्त्रसर्वस्वम्, प्रबन्धामृतम्, प्रबन्धमकरन्दश्च इत्यादयः निबन्धसंग्रहाः संस्कृतसेविसमाजे सुतरां समादरणीयाः सन्ति। कविभूषणः, कविशिरोमणिः, विद्यावाचस्पतिः, महामहिमोपाध्यायः, गद्यसम्राट्-शास्त्रमार्तण्डेत्यादिभिरुपाधिभिरेते व्यूभूष्यन्त। १९८५ ई. वर्षे भारत-राष्ट्रपतिना सम्मानिताः इमे। एते हि राष्ट्रीय-भावनानां प्रबलाः पोषकाः आसन्।

पाठेऽस्मिन् संगठनशक्तेः माहात्म्यं वर्णितमस्ति। धनधान्यसुसम्पन्नं स्वर्णरत्नमयाकरं राष्ट्रम् अपि सुसंहतिं विना विभवास्पदं न भवेद्। सुसङ्घटितजीवनम् एव राष्ट्रभावस्य कारणं भवति। लोके लोकसङ्घटनम् आततायिनां परिध्वंसने सुदर्शनचक्रवत् नूनम् आयुधमैश्वरम्।

ईशोपनिषदि अपि कथ्यते- '**सम्भूत्याम् अमृतमश्नुते**' अर्थात् संगठनेनैव अमृत-तत्त्वस्य प्राप्तिर्भवति। संगठनस्य महत्त्वस्य प्रतिपादनं कृत्वा डॉ. श्रीधर-भास्कर-वर्णेकरः कथयति -

**अपारभूमिविस्तारमगण्यजनसंकुलम्।**
**राष्ट्रं सङ्घटनाहीनं प्रभवेन्नात्मरक्षणे।।**
**विपत्सु वज्रधैर्याणां संग्रामेवज्रदेहिनाम्।**
**सङ्घो राष्ट्रविपत्काले सद्वज्रकवचायते।।**

नारायणपण्डितः हितोपदेशे कथयति-

**अल्पानामपिवस्तूनां संहतिः कार्यसाधिका।**
**तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः।।**

पुरातनकाले कृतयुगे या शक्तिः मन्त्रप्रयोगे आसीत्, त्रेतायां या तन्त्रसाधने आसीत् द्वापरे च या व्यूहरचने आसीत्, सा हि शक्तिः कलौ सङ्घेः सङ्घीभूता। अतः साधूच्यते "**सङ्घे शक्तिः कलौ युगे**" -

स्वभावतः एव मानवाः सर्वत्र विजयं कामयन्ते, किन्तु विचारणीयोऽयं विचारो यत् कामनामात्रेण किं कश्चन स्वकर्मणि प्रयत्नं विना साफल्यं लभते ? शक्तिद्वारैव सर्वं कर्तुं शक्यते। माताऽपि तनयं रोदनं विना न स्तन्यं पाययति। जगति यो यावान् शक्तिमान् भवति स तावानेव समुन्नतेः शिखरमारोहति। शक्तिशाली हि देशोऽपरं हीनशक्तिकं देशमनयासेन स्वात्मसात् करोतीति प्रत्यक्षमेव सर्वेषां, शक्तिशून्यो मानवः स्वप्नेऽपि



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शत्रुं जेतुं न पारयति। किं ज्वरादिरोगग्रस्तो जनः शक्तिमता सह युद्धे विजयं लप्स्यते ? नैव नैव, हेतुरत्र शक्तेरभाव एव। अतः प्रभविष्णुभिरस्माभिः जीवनं सुखेन यापयितुं शक्तिसंग्रहोऽवश्यं करणीयः।

इदमप्यवधेयं यत् का सा शक्तिः ? कथं च सा लभ्या ? कुत्र च तस्याः स्थानम् ? यस्या अभावेन लोका अवनतेर्गर्तमनुपतन्ति। कृते विचारे शक्तिपदेन बलमेव गृह्यते लोके। तद् बलं साम्प्रतं सङ्घे एव निवसति। अस्या एव बलस्वरूपायाः शक्तेः साम्प्रतमत्यावश्यकता वरीवर्ति। सा चेयं शक्तिः करालेऽस्मिन् महाकालकल्पे कलिकाले सङ्घटनद्वारैव प्राप्तुं शक्यते, उक्तञ्च – '**नान्यः पन्थाः विद्यतेऽयनाय**'। जातिः, व्यक्तिः, सामाजिकस्थितिः, किमन्यत् सम्पूर्णदेश एव सङ्घटनाद् हि स्व-सत्तां बिभर्ति। यत्र संघटनं तत्र सर्वसम्पत्तिः, यत्र च विघटनं तत्र सर्वविपत्तिरिति निश्चितम्। पाश्चात्यदेशानां चञ्चला चमत्कृतिमती प्रगतिः सङ्घटनाश्रितैवेति प्रत्यक्षं सर्वेषाम्।

परं हन्त हन्त ! अस्माकं दुर्दशानिदानस्य चिन्तनेनैव कम्पितं जायते चेतः। महत्कष्टमापतितं यदद्य भगवतः कृपया प्राप्तायामपि स्वतन्त्रतायां वयं नैतन्महत्त्वं जानीमः। अतीतं न स्मरामः स्वदेशस्य दयनीयां दशाञ्च न पश्यामः। प्रत्युत भयात्, मोहात्, अज्ञानाद्, अन्यस्माद् वा अलक्षितात् कारणाद् भीता इव सङ्घटनात्मिकां बुद्धिं दूरतस्त्यजामः, पवित्रात्मान इव न तां स्पृशामः, भूताविष्टा इव वा व्यर्थकोलाहलमाचरामः किन्तु निश्चप्रचमिदं यत् सङ्घटने सञ्जाते एवास्माकं देशः पूर्ववत् जगद्गुरुपदमलङ्करिष्यति। परिस्थितिं पश्यन्तो वयं यदा रागद्वेषादिकं विहाय सङ्घटनस्य महत्त्वं सम्यगभिनन्दिष्यामः तदैव वास्तविकं समुन्नतपदं प्राप्स्यामः। अत्र विषये स्वनामधन्यानां श्रीशिववीरमहाराणाप्रतापादिमहापुरुषाणामाचरणम् अनुकरणीयमस्ति।

सङ्घटनद्वारा किं न भवति ? किमस्ति दुष्करं कर्म यत् सङ्घटनशक्त्या सुकरं न जायते ? अस्माकं पूर्वजानां सङ्घटन-सम्बन्धिन्यो गौरवगाथाः सम्पूर्णविश्वस्य पुनरावृत्तपृष्ठेषु सुवर्णाक्षरैरंकिताः सन्ति। पुनः किमद्य कारणं, यद् वयं स्वकीयां महतीं शक्तिं विस्मृतिगर्ते निपात्य अकर्मण्या भूत्वा तिष्ठामो निजं दिष्टं च दुष्टं घोषयन्तः शपामहे ? परं पूर्णं विश्वसिमो यत्कदाचित् समयोऽपि स समेष्यति यत्रास्माकं हृदयेषु सङ्घटनसागरसुधोर्मयो महता वेगेन स्फुरिष्यन्ति याश्च न कश्चिदपि रोत्स्यति। दिनेष्वेषु सङ्घटनशक्तेः फलं प्रत्यक्षमपि विलोक्यतेऽत्र यदिदानीं लोका असम्भवमपि कार्यं सम्भवं कुर्वन्तः सङ्घटनस्य माहात्म्यं चरितार्थयिष्यन्ति। वस्तुतः सङ्घटने एव शक्तिनिवासः।

## शब्दार्थाः

**तनयम्** – पुत्रम्

**स्तन्यम्** – दुग्धम्

**हीनशक्तिकम्** – बलरहितम्, (बलहीन को)।

**प्रभविष्णुभिः** – सामर्थ्ययुक्तैः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| **यापयितुम्** | – | व्यतयितुं (बिताने के लिए), याप् + तुमुन् । |
| **अवधेयम्** | – | जानना चाहिए। |
| **अनुपतन्ति** | – | गिरते हैं, अनु +पत् धातु, लट् लकार, प्रथम पुरुषः, बहुवचनम्। |
| **वरीवर्ति** | – | स्वीकरोति। |
| **बिभर्ति** | – | धारणं करोति, ( भरना, व्याप्त होना) भृ धातु (जुहोत्यादिगण, लट् प्र.पु.) |
| **हन्त** | – | कष्टम् |
| **भूताविष्टाः** | – | भूतेन आक्रान्ताः, भूत + आविष्टाः (दीर्घ सन्धि) |
| **कलिकाले** | – | कलियुगे, कलिकाले, सप्तमी एकवचनम्। |
| **भीता** | – | भयावृत्ता |
| **निश्चप्रचम्** | – | सुनिश्चितम् |
| **विहाय** | – | त्यक्त्वा, वि + हा + ल्यप् । |
| **दुष्करम्** | – | कठिनम् |
| **सुकरम्** | – | सरलम् |
| **पुरावृताः** | – | पूर्ववर्णितः |
| **विस्मृतिगर्ते** | – | विस्मृतिगह्वरे |
| **सुधोर्मयः** | – | अमृततरङ्गः, सुधा +उर्मयः (गुण सन्धि) |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. 'सङ्घे शक्तिः' पाठः सङ्कलितोऽस्ति–

(क) यात्राविलासात् (ख) प्रबन्धमकरन्दात्

(ग) प्रबन्धामृतात् (घ) शास्त्रसर्वस्वात् ( )

२. 'सङ्घे शक्तिः कलौयुगे' इति कथितम्–

(क) वेदव्यासेन (ख) चाणक्येन

(ग) नवलकिशोरेण (घ) बाणभट्टेन ( )

३. 'सङ्घटनद्वारा किं न भवति'? अत्र सङ्घटनशब्दः कस्मिन् अर्थे प्रयुक्तोऽस्ति–

(क) सामूहिक–शक्तिः (ख) सैन्यशक्तिः

(ग) मनवचनकर्मभिः एकीभूता जनानां शक्तिः (घ) सामाजिकशक्तिः ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**४. रिक्तस्थानपूर्तिः क्रियताम्–**

(क) माताऽपि तनयं रोदनं विना न..............पाययति।

(ख) तद् बलं साम्प्रतं.............एव निवसति।

(ग) नान्यः..........विद्यतेऽयनाय।

(घ) वस्तुतः.............एव शक्तिनिवासः।

### अतिलघूत्तरात्मक-प्रश्नाः–

१. स्वभावतः एव मानवाः किं कामयन्ते ?

२. शक्तेः स्थानं कुत्र ?

३. शक्तिः कथं लक्ष्या?

४. कलौ युगे शक्तिस्वरूपं कीदृशम् ?

### लघूत्तरात्मक-प्रश्नाः–

१. पं. नवलकिशोरकाङ्करस्य परिचयं लिखत?

२. कः मानवः शत्रुं जेतुं न पारयति ?

३. अस्माकं दुर्दशानिदानं कथं भवेत् ?

### अधोलिखितवाक्येषु रेखाङ्कितान् पदान् आश्रित्य प्रश्ननिर्माणं कुरुत–

(क) मानवाः सर्वत्र विजयं कामयन्ते।

.................................................................................. ?

(ख) शक्तिशून्यो मानवः स्वप्नेऽपि शत्रुं जेतुं न पारयति।

.................................................................................. ?

(ग) सङ्घटनशक्त्या सुकरं जायते।

.................................................................................. ?

(घ) सङ्घटने एव शक्तिनिवासः।

.................................................................................. ?

### निबन्धात्मक-प्रश्नाः–

१. 'सङ्घटनस्य महत्त्वं' सविस्तरं लिखत ?

२. 'सङ्घे शक्तिः कलौयुगे' अस्य कथनस्य आशयं लिखत ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. अस्मात् पाठात् का शिक्षा मिलति ' इति सविस्तारं लिखत ?

## व्याकरणात्मक-प्रश्नाः-

**१. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा नामापि लेख्यम्-**

| | पदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | शक्तिद्वारैव | .................. | .............. |
| (ख) | स्वप्नेऽपि | .................. | ............... |
| (ग) | भूताविष्टा | .................. | .............. |
| (घ) | याश्च | .................. | ............... |

**२. अधोलिखितेषु समस्तपदेषु नामनिर्देशपूर्वकं समासविग्रहो विधेयः-**

| | समस्तपदम् | विग्रहः | समासः |
|---|---|---|---|
| (क) | भूताविष्टाः | ................ | ............. |
| (ख) | गौरवगाथाः | ................ | ............. |
| (ग) | अभावेन | ................ | ............. |
| (घ) | शक्तिशून्याः | ................ | ............. |

**३. अधोलिखितपदानां विभक्तिः वचनञ्च लिख्यताम्-**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | जगति | .............. | ............ |
| (ख) | शक्तेः | .............. | ............ |
| (ग) | अस्माकम् | .............. | ............ |
| (घ) | कारणाद् | .............. | ............ |
| (ङ) | संघटने | .............. | ............ |

**४. निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम्-**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | शक्तिमान् | ....................... | ......................... |
| (ख) | जेतुम् | ....................... | ......................... |
| (ग) | करणीयः | ....................... | ......................... |
| (घ) | निपात्य | ....................... | ......................... |
| (घ) | भूत्वा | ....................... | ......................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. **अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत –**

| पदम् | वाक्यम् |
|---|---|
| (क) कश्चन् | ........................................................................................ |
| (ख) साम्प्रतम् | ........................................................................................ |
| (ग) एव | ........................................................................................ |
| (घ) अपरम् | ........................................................................................ |
| (ङ) यत् | ........................................................................................ |

६. **निम्नलिखितवाक्यानां वाच्यपरिवर्तनं कुरुत–**

(क) मानवाः सर्वत्र विजयं कामयन्ते।

(ख) बलं साम्प्रतं सङ्घे एव निवसति।

(ग) शक्तिद्वारैव सर्वं कर्तुं शक्यते।

(घ) जनः युद्धे विजयं लप्स्यते।

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# चतुर्दशः पाठः
# पितामही मिलिता

प्रस्तुता कथा आधुनिकसंस्कृतसाहित्यस्य सुप्रसिद्धेन साहित्यकारेण आचार्यनारायणशास्त्रीमहोदयेन विरचिता। अर्वाचीनसाहित्ये विभिन्नभाषाणां विविधाः विधाः अपि संस्कृते गृहीताः। लघुकथाभिः सह दीर्घकथानां प्रणयनम् अपि विशंतितमे ख्रिस्ताब्दे पर्याप्तमात्रायामभवत्। आसु कथासु सहजप्रवाहमयभाषायाः, भावानां च समावेशः तु भवत्येव, समाजस्य कृते सन्देशः अपि भवति। आचार्य नारायणशास्त्रीकांकरमहोदयस्य कथासु अपि समाजोपयोगीविषयाणां सुष्ठु लेखनं दृश्यते।

प्रस्तुता कथा आधुनिकसमाजस्य, परिवारस्य च महतीं समस्याम् प्रति सङ्केतं करोति। पुरा संयुक्ते परिवारे आबालवृद्धानां सर्वेषां सदस्यानां महत्त्वं भवति स्म, किन्तु परिवारस्य विघटित्वात् बालानां वृद्धानां च स्थितिः परिवर्तिता। विशेषतः अर्थार्जने संलग्नौ पतिः-पत्न्यौ बालान् वृद्धान् च सम्यक् रूपेण पालयितुम् न शक्नुतः, तदा वृद्धानां कृते वृद्धाश्रमाणां परम्परा प्रारब्धा। किन्तु वृद्धाश्रमेषु निवसन्तः वृद्धाः स्वोपेक्षया अपमानं अनुभवन्ति। अस्याम् कथायाम् अपि एषा एव पीडा वर्णिता। पुत्रः त्रिलोचनः पुत्रवधुः इन्दुमती च शकुन्तलां वृद्धाश्रमे नयतः, तत्र परित्यजतः। किन्तु स्वत्रिचतुर्वर्षीयस्य पुत्रस्य कृते (यः स्व पितामहीम् अतीव स्मरति) तौ स्वमातारम् वृद्धाश्रमात् आनयतः। सत्यं एव वृद्धजनाः स्नेहात्, समयात् परं अन्यं किमपि नेच्छन्ति।

## पितामही मिलिता

पितरि दिवं गते माता स्वपुत्रं त्रिलोचनं येन केन प्रकारेण आर्थिक-कष्टानि सहित्वा अपि पालितवती, पोषितवती, वर्धितवती च। तं पाठयित्वा, लेखयित्वा विद्वांसं निर्मातुं सा कामपि न्यूनतां न अरक्षत्। शिक्षकाः अपि आत्मीयं सर्वम् अपि ज्ञानं तस्मिन् सत्पात्रे निहितवन्तः। सत्यम् एव एकः विनय-सम्पन्नः सदाचारी शिष्यः गुरुं सर्वथा प्रसन्नं कृत्वा दुर्लभाम् अपि विद्यां सुलभते। विवाह-योग्याम् अवस्थां प्राप्तवता तेन सह स्वात्मजायाः विवाहं कर्तुम् इच्छुकाः अनेके सम्पन्नाः जनाः उपस्थिताः। सा प्रतिवेशिनः ग्रामस्य पटवारिणः कन्यां स्वपुत्रवधूं निर्माय गृहम् आनीतवती।

अधुना गृहे त्रयः प्राणिनः आसन्- एका सा स्वयं, द्वितीयः पुत्रः त्रिलोचनः, तृतीया इन्दुमती पुत्रवधुः च। त्रिलोचनस्य वैदुष्येण सन्तुष्टः शिक्षाविभागः तस्मै स्वकीये एव ग्रामे बालकबालिकान् शिक्षयितुं विद्यालये शिक्षकपदे नियुक्तिं दत्तवान्। पुत्रवधुः अपि स्वगृहे एव बालिकाभ्यः जीवनोपयोगि-कलानां शिक्षणं दातुं प्रारब्धवती। पुत्रवधूः शनैः शनैः बालिकानां माध्यमेन तासां सम्बन्धिनीषु प्रौढ-गृहमहिलासु शिक्षां प्रति रुचिं जागरितवती। ताः महिलाः अपि स्वबालिकाभिः सह तत्र एव उपस्थिताः भूत्वा पठन-लेखन-शिक्षां प्राप्तुं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रवृत्ता:। केषुचित् एव वर्षेषु सर्व: एव ग्राम: स्त्रीशिक्षाया: सम्बन्धे समृद्ध: सञ्जात:। विदुषी इन्दुमती अधुना एका आदर्श-शिक्षिका मन्यते स्म। राज्यसर्वकारेण अपि सा शिक्षक-दिवसे सम्मानिता आसीत्। एवं पुत्रस्य त्रिलोचनस्य, पुत्रवध्वा: इन्दुमत्या: च यशश्चित्तया, समृद्धिमत्तया च मातु: शकुन्तलाया: चित्तम् अति प्रसन्नम् आसीत्। इदानीं तस्या: एक एव कामना अवशिष्टा यत् सा पौत्रमुखं दृष्ट्वा एव दिवं गच्छेत्। एतदर्थं सा प्रतिदिनं प्रात: जलाभिषेकं कुर्वन्ती उमाशंकरं प्रार्थयते स्म। तस्या: प्रार्थना सफला जाता। यथासमयं इन्दुमती एकं सुन्दरं शिशुं प्रसूतवती। तदीयं मुखचन्द्रं विलोकयन्त्या: पितामह्या: शकुन्तलाया: मन: तृप्यति स्म एव न।

यथा हि सर्वेषु परिवारेषु भवति, शिशो: लालन-पालनयो: रतायै इन्दुमत्यै श्वश्रूसेवां कर्तुं पर्याप्त: समय: न मिलति स्म। जानति अपि वृद्धावस्थां प्राप्ता शकुन्तला स्वकीयान् रोषमयान् उद्गारान् प्रकटयति स्म एव। किन्तु अस्मिन् आत्मकृत्ये सा अवश्यं पश्चात्तपति स्म। श्वश्र्वा: कटु-व्यवहारं इन्दुमती भर्तु: त्रिलोचनस्य अपि सम्मुखे प्रबोधितवान्। किन्तु यदा अनेन समस्याया: समाधानं न अभवत् तदा स: अपि चिन्तित: स्थातुं प्रवृत्त:।

एकस्मिन् दिने इन्दुमती भर्तारं त्रिलोचनम् उपायं दर्शितवती, यद् अधुना वृद्धाश्रमे एव मातरं प्रापय्य निश्चिन्तताया: अनुभव: क्रियेत्। अनेन तत्र स्वसमवयस्काभि: सह माता अपि सुखिनी स्थास्यति, वयम् अपि इह दु:खोन्मुक्ता: भविष्याम:। त्रिलोचन: इन्दुमत्या: प्रस्तावेन तत्कालम् एव सहमत: अजायत। अवसरं दृष्ट्वा स: मातरं तदर्थम् अनुकूलाम् अपि कृतवान्।

त्रिलोचनं मातरं वृद्धाश्रमे प्रापय्य आगत:, किन्तु तस्य मन: नैव रमते स्म। यदि स: एकाकी अभविष्यत् तर्हि मातु: प्रत्येकम् इच्छां पूरयित्वा तां प्रसन्नाम् अरक्षिष्यत्, किन्तु पत्न्या: अपि मन: तेन रक्षणीयम् आसीत् एव।






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

इदानीं तयोः आत्मजः त्रिचतुर-वर्षात्मकः जातः आसीत्। पितुः मातुः उपस्थितौ अपि सः पितामहीम् एव विशेषरूपेण इच्छति स्म। अतः यदा बालकः स्वकीयां पितामहीं गृहे न दृष्टवान्, तदा सः दुःखी भूत्वा बहु-बहु रुदितवान्। सः न किंचित् अखादत्, न किंचित् अपिबत्। निरन्तरं तस्य मुखे 'पितामहि ! पितामहि ! इदम् एव रटनम् आसीत्। रुदतः रुदतः तस्य कण्ठः शुष्यति स्म।

आत्मजस्य एतां दुरवस्थां द्रष्टुम् असमर्थो दम्पती अन्ते वृद्धां वृद्धाश्रमतः आनेतुं निश्चयं कृतवन्तौ एव। तत्र ताभ्यां सह गतः बालकः पर्यपृच्छत् च- पितामहि ! त्वं मां त्यक्त्वा किमर्थम् अत्र आगतवती ? चल गृहं चल, दम्पती अपि तस्य एव कथनं समर्थितवन्तौ। अन्ये वृद्धाश्रमवासिनः चिन्तयन्ति स्म यत् अस्मान् अपि नेतुं गृहतः कश्चित् आगच्छेत् इति।

❀ ❀ ❀

## शब्दार्थाः

| | | |
|---|---|---|
| **पाठयित्वा** | – | पाठनं कृत्वा (पठ् + णिच् + क्त्वा)। |
| **स्वात्मजायाः** | – | स्वकीयां आत्मजा (पुत्री) तस्याः। |
| **प्रतिवेशिनः** | – | प्रतिवेशे वसन्ति ये (पडौसी)। |
| **जलाभिषेकम्** | – | शिवलिङ्गे जलसिंचनं इति। |
| **श्वश्रुः** | – | पत्युः माता (सास)। |
| **भर्तारम्** | – | पतिं (भर्तृ शब्द, द्वितीया एकवचन)। |
| **स्वसमवयस्काभिः** | – | समानायुः अस्ति यासां ताभिः। |
| **दुखोन्मुक्ताः** | – | दुखेभ्यः उन्मुक्ताः। |
| **पितामहीम्** | – | पितुः माता (दादी) तम्। |
| **रटनम्** | – | पुनः पुनः उच्चारणम्। |
| **सोपालम्भम्** | – | उपालम्भ सहितं (उलाहने के साथ)। |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. त्रिलोचनस्य मातुः किं नाम आसीत् ?

(क) पार्वती (ख) सीता
(ग) शकुन्तला (घ) इन्दुमतिः ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. त्रिलोचनस्य विवाहः कया सह अभवत् ?
   (क) चन्द्रमत्या (ख) इन्दुमत्या
   (ग) बुद्धिमत्या (घ) सिद्धमत्या ( )

३. इन्दुमतिः केन सम्मानिता ?
   (क) राज्यसर्वकारेण (ख) ग्रामपंचायतेन
   (ग) शिक्षाविभागेन (घ) केन्द्रसर्वकारेण ( )

४. त्रिलोचनस्य श्वसुरः कस्यां सेवायाम् आसीत् ?
   (क) पटवारः (ख) सरपंचः
   (ग) शिक्षकः (घ) न कोऽपि ( )

## अतिलघूत्तरात्मक-प्रश्नाः –

१. त्रिलोचनः कुत्र नियुक्तिम् अप्राप्नोत् ?
२. इन्दुमतिः बालिकानां कृते किं प्रारब्धवती ?
३. इन्दुमति ग्रामस्य प्रौढमहिलानां कृते किं कर्तुं प्रवृत्ता ?
४. त्रिलोचनस्य पुत्रस्य आयुः कियद् आसीत् ?

## लघूत्तरात्मक प्रश्नाः –

१. शकुन्तलायाः परम् इच्छा का आसीत् ?
२. कामना पूर्त्यर्थं सा किं करोति स्म ?
३. इन्दुमत्या स्वश्वश्रुः वृद्धाश्रमे किमर्थं प्रेषिता ?
४. पितामहीं न दृष्ट्वा पौत्रस्य अवस्था कीदृशी आसीत् ?
५. पुत्रस्य दुरावस्थां दृष्ट्वा तौ किं कृतवन्तौ ?

## निबन्धात्मक प्रश्नाः –

१. वृद्धाश्रमवासिनः अन्ये जनाः शकुन्तलायाः परिवारं दृष्ट्वा किं अचिन्तयन् ? तेषां भावानां वर्णनं कुरुत।
२. अस्याः कथायाः सारं सन्देशं च लिखत।
३. अस्माकं व्यवहारः वृद्धजनान् प्रति कीदृशः भवितव्यः इमं विषयं अधिकृत्य एकं निबन्धं लिखत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणात्मक-प्रश्नाः–**

१. **अधोनिर्दिष्टानां सन्धि-पदानां नामनिर्देशपूर्वकः विच्छेदः विधेयः–**

| | पदम् | – | विच्छेदः | सन्धिनाम |
|---|---|---|---|---|
| (क) | जलाभिषेकम् | – | .............................. | ...................... |
| (ख) | दुःखोन्मुक्ताः | – | .............................. | ...................... |
| (ग) | सोपालम्भः | – | .............................. | ...................... |
| (घ) | स्वात्मजायाः | – | .............................. | ...................... |
| (ङ) | वृद्धावस्थाः | – | .............................. | ...................... |

२. **अधोलिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः–**

| | सन्धिपदम् | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | स्व + आत्मीयेभ्यः | – | ......................... | ......................... |
| (ख) | दुः + चित्तया | – | ......................... | ......................... |
| (ग) | सत् + आचारी | – | ......................... | ......................... |
| (घ) | जीवन + उपयोगी | – | ......................... | ......................... |
| (ङ) | प्रति + एकम् | – | ......................... | ......................... |

३. **अधोलिखितानां पदानां नामनिर्देशपूर्वक-विग्रहो विधेयः–**

| | पदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | मनोगतं | | |
| (ख) | शिक्षकपदे | | |
| (ग) | जीवनोपयोगी | | |
| (घ) | पुत्रवधुः | | |
| (ङ.) | असमर्थः | | |

४. **अधोलिखितानां पदानां प्रकृति-प्रत्ययविवेचनं कुरुत।**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | पाठयित्वा | ........................... | ....................... |
| (ख) | शिक्षयितुम् | ........................... | ....................... |
| (ग) | दृष्ट्वा | ........................... | ....................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(घ) पालितवती ........................... .........................

(ङ) आरूढः ........................... .........................

(च) आनेतुम् ........................... .........................

(छ) रक्षणीय ........................... .........................

(ज) प्रबोधितवान् ........................... .........................

**५. अधोनिर्दिष्टेषु पदेषु विभक्ति-वचन-निर्देशं कुरुत-**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | प्रतिवेशिनः | ........................... | ......................... |
| (ख) | जलाभिषेकम् | ........................... | ......................... |
| (ग) | त्रिलोचनम् | ........................... | ......................... |
| (घ) | विदुषी | ........................... | ......................... |
| (ङ) | भर्तुः | ........................... | ......................... |
| (च) | प्रेम्णा | ........................... | ......................... |

**६. निम्नलिखितानां पदानां धातु-लकारः-पुरुषः-वचनं च निर्दिश्यत-**

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | जीविष्यामि | ................. | .................. | ................. | ............. |
| (ख) | आगच्छेत् | ................. | .................. | ................. | ............. |
| (ग) | विस्मरति | ................. | .................. | ................. | ............. |
| (घ) | प्रार्थयते | ................. | .................. | ................. | ............. |
| (ड.) | आसीत् | ................. | .................. | ................. | ............. |

## उत्तरमाला

वस्तुनिष्ठात्मक प्रश्नाः – १. ग २. ख ३. क ४. क

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# द्वितीयः खण्डः

## ( क ) अलङ्कारपरिचयः

काव्यशास्त्रे अलङ्काराणाम् अतिमहनीयं स्थानं वर्तते। अलङ्करोति इति अलङ्कारः, अलङ्क्रियतेऽनेनेति वा व्युत्पत्त्या अलङ्कारशब्देन शोभाधायकं वस्तुतत्त्वं वा उच्यते। लोकव्यवहारे यथा अलङ्काराः मानवाकृतिं भूषयन्ति, तस्य शोभां वर्धयन्ति, तथैव काव्यशास्त्रे शब्दार्थयोः सौन्दर्यवर्धकं तत्त्वम् 'अलङ्कार' इति उच्यते

'अलंकृतिः अलङ्कारः' इति व्युत्पत्त्या सौन्दर्यबोधः एव अलङ्कारः। अयं सौन्दर्यबोधः एव आलङ्कारिकैः काव्यस्य आत्मा इति निरूपितः।

**अलङ्कार-लक्षणम् –** भामह-आचार्येन काव्यशास्त्रे अलङ्काराणां प्राधान्यं स्वीकृतम्। प्राचीनैः आचार्यैः सौन्दर्यबोधस्य अभिधायकत्वेन काव्यशास्त्रे अलङ्काराणां प्राधान्यं स्वीकृतम्। यथा समग्रगुणसम्पन्नाऽपि नारी अलङ्कारान् विना न शोभते, तथैव काव्यमपि अलङ्काररहितं न शोभते।

अलङ्कारस्वरूपं निरूपयन् आचार्यदण्डी काव्यस्य समस्तान् शोभाधायकतत्त्वान् अलङ्कारशब्देन लक्षयति– "**काव्यशोभाकारान् धर्मान् अलङ्कारान् प्रचक्षते**"।

अलङ्कारशब्दस्य व्यापकतां सूचयन् आचार्यो वामनः काव्यशास्त्रगतं सर्वमपि सौन्दर्यम् अलङ्कारशब्देन निरूपयति – '**सौन्दर्यम् अलङ्कारः**'।

अग्निपुराणकारेण तु अलङ्काररहितं काव्यं विधवैव निरूपितम्।

परं ध्वनिसम्प्रदायस्य प्रसिद्धिं प्राप्ते सति आचार्यैः अलङ्काराः अङ्गादिवत् शब्दार्थयोः शोभाधायकाः, रसस्य च उपकर्तारः इति निरूपिताः। यथोक्तं मम्मटेन –

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।**

**अलङ्काराः त्रिविधाः –**

एतेऽलङ्काराः 'यो यदाश्रितः सः तदलङ्कारः' (मम्मटः) इति नियमात् त्रिविधाः भवन्ति – १. शब्दालङ्कारः २. अर्थालङ्कारः ३. उभयालङ्कारः।

**१. शब्दालङ्कारः –**

शब्दाश्रितः योऽलङ्कारः सः शब्दालङ्कारः। यत्र काव्यसौन्दर्यं चमत्कृतिर्वा शब्दाधारिता भवति, सोऽलङ्कारः शब्दालङ्कारो वाच्यः। यथा – अनुप्रासः, यमकं, वक्रोक्तिः इत्यादयः।

एतेषु अलङ्कारेषु काव्यशोभा शब्दाश्रिता एव। उदाहरणार्थम् ' 'रसमयः समयः सः निनाय तैः' – इति यमकालङ्कारस्य उदाहरणे यदि नियतशब्दानां परिवर्तनं क्रियते– रसमयः कालः सः निनाय तैः, चेत् काव्यसौन्दर्यं नष्टं भवति, अलङ्काराभावश्च जायते। अतः यमकालङ्कारः शब्दालङ्कारः। एवमन्येऽपि ज्ञेयाः।

**२. अर्थालङ्कारः –**

योऽलङ्कारः अर्थाश्रितः भवति, सः अर्थालङ्कारः कथ्यते। अर्थालङ्कारेषु चमत्कृतिः अर्थाधारिता भवति,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अत एव शब्दानां परिवर्तनेन काव्यशोभायाः काऽपि क्षतिः न जायते। यथा – उपमा-रूपक-उत्प्रेक्षा-दीपकादयः।

एतेषु अलङ्कारेषु चमत्कारस्य आधारः अर्थो भवति। न तु शब्दः। अतः तुल्यार्थकस्य अन्यशब्दस्य प्रयोगेणापि अलङ्काराहानिर्न जायते।

३. **उभयालङ्कारः –**

योऽलङ्कारः शब्दाश्रितः अर्थाश्रितः इत्थम् उभयाश्रितः प्राप्यते, सः उभयालङ्कारः। यथा – श्लेषः।

## शब्दालङ्काराः

### १. अनुप्रासः

**लक्षणम् –**

**'अनुप्रासः शब्द-साम्यं वैषम्येऽपि स्वरस्य यत्'**

शब्दानां सादृश्यं अनुप्रासः। अत्र 'शब्द-साम्यं' इत्यस्याभिप्रायः अस्ति यत् शब्दसाम्ये स्वरव्यञ्जनयोरुभयोः अनिवार्यता नास्ति। यत्र स्वराणां असादृश्येऽपि केवलं व्यञ्जनानामेव सादृश्यं भवति तत्रापि अनुप्रासः अलङ्कारः भवति। वस्तुतः वर्णानां रसानुगतः प्रकर्षेण न्यासः अनुप्रासः भवति।

**उदाहरणम् –**

**ततो मृगेन्द्रस्य मृगेन्द्रगामी, वधाय वध्यस्य शरं शरण्यः।**
**जाताभिषङ्गोर्नृपतिर्निषङ्गा दुद्धर्तुमैच्छत् प्रसभोद्धृतारि ॥**

अत्र 'मृगेन्द्र, वध, शर, षङ्ग इत्यादिषु शब्देषु क्वचित् स्वरव्यञ्जनयोः उभयोः क्वचित् व्यञ्जनमात्रस्य साम्यम्। अतः अत्र अनुप्रासः अलङ्कारः विद्यते।

**अनुप्रासोऽयम् पंचधा भवति –**

१. छेकानुप्रासः – अनेक व्यञ्जनानामेकवारं साम्यम्।
२. वृत्यनुप्रासः – एकानेकवर्णानामनेकवारं साम्यम्।
३. श्रुत्यनुप्रासः – समानस्थानीयानां वर्णानां साम्यम्।
४. अन्त्यानुप्रासः – पादान्तानां व्यञ्जनानां पूर्व स्वरेण सह आवृत्तिः।
५. लाटानुप्रासः – तात्पर्य-भेदे सति समानार्थकाणां शब्दानाम् आवृत्तिः।

### २. यमकम्

**लक्षणम् –**

**'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।**
**क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते'॥**

यत्र सार्थकयोः परन्तु परस्परं भिन्नार्थकयोः द्वयोः वर्णसंघातयोः क्रमेण आवृत्तिर्भवति तत्र यमकालङ्कारः जायते। यमकशब्दस्य अर्थः युगलं युग्मं वा भवति। यदा पद्ये सक्रमस्य स्वरव्यञ्जन-समुदायस्य



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आवृत्ति: प्राप्यते। परं तेषाम् आवृत्तानां शब्दानाम् अर्थ: पृथक् पृथक् भवति, तत्र यमकालङ्कार: स्यात्।

यमकालङ्कारे आवृत्तेषु स्वरव्यञ्जन-समुदायेषु -

१. कदाचित् आवृत्तस्य पदसमुदायस्य उभे पदे सार्थके भवत:।

२. कदाचित् एकं पदं सार्थकं द्वितीयञ्च निरर्थकं भवति।

३. कदाचित् उभेपदे निरर्थके भवत:।

उदाहरणम् -

**नवपलाश-पलाशवनम्पुर:, स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्, स सुरभिं सुरभिं सुमनोभरै:।।**

उदाहरणसङ्गति: -

अस्मिन् उदाहरणे यमकालङ्कार: अस्ति। यतोहि अत्र प्रथमपादे पलाशद्वयस्य अर्थद्वयमस्ति। प्रथमपलाशस्य अर्थ: पत्रम्, द्वितीय 'पलाश' शब्दस्य अर्थ: पलाशवृक्ष: अस्ति। तथैव च चतुर्थपादे प्रथम-सुरभिपदस्य अर्थ: सुगन्ध: द्वितीयसुरभिपदस्य अर्थ: वसन्त-ऋतु: अस्ति। अत्र प्रथमचतुर्थपादयो: आवृत्तयो: उभयो: पलाशसुरभि-पदयो: सार्थकत्वं विद्यते।

## ३. श्लेष:

लक्षणम् -

**'श्लिष्टै: पदैरनेकार्थाभिधाने श्लेष इष्यते।'**

यत्र श्लिष्टै: पदै: अनेकार्थानाम् अभिधानं क्रियते तत्र श्लेषालङ्कार: भवति। लक्षणे 'श्लिष्ट:' इति पदस्य अभिप्राय: अनेकार्थकेन शब्देन अस्ति:। अस्मिन् अलङ्कारे एकस्मिन् पदे एव अर्थद्वयं अधिकं वा प्राप्यते।

उदाहरणम् - **उच्छलद् भूरि कीलाल: शुशुभे वाहिनीपति:।**

उदाहरण सङ्गति: -

अत्र 'कीलाल:' पदं श्लिष्टपदमस्ति। कीलालपदस्य प्रथम: अर्थ: जलं द्वितीयश्च रक्तम् अस्ति। तथैव वाहिनीपति: द्वितीय: श्लिष्टपदमस्ति वाहिनीपतिपदस्य अर्थद्वयम् विद्यते। प्रथम: अर्थ: समुद्र: द्वितीय: अर्थ: च सेनापति: अस्ति। अतएव श्लिष्टपदै: अत्र अनेकार्थानां प्राप्ति भवति। अत: श्लेषालङ्कार: अस्ति।

# अर्थालङ्कारा:

## ४. उपमा

लक्षणम् -

**'प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते'।**

साम्यं = सादृश्यं उपमा इति अलङ्कार: अभिधीयते = कथ्यते। कीदृशं साम्यं-प्रस्फुटम् सुन्दरम् च। यद्यपि रूपकालङ्कारेऽपि साम्यं तु भवति किन्तु तत्र उपमानोपमेययो: मध्ये अभेदत्वात् साम्यस्य



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

स्फुटप्रतीतिः न भवति। अतः अत्र 'प्रस्फुटं' इति पद ग्रहणेन लक्षणस्य व्याप्ति रूपकालङ्कारे न भवति। एवमेव 'सुन्दर' पद ग्रहणस्य अभिप्रायः यत् साम्यं वैचित्र्यपूर्णं भवेत् सामान्ये साम्ये यथा– गौरिव गवयः इत्यादिषु प्रयोगे साम्येऽपि जाते वैचित्र्याभावे नास्त्युपमालङ्कारः ।

**उपमायाः अवयवानिः–** उपमायाः चत्वारि अवयवानि –

१. उपमेय – यस्य पदार्थस्य उपमा–साम्यं क्रियते।

२. उपमान – येन सह उपमा–साम्यं क्रियते।

३. साधारणधर्मः – उपमेयोपमानयो समान गुणाः क्रियादयः।

४. वाचकः शब्दः – उपमेयोपमानयोः सादृश्य–सूचकः शब्दः।

यत्र एतेषां सर्वेषां अवयवानां सति साम्यं भवति तत्र पूर्णोपमा यत्र च एकानेकानां अनुक्ते सति साम्यं भवति तत्र लुप्तोपमा भवति। अनयोः द्वयोः भेदयोः अपि श्रौती, आर्थी च इति भेदद्वयं अपि भवति उपमालङ्कारे उपमेयोपमानयोः साम्यं क्रियागतं, गुणगतं उभयगतञ्चेति त्रिविधं भवति। इत्थं एभिः भेदोपभेदैः उपमा अनेकधा भवति।

**उदाहरणम् –**

**१. हंसीव कृष्ण! ते कीर्तिः स्वर्गङ्गामवगाहते।**

अत्र उपमेयः– कीर्ति, उपमानः–हंसी, साधारण धर्मः–स्वर्गङ्गावगाहते वाचकः–इव। अत्र चतुर्णाम् उपमावयवानां विद्यमानत्वात् पूर्णोपमा विद्यते।

**२. स्नपयति हृदयेशं स्नेह–निष्यन्दिनी ते**
**धवलबहल–मुग्धादुग्ध–कुल्येव दृष्टिः।**

अत्र स्नपयति इति क्रिया साम्यं स्नेहनिष्यन्दिनी, धवलबहलमुग्धा इति गुण सादृश्यञ्च। 'ते दृष्टिः' उममेयः अस्ति, दुग्ध कुल्या उपमानः अस्ति, इव साधारण धर्मः। अतः अत्र क्रिया साम्यं गुण साम्यं च उभयसाम्यत्वात् उभयगत पूर्णोपमा अलङ्कारः अस्ति।

## ५. रूपकम्

**लक्षणम् –**

**'तद्रूपकमभेदो यः उपमानोपमेययोः'।**

'रूपयति इति रूपकम्', अस्यार्थः यत्र उपमानस्य आरोपणं उपमेये भवति तत्र रूपकं भवति। रूपकालङ्कारे उपमानोपमेययोः स्वरूपतः भेदेऽपि अति–साम्य–प्रदर्शनाय काल्पनिकोऽभेदारोपो भवति।

**उदाहरणम् –**

**संसार–विषवृक्षस्य द्वे एव रसवत्फले ।**
**काव्यामृत–रसास्वादः संगमः सज्जनैः सह।।**

**लक्षणसङ्गति –** उदाहरणेऽस्मिन् उपमेये–'संसार' उपमानस्य–'विषवृक्षस्य' आरोपः अस्ति। एवमेव काव्ये अमृतस्य आरोपः अस्ति। अस्मात् रूपकालङ्कारः अत्र।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**रूपकभेदाः** – रूपकं प्रामुख्येन त्रिविधं भवति –

(क) साङ्गरूपकम् (ख) निरङ्गरूपकम् (ग) परम्परितरूपकम्

## ६. उत्प्रेक्षा

**लक्षणम्** –

**'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना'।**

यदा प्रकृतस्य (उपमेयस्य), परात्मना (उपमानेन) सह (एकात्म-भावस्य) सम्भावना प्रदर्श्यते, तदा उपमेय-उपमानयोः एकीभावस्य सम्भावनोत्थितः अलङ्कारः उत्प्रेक्षा। उत्प्रेक्षा शब्दस्य अर्थः सम्भावना एव। उत्प्रेक्षालङ्कारबोधकैः मन्ये, शङ्के, ध्रुवम् प्रायः इव नूनमित्यादिभिः शब्दैः उत्प्रेक्षा व्यज्यते। उक्तमपि –

**मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।**
**उत्प्रेक्षा व्यच्यते शब्दैरिव शब्दोऽपि तादृशः।।**

**उदाहरणम्** –

**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
**असत्पुरुषसेवेव दृष्टिर्विफलतां गता।।**

अत्र अन्धकाराधिक्यं वर्णयन् कवि सम्भावना प्रकटयति यत् तमः अङ्गानि लिम्पति इव, नभश्च मन्ये अञ्जनं वर्षति, दृष्टिश्च असत्पुरुषसेवा इव विफलतां प्राप्ता। अत्र अविद्यमानेन उपमानेन सह सम्भावना प्रदर्श्यते अतः उत्प्रेक्षा अलङ्कारः अस्ति।

**उपमा-उत्प्रेक्षयोः भेदः** –

सामान्येन उपमा उत्प्रेक्षा च उभेऽपि समानमेव प्रतीयेते। परं साम्याधारिते उपमालङ्कारे उपमेय-उपमानयोः विद्यमानता अस्तित्वम्-आवश्यकं भवति। उत्प्रेक्षा अलङ्कारे च उपमेय-उपमानयोः सम्भावना व्यज्यते। विषयेऽस्मिन् उपमानस्य अस्तित्वं लोकसिद्धत्वं वा आवश्यकं न भवति।

एवम् उपमालङ्कारः साम्याधारितो भवति, उत्प्रेक्षा च सम्भावनोत्थितः।

## ७. अर्थाऽन्तरन्यासः

**लक्षणम्** –

**'सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।**
**यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा'।।**

अर्थात् यत्र साधर्म्येण वैधर्म्येण वा सामान्यस्य विशेषेण-विशेषस्य सामान्येन वा समर्थ्यते तत्र अर्थान्तरन्यासोऽलङ्कारः स्यात्। अस्मिन् अलङ्कारे द्वे स्वतन्त्रवाक्ये समर्थ्यसमर्थकभावेन तिष्ठतः, प्रथमवाक्य-उक्त-कथनम् अन्येन वाक्यकथनेन समर्थ्यते, सः अर्थान्तरन्यासः अलङ्कारः।

**उदाहरणम्** –

(क) सामान्यस्य विशेषेण समर्थनम्

**बृहत्सहाय्यः कार्यान्तं क्षोदीयानपि गच्छति।**
**सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**उदाहरणसङ्गतिः –**

अत्र पूर्वार्धगतः सामान्योऽर्थः 'बृहत्सहाय्यः क्षोदीयानपि कार्यान्तं गच्छति' इति द्वितीयार्धगतेन विशेषणार्थेन। नगापगाः महानद्या सम्भूय अम्भोधिम् अभ्येति समर्थ्यते अतः अत्र अर्थान्तरन्यासोऽलङ्कारः।

(ख) विशेषस्य सामान्येन समर्थनम् –

**हनूमानब्धिमतरद् दुष्करं किं महात्मनाम्।**

अत्र– 'हनुमानब्धिमतरद्' इति विशेष कथनं 'दुष्करं किं महात्मनाम्' इति सामान्य कथनं विशेषस्य सामान्येन समर्थनत्वात् अत्र अर्थान्तरन्यासोऽलङ्कारो विद्यते।

## ८. विभावना

**लक्षणम् –**

**'विभावना विना हेतुर्कार्योत्पत्तिर्यदुच्यते'।**

यत्र कारणं न भवति तथापि कार्यस्य उत्पत्तिः जायते तत्र विभावना अलङ्कारः भवति।

**उदाहरणम् –**

**शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः।**
**ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वनंगोप्तरि गाहमाने।।**

अत्र वृष्टिकारणं विनाऽपि दवाग्निः, फलपुष्पवृद्धिः कार्यस्य उत्पत्तिः भवति अतः विभावना अलङ्कारः।

## ९. विशेषोक्तिः

**लक्षणम् –**

**'विशेषोक्तिरखण्डेषु कारणेषु फलावचः'।**

यत्र कारणं तु भवति किन्तु कार्यस्याभावः भवति तत्र विशेषोक्तिः कथ्यते। अस्मिन् अलङ्कारे कारणस्य (हेतोः) प्राप्तिः भवति तथापि कार्यस्य प्राप्तिःन स्यात्।

**उदाहरणम् –**

**धनिनोऽपि निरुन्मादा, युवानोऽपि न चंचला।**
**प्रभावोऽप्यप्रमत्तास्ते, महामहिम शालिनः ।।**

**उदाहरणसङ्गतिः –**

अत्र धनरूपं, युवावस्थारूपं, प्रभुतारूपं च कारणं विद्यमानः अस्ति तथापि क्रमशः उन्माद-चंचल-प्रमादरूप -कार्यस्य अभावः अस्ति। अतएव विशेषोक्तिः अलङ्कारः।

## १०. निदर्शना

**लक्षणम् –**

**'अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः।**
**निदर्शना भवेत् सेयं मम्मटेन यथोदिता' ।।**

यत्र वस्तुद्वयस्य मध्ये परस्परं सम्बन्धः स्थापितः न भवति तत्र वस्तुसम्बन्धस्य कृते उपमायाः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

परिकल्पना क्रियते। सा निदर्शना उच्यते। निदर्शना पदस्य शाब्दिकार्थः उदाहरणम् अस्ति। अत्र लक्षणे आगते सति उपमा-परिकल्पकः पदम् अन्ततोगत्वा समानतायाः बोधकः अस्ति।

उदाहरणम् -

**क्व सूर्यप्रभवो वंशः ? क्व चाल्पविषयामतिः।**
**तितिर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।।**

उदाहरणसङ्गतिः -

अल्पमत्या सूर्यवंशस्य वर्णनं तथैव भवितुम् अर्हति यथैव उडुपेन सागरतरणस्य प्रयत्नं भवति। अत्र द्वितीयवाक्यं प्रथम वाक्यस्य कृते समानतायाः बोधकः अस्ति।

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

(१) अलङ्कारः सौन्दर्यवर्धकं तत्त्वम् उच्यते –
(क) शब्दस्य (ख) अर्थस्य
(ग) शब्दार्थयोः (घ) काव्यशास्त्रस्य ( )

(२) 'उच्छलद् भूरि कीलालः शुशुभे वाहिनीपतिः' इत्यस्मिन् उदाहरणे अलङ्कारः अस्ति –
(क) यमकम् (ख) श्लेषः
(ग) अनुप्रासः (घ) सर्वे ( )

(३) 'उत्प्रेक्षा' शब्दस्य अर्थः अस्ति –
(क) आरोपः (ख) सम्भावना
(ग) सादृश्यम् (घ) प्रदर्शनम् ( )

(४) विभावना अलङ्कारस्य स्वरूपं भवति –
(क) कारणं विना कार्यकथनम् (ख) कार्यं विना कारण-कथनम्
(ग) भावनां विना कार्यकथनम् (घ) न कोऽपि ( )

(५) 'धनिनोऽपि निरुन्मादा' इत्यस्यां पंक्तौ अलङ्कारः अस्ति –
(क) विभावना (ख) उत्प्रेक्षा
(ग) विशेषोक्तिः (घ) रूपकम् ( )

### रिक्त स्थानानि पूरयत –

१. ..................धर्मान् अलङ्कारान् प्रचक्षते।

२. अनुप्रासः ........................................ वैषम्येऽपि स्वरस्य यत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. श्लिष्टैः पदैरनेकार्थाभिधाने ...................... इष्यते।

४. विशेषोक्तिरखण्डेषु ................... . फलावचः।

५. अभवन् ......................... उपमा परिकल्पकः।

## लघूत्तरात्मकाः प्रश्नाः

१. अलङ्कारः कतिविधं भवति ?

२. प्रस्फुटं सुन्दरं साम्यं कस्मिन् अलङ्कारे भवति ?

३. उत्प्रेक्षा अलङ्कारस्य लक्षणं लिखत।

४. सामान्यं विशेषेण विशेषं वा सामान्येन कस्मिन् अलङ्कारे समर्थ्यते।

५. शशामवृष्ट्यापि विना दवाग्निः– अत्र कोऽलङ्कारः कथं च ?

## दीर्घोत्तरात्मकाः प्रश्नाः

१. उपमारूपकयोः अलङ्कारयोः भेदः सोदाहरणं लिखत।

२. अधोलिखित उदाहरणेषु अलङ्काराणां निर्धारणं कृत्वा तेषां लक्षणं लिखत –

(क) नवपलाशपलाशवनम्पुरः स्फुटपरागपरागतपङ्कजम्।

(ख) लिम्पन्तीव तमोऽङ्गानि, वर्षतीवाञ्जनं नभः।
असत्पुरुष सेवेव दृष्टिर्विफलतां गता।।

(ग) क्व सूर्य प्रभवोवंशः? क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

३. अधोलिखितानां अलङ्काराणां लक्षणपुरस्सरं परस्परं भेदनिर्धारणम् कुरुत–

(क) श्लेषयमकयोः भेदः

(ख) उपमारूपकयोः भेदः

(ग) उत्प्रेक्षारूपकयोः भेदः

(घ) विशेषोक्तिविभावनयोः भेदः

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ( २ खण्डः )

## ( ख ) छन्दो-ज्ञानम्

वैदिक-लौकिक-वाङ्मये छन्दः-शास्त्रं विशिष्टस्थानं भजते। वेदार्थनिर्णये सहायकत्वेन महर्षिभिराचार्यैश्च अस्य वेदाङ्गत्वं स्वीकृतम्। पाणिनीय-शिक्षायां 'छन्दः पादौ तु वेदस्य' इत्युक्त्वा छन्दसां महत्त्वं प्रतिपादितम्। छन्दः शब्दस्य प्रवृत्तिनिमित्तत्वं निरूपतया निरुक्तकारेण यास्केन उक्तं – 'छन्दः छादनात्' (नि. ७.३.१२)। वेदाः छन्दोबद्धाः सन्ति, तेषामुच्चारणाय अर्थावबोधाय च छन्दोज्ञानमावश्यकम्, यो हि छन्दांसि अविदित्वा यज्ञादिकार्याणि साधयति, वेदान् अधीते, अध्यापयति वा सः पापीयान् भवति।

अस्य शास्त्रस्य छन्दो-विचितिः, छन्दोऽनुशासनं, छन्दो-विवृत्तिः, छन्दोनाम इत्यादि-प्राचीन-नामानि-अपि प्राप्यन्ते। अस्य छन्दो नाम्नः वेदाङ्गस्य पिङ्गलकृतं 'छन्दःशास्त्रं' वा प्रतिनिधिभूतो ग्रन्थः। अस्मिन् ग्रन्थे वैदिक-लौकिकानां छन्दसां विवेचनात्मकं विवरणं प्राप्यते। तत्र लौकिक-वाङ्मये सामान्येन नियतवर्णानां मात्राणां वा नियमबद्धं वाक्यं वाक्यसमूहो वा 'छन्दः' शब्देन अभिधीयते।

### १. छन्दो-भेदः

पिङ्गल-छन्दःसूत्रेषु लौकिकं-छन्दसः द्विविधत्वं प्रतिपादितम् – १. वर्णच्छन्दः वृत्तं वा, २. मात्रिकच्छन्दः जातिः वा।

### १. वर्णच्छन्दः ( वृत्तम् ) –

"वृत्तमक्षरसंख्यातम्" यच्छन्दः वर्णगणनया परिमीयते तद् वर्णच्छन्दः वृत्तं वा उच्यते। अस्य अपरनाम वर्णिकछन्दोऽपि। एषु छन्दस्सु प्रतिपादं वर्णानानामेव गणना भवति। 'वृत्तमंजरी' इति ग्रन्थे उक्तम् यद् "अक्षरैर्गणना यत्र वृत्तमिति कथ्यते'। यथा – इन्द्रवज्रा, वंशस्थ, शिखरिणी इत्यादयः।

### २. मात्रिकच्छन्दः ( जातिः ) –

"जातिर्मात्रा कृता भवेत्" यच्छन्दः मात्रागणनया परिमीयते तत् मात्रिकच्छन्दः। अस्यापरं नाम जातिः। एषु छन्दस्सु प्रतिपादं मात्राणां गणना विधीयते, मात्रागणनया च छन्दः-स्वरूपं निश्चीयते। उक्तं हि वृत्तमंजर्याम् – "मात्राभिर्गणना यत्र सा जातिरभिधीयते"। यथा आर्या।

### पादः –

"ज्ञेयः पादश्चतुर्थांशः" – छन्दसः चतुर्थो भागः 'पादः' इत्युच्यते। प्रत्येकं छन्दः एषु पादेषु विभक्तं भवति। पाद-पर्यायवाचित्वेन छन्दःशास्त्रे 'चरण' पदस्य प्रयोगोऽपि प्राप्यते।

### वर्णः –

"वृणोति वाङ्मयमिति वर्णः" तदेव क्षरणरहितधर्मत्वात् अक्षरमपि कथ्यते। इह छन्दःशास्त्रे एकस्मिन् काले उच्चार्यमाणः शब्दांशः एव 'अक्षरम्' इति निगद्यते। व्याकरणदृष्ट्या स्वरवर्णः स्वरसहितव्यञ्जनं वा अक्षरपदवाक्यं भवति, न तु स्वरेण रहितम्। यथा – इन्द्रः – इत्यस्मिन् पदे 'इ' इति स्वरवर्णः 'न् द् र,' इति 'अ' स्वरेण संयुतानि त्रीणि व्यंजनानि च अक्षरपदवाक्यानि। इत्थम् अत्र 'इन्द्रः' पदे अक्षरद्वयं विद्यते 'इ –न्द्रः'।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**मात्रा –**

वर्णानामुच्चारणकालो 'मात्रा' इत्युच्यते। सा मात्रा त्रिविधा ह्रस्व-दीर्घ-प्लुतभेदात्।

**१. ह्रस्वः –**

कुक्कुटेन प्रायशः त्रिध्वनयः क्रियन्ते कु – कू – कू३ । एते ध्वनयः एव पाणिनिना उकालः, ऊकालः, ऊ३कालश्चेति त्रिधा वर्गीकृताः। 'उ' उच्चारणकालः एकमात्राकालः उच्यते, सः च कालः यस्य सः 'ह्रस्व' संज्ञो भवति।

**२. दीर्घः**

उ + उ = 'ऊ' इति उच्चारणकालः द्विमात्राकालः दीर्घवर्णः मात्राद्वयपरिमितः।

द्विमात्राकाले उच्चार्यमाणः स्वरः 'दीर्घ' संज्ञो भवति।

**३. प्लुतः –**

द्विमात्राकालात् अधिककाले उच्चारितः स्वरः 'प्लुत' संज्ञो भवति। उक्तमपि –

**एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।**
**त्रिमात्रिकः प्लुतो ज्ञेयो व्यंजनं चार्धमात्रिकम् ।।**

**छन्दःशास्त्रे लघु-गुरु संज्ञा –**

व्याकरणशास्त्रे स्वराणामुच्चारणकालभेदात् ह्रस्व-दीर्घ-प्लुतसंज्ञाः क्रियन्ते, परं छन्दःशास्त्रे मात्राणां गणनायै स्वराणां लघुः गुरुः वा संज्ञा विधीयते।

**१. लघुः –**

इह छन्दःशास्त्रे ह्रस्वसंज्ञो स्वरः लघुसंज्ञो भवति। अ, इ, उ, ऋ लृ – एते पंच ह्रस्वस्वराः लघु-संज्ञकाः भवन्ति। छन्दःलक्षणेषु अस्य निर्देशः ल इति पदेन क्रियते, अस्य संकेत-चिह्नं च सरलरेखासदृशं ( । ) भवति।

**२. गुरुः –**

दीर्घसंज्ञः स्वरः गुरुः कथ्यते। आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ – एते समेऽपि दीर्घस्वराः इह शास्त्रे गुरुसंज्ञकाः सन्ति। श्लोकेषु प्रायः प्लुतसंज्ञकानां स्वराणाम् अभावः एव प्राप्यते। छन्दस्सु अनुस्वारेण सहितः, विसर्गेण युक्तः, संयोगपूर्वः, पदान्तगो ह्रस्ववर्णश्च गुरुसंज्ञो भवति। पदान्ते विद्यमानः गुरुवर्णोऽपि क्वचित् विकल्पेन लघुः मन्यते। छन्दोमंजर्याम् उक्तं यत् –

**सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।**
**वर्णः संयोगपूर्वश्च तथा पदान्तगोऽपि वा ।।**

छन्दःलक्षणेषु गुरुवर्णस्य निर्देशः 'गु' इति संक्षिप्ताक्षरेण क्रियते। अस्य संकेतचिह्नं च अवग्रहवत् ( ऽ ) अस्ति।

**गणः –**

छन्दस्सु वर्णानां मात्राणां च गणनसौकर्य्यार्थं गण-व्यवस्था विधीयते। तत्र वर्णिकछन्दस्सु वर्णानां गणनायै वर्णात्मकगणाः प्रयुज्यन्ते। एतैः गणैः छन्दःसु लघुगुरुवर्णानां क्रमः निश्चीयते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**वर्णात्मको गणः –**

वर्णात्मको गणः वर्णत्रयसमूहात्मको भवति। अनेन वर्णत्रयसमूहेन गणे लघुगुरुवर्णानां स्थितिः स्पष्टीक्रियते। यदि लघु–गुरुवर्णत्रिकं विविध–क्रमेण लिख्यते, चेत् तस्य गणपरिचायकत्रिकस्य अष्टौ भेदाः भवन्ति। ते च सन्ति – यगण–मगण–तगण–रगण–जगण–भगण–नगण–सगणाः। एषां स्वरूपमस्ति–

**मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः ।**
**जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः ।।**

| गणः | | लक्षणम् | | चिह्नम् | |
|---|---|---|---|---|---|
| मगणः | = | मस्त्रिगुरुः | = | मगणे त्रिगुरुवर्णाः भवन्ति। | ऽऽऽ |
| नगणः | = | त्रिलघुश्च नकारो | = | नगणे त्रिलघुवर्णाः भवन्ति। | ।।। |
| भगणः | = | भादिगुरुः | = | भगणे आदिवर्ण गुरुः, अन्यौ द्वौ वर्णौ लघू भवतः। | ऽ।। |
| यगणः | = | आदिर्लघुः | = | यगणे आदिवर्णः लघुः, अन्यौ द्वौ वर्णौ गुरू भवतः। | ।ऽऽ |
| जगणः | = | जो गुरुमध्यगतो | = | जगणे मध्यमो वर्णः गुरुः, आदि–अन्तिमौ लघू भवतः। | ।ऽ। |
| रगणः | = | रलमध्यः | = | रगणे मध्यमो वर्णः लघुः, आदि–अन्तिमौ वर्णौ गुरू भवतः। | ऽ।ऽ |
| सगणः | = | सोऽन्तगुरुः | = | सगणे अग्रिमौ वर्णौ लघू, अन्तिमो वर्णः गुरुः भवति। | ।।ऽ |
| तगणः | = | अन्तलघुस्तः | = | तगणे अग्रिमौ वर्णौ गुरू, अन्तिमो वर्णः लघुः भवति। | ऽऽ। |

गणस्वरूपं लघुनोपायेन ज्ञातुमेकं लघुसूत्रमपि विद्यते – '**यमाताराजभानसलगाः**'।

अस्य सूत्रस्य प्रयोगः छात्रैः एकादशकक्षायामपि विहितः। अस्य साहाय्येन गणस्वरूपमतिसरलया अवगन्तुं शक्यते। अस्मिन् सूत्रे प्रारम्भिकाः अष्टौ वर्णाः गणपरिचायकाः सन्ति, अन्तिमौ द्वौ लगौ वर्णौ च लघुगुर्वोः संक्षिप्ताक्षरे स्तः। अस्य सूत्रस्य अष्टौ वर्णाः गणनामपरिचायकाः, ते च स्वाग्रिमवर्णाभ्यां स्वस्वरूपं स्पष्टीकुर्वन्ति। यथा – 'य' वर्णः गणनामपरिचायकः स च मा–ताभ्यां वर्णाभ्यां सम्मिल्य यगणस्वरूपं प्रदर्शयति 'यमाता' इति। एतेन वर्णसमूहेन 'लघु–गुरु' वर्णानां संकेतो गृह्यते, तस्य चिह्नानि च '।ऽऽ' इति। एवमन्येऽपि गणाः श्रेयाः। तेषां गणानां स्वरूपं निम्नचक्रेणापि बोद्धुं शक्यते –

**गणचक्रम्**

| | गणः | सूत्रांशः | स्वरूपम् | गणचिह्नानि |
|---|---|---|---|---|
| १. | यगणः | य | यमाता | ।ऽऽ |
| २. | मगणः | मा | मातारा | ऽऽऽ |
| ३. | तगणः | ता | ताराज | ऽऽ। |
| ४. | रगणः | रा | राजभा | ऽ।ऽ |
| ५. | जगणः | ज | जभान | ।ऽ। |
| ६. | भगणः | भा | भानस | ऽ।। |
| ७. | नगणः | न | नसल | ।।। |
| ८. | सगणः | स | सलगा | ।।ऽ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उक्तमपि –

**आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।**
**यरता लाघवं यान्ति मनौ तु गुरुलाघवम् ।। इति।।**

यतिः –

पद्यपाठे जिह्वाया: इष्टविश्रामस्थानं कविभि: यति: उच्यते। विच्छेद:, विराम:, विरति: इत्यादय: यतिपर्याया:।

अत्रास्मिन् प्रकरणे इन्द्रवज्रा, शालिनी, भुजङ्गप्रयातम्, द्रुतविलम्बितम् , वसन्ततिलका, हरिणी, शिखरिणी, मन्दाक्रान्ता, शार्दूलविक्रीडितम्, स्रग्धरा इति प्रमुख दश छन्दानां लक्षणोदाहराणि प्रदत्तानि –

## छन्दः

## १. इन्द्रवज्रा

लक्षणम् –

**'स्यादिन्द्रवज्रा यदि तौ जगौ ग:'**

अस्य छन्दस: प्रत्येकस्मिन् चरणे ११ वर्णा: भवन्ति। सर्वेषु पादेषु क्रमश: तगण:, तगण: जगण: द्वौ च गुरुवर्णौ भवत:। यद्यपि अत्र यतिनिर्देशो नास्ति तथापि पञ्चमे, षष्ठे च अक्षरे यति: भवति।

उदाहरणम् –

**तगण तगण जगण, गु.गु.**
ऽ ऽ ।, ऽ ऽ ।, । ऽ ।, ऽ ऽ
**भानु: सकृद्युक्त तुरङ्ग एव = ११ वर्णा:**
**रात्रिन्दिवं गन्धवह: प्रयाति ।**
**शेष: सदैवाहितभूमिभार:**
**षष्ठांशवृत्तेरपि धर्म एष: ।।**

## २. शालिनी

लक्षणम् –

**'मात्तौ गौ चेच्छालिनी वेदलोकै:'**

यस्य प्रत्येकस्मिन् पादे क्रमश: एको मगण:, द्वौ तगणौ, द्वौ च गुरुवर्णौ भवत: तच्छन्द: 'शालिनी' इति ज्ञेय:। अस्य छन्दस: प्रत्येक चरणे एकादश वर्णा: भवन्ति। चत्वार (वेदा:), सप्त (लोका:) वर्णे च यति कार्या:।

उदाहरणम् –

**मगण तगण तगण, गु.गु.**
ऽ ऽ ऽ, ऽ ऽ ।, ऽ ऽ ।, ऽ ऽ
**सा निन्दन्ती स्वानि भाग्यानि बाला = ११ वर्णा:**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता।
स्त्रीसंस्थानं चाप्सरस्तीर्थमारा
दुत्क्षिप्यैनां ज्योतिरेकं जगाम ॥

## ३. भुजङ्गप्रयातम्

लक्षणम् -

**'भुजङ्गप्रयातं चतुर्भिर्यकारैः'**

चतुर्भिः यकारैः यगणैः भुजङ्गप्रयातं स्यात्।

यस्मिन् छन्दसि प्रतिचरणं चत्वारो यगणाः वर्तन्ते तच्छन्दो भुजङ्गप्रयातम् इति नाम्ना प्रसिद्धम्। अत्रापि द्वादशसंख्याकाः वर्णाः प्रतिचरणम् भवन्ति।

उदाहरणम् -

**यगण यगण यगण यगण**
। ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ
**त्वमेकं शरण्यं त्वमेकं वरेण्यं = १२ वर्णाः**
**त्वमेकं जगत्पालकं स्वप्रकाशम्।**
**त्वमेकं जगत्कर्तृ पातृ प्रहर्तृ**
**त्वमेकं परं निश्चलं निर्विकारम् ॥**

## ४. द्रुतविलम्बितम्

लक्षणम् -

**'द्रुतविलम्बितमाह नभौ भरौ'**

यस्य छन्दसः प्रतिचरणं क्रमशः नगण-भगण-भगण-रगणाः च भवन्ति। तत् द्रुतविलम्बितनामकं छन्दो भवति। अस्य प्रत्येकस्मिन् चरणे द्वादशवर्णाः भवन्ति।

उदाहरणम् -

**नगण भगण भगण रगण**
।।। ऽ। । ऽ। । ऽ।ऽ
**इतर-पाप-फलानि य- दृच्छया = १२ वर्णाः**
**वितर तानि स हे चतुरानन।**
**अरसिकेषु कवित्वनिवेदनम्**
**शिरसि मा लिख मा लिख मा लिख ॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ५. वसन्ततिलका

**लक्षणम् –**

**'उक्ता वसन्ततिलका तभजाजगौ गः'**

यस्य प्रत्येकस्मिन् चरणे तगणः, भगणः, जगणः, पुनः जगणः गुरुः गुरुश्च यथाक्रमं भवन्ति, चतुर्दश-वर्णात्मकं तद्वृत्तं वसन्ततिलकेति प्रसिद्धम्।

**उदाहरणम् –**

**तगण भगण जगण जगण, गु.गु.**
ऽ ऽ ।,ऽ । ।, ।ऽ ।,। ऽ ।, ऽ ऽ
**पद्माकरं दिनकरो विकची करोति = १४ वर्णाः**
**चन्द्रो विकासयति कैरवचक्रवालम् ।**
**नाभ्यर्थितो जलधरोऽपि जलं ददाति**
**सन्तः स्वयं परहिते विहिताभियोगाः ।।**

## ६. हरिणी

**लक्षणम् –**

**'नसमरसलागः षड्वेदैर्हयैर्हरिणी मता'**

यस्य छन्दसः प्रतिचरणे नगणः सगणः मगणः रगणः सगणः लघुगुरुश्च वर्णाः भवन्ति, तच्छन्दः हरिणीर्नाम मता। सप्तदशवर्णात्मकेऽस्मिन् छन्दसि षष्ठे (रसाः), चतुर्थे (वेदाः), सप्तमे (हयैः) वर्णे च यतिः कार्या।

**उदाहरणम् –**

**नगण सगण मगण रगण सगण ल.गु.**
। । ।,।।ऽ, ऽ ऽ ऽ, ऽ । ऽ, ।। ऽ,। ऽ
**अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे = १७ वर्णाः**
**विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुलाः ।**
**तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं**
**मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ७. शिखरिणी

लक्षणम् –

**'रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी'**

यत्र प्रत्येकस्मिन् चरणं क्रमशः यगणः, मगणः, नगणः, सगणः, भगणः पूर्वकमन्ते च एको लघुवर्णः तदन्ते चैको गुरुवर्णः स्यात्। सप्तदशवर्णात्मकमिदं छन्दः इति शिखरिणी। अस्मिन् छन्दसि रसैः = षड्वर्णान्ते, रुद्रैः = एकादशवर्णान्ते च यतिः अर्थात् विरामो भवति।

उदाहरणम् –

**यगण मगण नगण सगण भगण, ल.गु.**

**।ऽऽ, ऽऽ।, ।।।, ।।ऽ, ऽ।।,।ऽ**

**पृथिव्यां पुत्रास्ते, जननि बहवः सन्ति सरलाः, = १७ वर्णाः**

**परं तेषां मध्ये विरल तरलोऽहं तव सुतः ।**

**मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे,**

**कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।**

## ८. मन्दाक्रान्ता

लक्षणम् –

**'मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्'**

अस्मिन् छन्दसि प्रत्येकस्मिन् पादे यथाक्रमं मगणः, भगणः, नगणः, द्वौ तगणौ अन्ते च गुरुद्वयं आयातः। अपि च (अम्बुधिः) चतुर्थे, (रसाः) षष्ठ, (नगाः) सप्तमे वर्णे यतिः भवति, इति सप्तदशवर्णात्मकं छन्दः भवति।

उदाहरणम् –

**मगण भगण नगण तगण तगण, गु.गु.**

**ऽऽऽ, ऽ ।।,।।।, ऽऽ ।,ऽऽ।, ऽऽ**

**अध्याक्रान्ता वसतिरमुनाऽप्याश्रमे सर्वभोग्ये = १७ वर्णाः**

**रक्षायोगादयमपि तपः प्रत्यहं संचिनोति ।**

**अस्यापि द्यां स्पृशति वशिश्चारणद्वन्द्वगीतः**

**पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ९. शार्दूलविक्रीडितम्

**लक्षणम् –**

**'सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्'**

यस्मिन् छन्दसि सर्वेषु पादेषु क्रमशः मगणः, सगणः, जगणः, सगणः, द्वौ तगणौ, अन्ते च गुरुवर्णः स्यात्, तत् 'शार्दूलविक्रीडितम्' नाम छन्दः। एकोनविंशतिवर्णात्मकं अस्मिन् छन्दसि द्वादशवर्णे (सूर्यैः), सप्तवर्णे (अश्वैः), च विरामो (यति) भवति।

**उदाहरणम् –**

**मगण सगण जगण  सगण  तगण तगण,  गु.**
ऽ ऽ ऽ, । । ऽ, । ऽ । ,  । ।ऽ, ऽ ऽ ।,  ऽ ऽ ।, ऽ
**केयूराणि न भूषयन्ति पुरुषं हारा  न चन्द्रोज्ज्वलाः =  १९ वर्णाः**
**न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः ।**
**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते**
**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।।**

## १०. स्रग्धरा

**लक्षणम् –**

**'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्'**

यस्य छन्दसः प्रतिचरणं क्रमशः मगण–रगण–भगण–नगणः – त्रयः यगणाश्च युक्तः भवति, तच्छन्दः 'स्रग्धरा' कथितः। एकविंशतिवर्णात्मके अस्मिन् छन्दसि प्रति सप्तमे वर्णे (त्रिमुनिः) यतिः भवति।

**उदाहरणम् –**

**मगण  रगण  भगण  नगण यगण  यगण  यगण**
ऽ ऽ ऽ ,  ऽ । ऽ,ऽ   ।।,। । ।,। ऽ ऽ, । ऽ ऽ, । ऽ ऽ,
**या सृष्टिः स्रष्टुराद्या,   वहति विधिहुतं या हविर्या च होत्री,**
**ये द्वे कालं विधत्तः, श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।**
**यामाहुः  सर्वबीज  प्रकृतिरिति यया प्राणिनः प्राणवन्तः,**
**प्रत्यक्षाभिः   प्रपन्नस्तनुभिरवतु   वस्ताभिरष्टाभिरीशः ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. छन्द शास्त्रस्य प्रणेता अस्ति–

(क) लगधमुनिः (ख) पिङ्गलमुनिः

(ग) सायणाचार्यः (घ) पाणिनिः ( )

(२.) छन्दः शास्त्रस्य नाम न वर्तते–

(क) छन्दोविचितिः (ख) छन्दोविवृत्तिः

(ग) छन्दोनुशासनम् (घ) छन्दाचरणम् ( )

(३.) संयुक्तवर्णस्य पूर्ववर्ती वर्णः भवति–

(क) लघुः (ख) गुरुः

(ग) यादृच्छिकः (घ) नियमः नास्ति ( )

(४.) तगणस्य स्वरूपमस्ति –

(क) आदिलघुः (ख) मध्यगुरुः

(ग) अन्तगुरुः (घ) अन्तलघुः ( )

### अतिलघूत्तरात्मकाः-प्रश्नाः–

१. गणः कः कथ्यते ?

२. गणाः कति भवन्ति ?

३. मगणस्य स्वरूपं लिख्यताम् ।

४. छन्दः शास्त्रे 'यति' शब्दस्य अर्थः कः अस्ति ?

५. कः गणः त्रिगुरुः भवति ?

६. प्रतिचरणं चत्वारः यगणाः कस्मिन् छन्दसि भवन्ति ?

७. नगणस्य स्वरूपं लिख्यताम् ।

### लघूत्तरात्मकाः-प्रश्नाः–

१. भुजङ्गप्रयातछन्दसः लक्षणं लिख्यताम्।

२. अधोलिखितोदाहरणेषु निर्धारणं कृत्वा तेषां लक्षणं लिखत –

(क) 'वसन्ततिलका तभजा जगौ गः' इत्यस्यार्थः स्पष्टीक्रियताम्।

(ख) गणसूचक-चक्रं स्पष्टीकरणीयम् ।

(ग) शिखरिणी छन्दसः उदाहरणं लिख्यताम्।

### निबन्धात्मक-प्रश्नाः–

१. छन्दोभेदाः निरूप्यताम् ?

२ . शार्दूलविक्रीडितं छन्दसः लक्षणं सोदाहरणं निरूपयत ?

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ( तृतीयः खण्डः )

# संस्कृतसाहित्येतिहासः

मुख्यतः द्विधा विभक्तमस्ति–वैदिकसाहित्यं लौकिकसाहित्यञ्च। वैदिकसाहित्यस्य अन्तर्गते संहिता–ब्राह्मण–आरण्यक–उपनिषद् इत्यादीनि साहित्यानि सन्ति। वेदाङ्गानि अपि वैदिकसाहित्ये एव परिगणितानि। लौकिकसाहित्यस्य अपि द्विधा विभाजनं प्राप्यते–दृश्यं श्रव्यं च। दृश्यं नाट्यसाहित्यम्। श्रव्यम् अपि त्रिधा विभक्तमस्ति – पद्यमयं, गद्यमयं, चम्पूरूपम् च। छन्दोबद्धरचना पद्यं भवति। यस्मिन् काव्ये छन्दांसि न भवन्ति तत्काव्यं गद्यकाव्यम् भवति। यत्र गद्यं पद्यं च मिश्रितं भवति तत्काव्यं चम्पूः भवति।

साहित्यदर्पणे अपि उक्तम् अस्मिन् विषये–'गद्यपद्यमयं काव्य चम्पूरित्यभिधीयते' इति। पद्यकाव्यस्य पुनः त्रिधा विभाजनं प्राप्यते – महाकाव्यं खण्डकाव्यं मुक्तकं च। गद्यकाव्यस्य द्वौ भेदौ स्तः – कथा आख्यायिका च। आधुनिकयुगे सामान्यतः हिन्दीसाहित्यप्रभावेण कथा अपि द्विधा विभज्यते उपन्यासरूपेण कहानीरूपेण च। परं तु एताः सर्वाः कथाः एव सन्ति।

## ( अ ) वैदिकसाहित्यम्–

### वेदपरिचयः

सम्पूर्णसंस्कृसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते। अस्माकं देशे भारतवर्षे धर्मव्यवस्था वेदाधारिता एव अस्ति। वेदाः धर्मनिरूपणे स्वतन्त्रभावेन प्रमाणम्, समृत्यादयस्तु तन्मूलकतया प्रमाणम्। वेदस्य प्रसिद्धिः श्रुतिरूपेण अस्ति, यतः वेदाः श्रुतिपरम्परया एव प्राचीनकालात् इदानीं पर्यन्त सुरक्षिताः सन्ति। श्रुतिस्मृत्योः विरोधे श्रुतिः एव गरीयसी, इदं सर्वमान्यमतम्। न केवलं धर्ममूलकतया एव वेदाः समादृताः अपितु विश्वस्मिन् सर्वप्राचीनग्रन्थतया अपि वेदाः एव सर्वेषाम् भारतीयविद्यानाम् आधाराः सन्ति। वेदेषु–दर्शनशास्त्रस्य, राजनीति–शास्त्रस्य, अध्यात्मज्ञानस्य, समाजशास्त्रस्य, मनोविज्ञानस्य, आयुर्वेदस्य, गणितशास्त्रस्य, अर्थशास्त्रस्य, काव्यशास्त्रस्य, कामशास्त्रस्य एवञ्च बहुविधकलानां वर्णनम् प्राप्यते। प्राचीनकाले समस्तधार्मिककार्याणि, सामाजिककार्याणि, व्यावहारिककार्याणि च वेदसमर्थितानि एव आसन्।

वेदाः भारतीयसंस्कृतेः मूलस्रोतांसि सन्ति। भारतीयसंस्कृतेः यथार्थज्ञानम् वैदिकसाहित्येन एव उपलभ्यते। भारतीयसंस्कृतेः स्वरूपस्य, यथा– यज्ञेषु अखण्डविश्वास्य, एकात्मस्वीकृत्या बहुदेववादे विश्वासस्य, निष्कामकर्मणा कर्त्तव्यतायाः, परमात्मतत्त्वस्य सर्वव्यापकतायाः, ज्ञानकर्मणोः समन्वयस्य, भौतिकवादं प्रति अनास्थायाः, पुनर्जन्मनि विश्वासस्य, पुरुषार्थचतुष्टयस्य सम्प्राप्तेः च, सम्यक् बोधः प्राप्यते। मानवकर्त्तव्यस्य बोधनार्थं वेदाः सर्वाधिकाः प्रामाणिकग्रन्थाः सन्ति। अत्र मानवमात्रस्य कर्तव्याकर्तव्ययोः यथास्थानं प्रतिपादनम् अस्ति। वेदेषु पितृपुत्रयोः, गुरुशिष्ययोः, स्त्रीपुरुषयोः, मातापित्रोः, व्यक्ति-समाजयोः च सर्वसम्बन्धानाम् आदर्शस्य च विशदं विवेचनं प्राप्यते। वेदेषु चतुर्ण्णां वर्णानामपि कर्तव्यनिर्देशः प्राप्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वेदः प्रमुखतया द्विविधः अस्ति – मन्त्ररूपः ब्राह्मणरूपश्च। मन्त्रसमुदायः एव संहिताशब्देन व्यवह्रियते। ब्राह्मणरूपः वेदभागः संहिताभागस्य व्याख्यारूपः विद्यते। अयम् ब्राह्मणभागः यागस्वरूपबोधकः अस्ति। ब्राह्मणग्रन्थः अपि त्रिधा विभक्तः भवति – ब्राह्मणम्, आरण्यकम्, उपनिषद् च। यज्ञस्वरूपप्रतिपादकः ब्राह्मणभागः। अरण्ये पठिताः यज्ञस्य आध्यात्मिकरूपं विवेचयन्तः वेदभागाः आरण्यकानि। उपनिषदः ब्रह्मात्मबोधिकाः मोक्षसाधिकाः सन्ति। वेदस्य अन्तिमरूपतया उपनिषद् 'वेदान्तः' इत्युच्यते। ब्राह्मणभागः गृहस्थानां कृते उपयोगी, आरण्यकभागः वानप्रस्थानां कृते, उपनिषद्भागश्च संन्यस्तानां हेतोः बहूपयोगी भवति।

**वेदशब्दार्थः –**

ज्ञानार्थक–'विद्' धातोः 'घञ्' प्रत्यययोगात् 'वेद' शब्दः निष्पद्यते। वेदशब्दस्य अर्थः ज्ञानम् अस्ति। 'विदन्ति ये धर्मब्रह्मणी क्रियामयं ब्रह्म वा अनेन इति वेदः।' इत्थं येन धर्मस्य ब्रह्मणः क्रियामयस्य ब्रह्मणः वा ज्ञानं भवति, सः वेदः कथ्यते।

यथाहि – बह्वृचप्रातिशाख्ये – **'विद्यन्ते धर्मादयः पुरुषार्थाः यैः, ते वेदाः'। सायणेन अपि उक्तम्– अपौरुषेयं वाक्यं वेदः इति।** एवमेव ऋग्वेदभाष्यभूमिकायामपि उक्तम्– **इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः।** वेद एव अन्तिमं प्रमाणम् इति स्वीकुर्वन्ति मनीषिणः।

यथाहि–

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एतं विदन्ति वेदेन तस्मात् वेदस्य वेदता।।**

आम्नायः, आगमः, श्रुतिः, वेदः, इति सर्वे शब्दाः पर्यायाः सन्ति।

सोऽयं वेदः 'त्रयी' इति पदेनापि व्यवह्रियते। वेदरचनायाः त्रिप्रकारकत्वेन त्रयीति कथ्यते। या रचना पद्यमयी सा 'ऋक्' या गद्यमयी सा 'यजुः', या पुनः समग्रा गानमयी रचना सा 'साम' इति कथ्यते। अतएव जैमिनिना उक्तम्– **'तेषामृग् यत्रार्थवशेन पादव्यवस्था। गीतिषु सामाख्या। शेषे यजुः शब्दः'** इति।

अतः यत्र कुत्रापि प्राचीनग्रन्थे वेदार्थे 'त्रयी' इति पदं प्रयुक्तं तत्र सर्वत्र रचनात्रैविध्यं मनसि कृतमिति बोध्यम्। यत्तु केचन "ऋग्यजुः सामाख्यास्त्रय एव वेदाः पूर्वमासन्", तद्यथा –

**'अग्नेर्ऋचो वायोर्यजूंषि सामादित्यात्'।** – छान्दोग्य ब्राह्मण, ६/१७
**'अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्'।**
**दुदोह यज्ञसिद्ध्यर्थमृग्यजुः सामलक्षणम्।।** मनुस्मृति, १/१३

अतः वेदानां त्रित्वात् एव तत्र त्रयीति व्यवहारः वास्तवः न प्रकारभेदकृतः इति तद् अयुक्तम्, ऋग्वेदे अपि अथर्ववेदनामोल्लेखदर्शनात्। महर्षिणा पतञ्जलिना अपि 'चत्वारो वेदाः साङ्गाः सरहस्याः' इति पस्पशाह्निके स्पष्टतया उक्तम्। महर्षिः जैमिनिः अपि मन्त्राणां त्रिप्रकारकतामेव लक्षितवान्, न वेदसंख्यां व्यवस्थापितवान्। अतः वेदाः चत्वारः एव, त्रयीति व्यवहारस्तु प्रकारकृतः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### ऋग्वेदः –

वैदिकसाहित्यस्य समग्रासु रचनासु ऋग्वेदः प्राचीनतमः महत्त्वपूर्णश्च अस्ति। अस्मिन् वेदे प्राचीनस्य भारतीयादर्शस्य, मर्यादायाः, ज्ञानस्य, मानवतायाः च समग्ररूपेण जीवन्तचित्रणं कृतमस्ति। छन्दोबद्धकारणात् इयं संहिता 'ऋग्वेदसंहिता' इति नाम्ना अभिहिता। छन्दोबद्धानां पद्यात्मकानां मन्त्राणां ऋक् ऋचा वा नाम अस्ति। संहिताशब्दस्य अर्थः, 'संग्रहः' विद्यते। एवम् ऋचां विशदसंग्रहः एव ऋग्वेदः अस्ति।

अयम् ऋग्वेदः सूक्तमण्डलभेदेन द्विधा विभक्तः अस्ति। तत्र सूक्तं चतुर्विधं विभक्तम् अस्ति– ऋषिः देवताच्छन्दोऽर्थसूक्तभेदात्। ऋषिदृष्टमन्त्रसमूहः ऋषिसूक्तम्। एकदेवताकमन्त्राणां समूहः देवतासूक्तम्। समानमन्त्राणां समूहः अर्थसूक्तम्। सु=सुष्ठु उक्तत्वात् 'सूक्तम्' इत्याख्यायते।

ऋग्वेदस्य मण्डलानुवाकवर्गभेदेन अष्टकाध्यायसूक्तभेदेन द्विप्रकारकः विभागः प्राप्यते। प्रथमविभागान्तर्गते ऋग्वेदे दशमण्डलानि, पञ्चाशीतयश्चानुवाकाः, अष्टोत्तरशतद्वयमिताश्च वर्गाः सन्ति। द्वितीये विभागान्तर्गते अष्टौ अष्टकानि, चतुष्षष्टिरध्यायाःसप्तदशोत्तरसहस्राणि च सूक्तानि प्राप्यन्ते।

सर्वे मन्त्राः दशसहस्रचतुःशतसप्तषष्टिपरिमिताः सन्ति, इति शाकलः। शौनकानुक्रमणी दशसहस्रपञ्चाशताशीतिपरिमितान् मन्त्रान् (१०५८०) उल्लिखति। अत्र कालभेदेन मन्त्रवृद्धिलोपः एव भेदस्य कारणम्। सर्वेऽपि मन्त्राः चतुर्दशसु छन्दस्सु विभक्ताः सन्ति।

ऋग्वेदान्तर्गते मन्त्रद्रष्टारः ऋषयः गृत्समदविश्वामित्र–वामदेव–अत्रि–भरद्वाज–वसिष्ठादयः सन्ति। ऋग्वेदस्य दशसु मण्डलेषु नवमं मण्डलं पवमानमण्डलम् अस्ति। अस्मिन् मण्डले सोमविषयकमन्त्राणां सङ्कलनमस्ति। पवमानः सोमः। उपर्युक्ताः मन्त्रद्रष्टारः ऋषयः द्वितीयमण्डलतः सप्तमण्डलपर्यन्तगताभिः ऋग्भिः सम्बद्धाः, दशममण्डले मन्त्राः नानाऋषिसम्बद्धाः। दशमे मण्डले न केवलं देवतास्तुतयः, अपि तु अन्यविषयकाः मन्त्राः अपि दृश्यन्ते। द्वितीयमण्डलात् आरभ्य सप्तममण्डलपर्यन्तस्य ऋग्वेदभागस्य रचना सर्वतः प्राचीना, दशमं मण्डलं सर्वतः अर्वाचीनम्, शेषाणि मध्यकालिकानि इति साम्प्रतिका आलोचकाः कथयन्ति।

ऋग्वेदस्य प्रमुखतया पञ्चशाखाः प्राप्यन्ते–शाकलः वाष्कलः, आश्वलायनः, सांख्यायनः, माण्डूकायनश्च। ऋग्वेदस्य मन्त्राः एतदतिरिक्तेषु त्रिषु अपि वेदेषु प्राप्यन्ते। सामवेदस्तु प्रायेण ऋग्वेदस्य मन्त्रैः एव उच्चारणभेदेन कल्पितः अस्ति। एवम् अस्य ऋग्वेदस्य महत्ता प्रमुखतया स्पष्टा। भाषासाहित्यदृष्ट्ययोः अपि ऋग्वेदः अनुपमग्रन्थः अस्ति। धार्मिकदृष्ट्या अपि अयम् अद्वितीयः यत्र आर्याणां प्राचीनविचारव्यवहारयोः समग्ररूपेण सङ्कलनमस्ति।

### यजुर्वेदः –

यजुर्वेदशब्दः यजुः वेदशब्दयोः योगात् निष्पन्नः भवति। यजुः शब्दस्य विद्वद्भिः अनेके व्युत्पत्तिजन्याः अर्थाः प्रकटिताः। यथा – 'यजुर्यजतेः', इज्यतेऽनेनेति यजुः, अनियताक्षरावसानो यजुः इति। तात्पर्यमिदमस्ति यत् यज्ञसम्बन्धिमन्त्राः यजुः, येन यज्ञयागादिकः सम्पन्नः भवति सः यजुः येषु मन्त्रेषु पद्यानामिव अक्षरसंख्याः निर्धारिताः न सन्ति तानि यजूंषि इति। यजूंषि गद्यानि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यज्ञे अध्वर्युभिः उपयुज्यमानाः मन्त्राः एव यजुर्वेदे सङ्कलिताः सन्ति। यज्ञस्य वास्तविकं विधानं अध्वर्युः एव करोति। अतः अयं यजुर्वेदः यज्ञविधेः अतिसन्निकृष्टं सम्बन्धं रक्षति।

यजुर्वेदः मुख्यतः द्विधा विभक्तः अस्ति– कृष्णयजुर्वेदः, शुक्लयजुर्वेदश्च। पौराणिकमतानुसारम्– ''व्यासः वैशम्पायनाय वेदं प्रोवाच, सः स्वशिष्याय याज्ञवल्क्याय प्रोक्तवान्। कस्माच्चिदपि कारणात् रुष्टो वैशम्पायनो याज्ञवल्क्यम् उवाच– देहि मदधीतं वेदमिति। याज्ञवल्क्यः गुरुवचनस्य अनुपालनाय ततः अधीतं वेदस्य सद्यः वमनं कृतवान्। वैशम्पायनस्य अन्ये शिष्याः तित्तिरिरूपं धृत्वा याज्ञवल्क्येन वान्तं वेदं गृहीतवन्तः। स एवार्थ वान्तगृहितः वेदः कृष्णयजुर्वेदः अस्ति।''

वैशम्पायने कुपिते सति तस्मात् अधीतं वेदं विसृज्य याज्ञवल्क्यः पुनर्वेदसम्प्राप्तये सूर्यदेवम् आराधितवान्, सूर्यदेवात् सम्प्राप्तः वेदः शुक्लयजुर्वेदनाम्ना प्रसिद्धः। अनयोः द्वयोः वेदयोः मध्ये महदन्तरं दृश्यते।

शुक्लयजुर्वेदे विनियोगवाक्यरहिताः मन्त्राः सन्ति। कृष्णयजुर्वेदे विनियोग-वाक्यात्मकाः मन्त्राः सन्ति। शुक्लयजुर्वेदः अमिश्रितरूपः कृष्णयजुर्वेदस्तु मिश्रितरूपः अस्ति।

सोऽयं यजुर्वेदः ४० अध्यायान्, ३०३ अनुवाकान्, १९७५ कण्डिका (मन्त्रान्), २९६२५ शब्दान्, ८८८७५ अक्षराणि च धारयति (युनक्ति)। अस्य वेदस्य प्रथमेऽध्याये दर्शपौर्णमासौ, द्वितीये पिण्डपितृयज्ञः, तृतीये अग्निहोत्रं चातुर्मासस्येष्टिः, चतुर्थाध्यायात् अष्टमाध्यायपर्यन्तम् अग्निष्टोमविधानं सोमयाः, नवमे वाजपेयः राजसूयश्च, दशमे सौत्रामणिः, एकादशाध्यायात् अष्टादशाध्यायपर्यन्तम् अग्निचयनम्, उखाभरणम्, चितयः, रुद्रहः, शतरुद्रियम्, वसोर्धारा, राष्ट्रभृत् च। अस्मात् परं चत्वारिंशदध्यायपर्यन्तम् अश्वमेधपुरुषमेधपितृमेधसर्वमेधः सदृशाः विविधाः यागाः वर्णिताः सन्ति। अस्यान्तिमः अध्यायः ईशावास्योपनिषद्रूपः अस्ति।

शुक्लयजुर्वेदस्य संहिता वाजसनेयिसंहिता अपि कथ्यते। अस्याः नामकरणप्रसङ्गे इदं प्रसिद्धं यत् याज्ञवल्क्येन आराधितः सूर्यः वाजी भूत्वा तस्मै वेदस्य उपदेशं कृतवान्, तत्कालादेव इयं संहिता वाजसनेयिसंहिता नाम्ना प्रसिद्धा जाता।

शुक्लयजुर्वेदस्य द्वे शाखे स्तः – माध्यन्दिनशाखा कण्वशाखा च। माध्यन्दिन-शाखा उत्तरभारते प्राप्यते तथा च कण्वशाखा दक्षिणभारते महाराष्ट्रे लभ्यते। अनयोः शाखयोः संहिते भिन्नेऽपि स्वल्पमेव भेदं धारयतः, बहुष्वंशेषु समानता विद्यते।

कृष्णयजुर्वेदस्य चतस्रः शाखाः प्राप्यन्ते–

१. **तैत्तिरीयशाखा**– इयं प्रधाना शाखा, अस्यां शाखायां सप्तखण्डाः सन्ति, ते च खण्डाः अष्टकशब्देन काण्डशब्देन च ज्ञायन्ते। इमे प्रपाठकाः बहुषु अनुवाकेषु विभक्ताः सन्ति।

२. **मैत्रायणी संहिता**– इमे द्वे अपि संहिते तैत्तिरीयसंहितामनुकुरुतः।

३. **काठकसंहिता**– केवलं क्रमे यत्र तत्र पार्थक्यं दृश्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सामवेदः -**

वैदिके वाङ्मये सामवेदस्य अपि स्थानम् अतिमहत्त्वपूर्णमस्ति। भगवता श्रीकृष्णेन, 'वेदानां सामवेदोऽस्मि' इति ब्रुवन् अस्य महिमानम् उद्घोषितः। महर्षिणा शौनकेन अपि उक्तम्- 'सामानि यो वेत्ति स वेदतत्त्वम्।' तात्पर्यमिदम् अस्ति यत् यः साम जानाति स एव वेदरहस्यं जानाति। ऋग्वेदे अथर्ववेदे चापि अस्य महत्त्वं प्रतिपादितम् वर्तते। ऋग्वेदः कथयति- 'यो जागार तमु सामानि यन्ति', अर्थात् यः जागरणशीलः तस्मै सामस्य प्राप्तिः भवति। अथर्ववेदेऽपि उक्तम्- 'सामानि यस्य लोमानि' इति। अस्य तात्पर्यमस्ति यत् सामानि परब्रह्मणः लोमानि सन्ति। एवम् सामगानस्य परम्परा अतिप्राचीना अस्ति। ऋग्वेदकालेऽपि यज्ञानुष्ठाने ऋत्विजः उच्चस्वरैः सामगानं कुर्वन्ति स्म। इदमेव सामगानं सङ्गीतशास्त्रस्य मूलम् अस्ति।

यज्ञे चत्वारः ऋत्विजः भवन्ति- १. होता, २. अध्वर्युः, ३. उद्गाता, ४. ब्रह्मा। होता-आह्वानकर्त्ता, स हि यज्ञावसरे प्रक्रान्तदेवतानां प्रशंसायां रचितान् मन्त्रान् उच्चारयन् देवताः आह्वयति, तत्कार्याय सङ्कलिताः मन्त्राः स्तुतिरूपतया ऋचः समाख्याताः, तेषां संग्रहः एव ऋग्वेदः। अध्वर्युः विधिवत् यज्ञं सम्पादयति, तत्रावश्यकमन्त्राः यजूंषि, तत्संग्रहो यजुर्वेदः। उद्गाता- उच्चस्वरेण गानकर्ता, स हि स्वरबद्धान् मन्त्रान् उच्चैः गायति, तदपेक्षितमन्त्रसंग्रहः सामवेदः। ब्रह्मा यज्ञनिरीक्षकः कृताकृतान्वेक्षणकर्ता स हि सर्वविधमन्त्रज्ञः भवति। तदपेक्षितो मन्त्रराशिरथर्ववेद इति कथ्यते।

सामवेदस्य गानप्रचुरता प्रसिद्धा। ऋचः एव गीयन्ते। सामवेदे १५४८ मन्त्राः सन्ति, तेषु ७५ मन्त्राः एवंविधाः ये 'ऋग्वेदे' न प्राप्यन्ते, शेषाः ऋग्वेदे अपि सन्ति। सामवेदगतमन्त्राणां सप्त स्वराः, यतस्ते गीयन्ते। ऋग्वेदे पुनस्तेषामेव मन्त्राणां त्रयः एव स्वराः। एतावनेव उभयवेदसाधारणानां साममन्त्राणाम् ऋग्वेदमन्त्रेभ्यः भेदः।

सामवेदस्य विभागद्वयमस्ति-आर्चिकम् ज्ञानश्च। आर्चिकस्यापि विभागद्वयम्-पूर्वार्चिकम् उत्तरार्चिकञ्च। पूर्वार्चिकमेव छन्दः छन्दसी, छन्दसिका चेति त्रिभिः नामभिः कथ्यते। विषयानुसारं पूर्वार्चिकं चतुर्षु भागेषु विभज्यते आग्नेयपर्व (अग्निसम्बन्धि-मन्त्रयुतम्), ऐन्द्रपर्व (इन्द्रसम्बन्धिनीभिर्ऋग्भिर्युतम्) पवमानपर्व (सोमविषयकम्), आरण्यकपर्व (अरण्यज्ञानसम्बन्धितम्) च।

उत्तरार्चिकम् तु अनुष्ठाननिर्देशकम् (यज्ञानुष्ठाननिर्देशकम्) तस्य बहवो विभागाः। तत्र दशरात्रम्, संवत्सरम्, ऐकाहम्, अहीनम्, सत्रम्, प्रायश्चित्तम्, क्षुद्रश्चेति प्रमुखाः भेदाः सन्ति।

सामगानम् चतुर्विधम् अस्ति- ग्रामगानम्, आरण्यज्ञानम्, ऊहगानम्, ऊह्यगानञ्च। ग्रामगानं प्रकृतिगानं कथ्यते, आरण्यगानं रहस्यज्ञानरूपेण प्रसिद्धम्। ऊहगानम् ऊह्यगानयोः आधारः ग्रामगानम् आरण्यगानञ्च।

सामगानस्य विधिः अतिकठिना वर्तते। अस्य ज्ञानार्थं सूक्ष्मज्ञानस्य कठिनपरिश्रमस्य च आवश्यकता भवति। 'पञ्चविधसूत्रानुसारम्' सामगानस्य पञ्च भेदाः सन्ति- प्रस्ताव-उद्गीथ-प्रतिहार-उपद्रव-निधनानि। छान्दोग्योपनिषदः अनुसारम् सामगानस्य सप्त भेदाःसन्ति। उपर्युक्ते भेदे 'विकारस्य' 'आदेः' द्वयोः योगः भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सामगाने सङ्गीतानुरूपं यत् शाब्दिकं परिवर्तनं क्रियते तत् 'सामविकार:' कथ्यते। सामविकारा: षड्विधा: भवन्ति- विकार-विश्लेषण-विकर्षण-अभ्यास-विराम-स्तोमरूपादय: इति।

निष्कर्ष: कथयितुं शक्नुम: यत् सामगानस्य प्राणा: स्वरा: सन्ति:। 'साम' इत्यस्य आरम्भ: 'ओम्' इति शब्देन भवति- 'ओमिति सामानि गायन्ति।' अस्य अवसान अपि 'ओम्' इति स्वरेण भवति। एतेषां गीतात्मकानां मन्त्राणां सङ्कलनमेव अत्र कृतम् अस्ति।

**अथर्ववेद: –**

महर्षिणा अथर्वणा दृष्टत्वात् अयं वेद: अथर्ववेद: इति कथ्यते। अस्मिन् वेदे धातुविधाया:, अभिचारक्रियाया: च प्रधानता अस्ति। अत्र २० काण्डानि, ७३० सूक्तानि, २९८७ मन्त्रा: सन्ति। एषु मन्त्रेषु द्वादशशतमन्त्रा: ऋग्वेदेऽपि प्राप्यन्ते। विंशकाण्डे १५३ सूक्तानि सन्ति, तेषु द्वादशसूक्तानि अतिरिच्य शेषाणि सर्वाण्यपि ऋग्वेदस्य दशममण्डले समुपलभ्यन्ते।

अथर्ववेदस्य नव शाखा: आसन्, परं सम्प्रति द्वे एव शाखे उपलभ्येते शौनकपिप्पलादसमाख्ये। प्रचलिता अथर्वसंहिता शौनकशाखान्तर्गता अस्ति, पैप्पलादिशाखान्तर्गतसंहिताऽपि अचिरेणैव मुद्रिता।

अथर्ववेदस्य वर्ण्यविषय: त्रिषु भागेषु विभक्त: अस्ति- अध्यात्मम्, अधिभूतम् अधिदैवतञ्च। अध्यात्मविभागान्तर्गते ब्रह्मण:, परमात्मन: चतुर्णाम् आश्रमाणाम् च निर्देश: प्राप्यते। अधिभूतान्तर्गते राजा-राज्य-संग्रामादीनां विषयाणां वर्णनम् अस्ति। अधिदैवतविभागे देवता-यज्ञ-काल-सम्बन्धिविषयाणां विवेचनं प्राप्यते।

अथर्ववेदे रोगानिवारका: अनेके मन्त्रा: सङ्कलिता: ये 'भैषज्यानि' कथ्यन्ते। अत्र रुज: (रोगा:) दानवरूपेण कल्पिता: यै: रोगोत्पत्ति: भवति। अत्रैव रुजठ: (रोगान्) दूरीकर्तुम्, तेषां प्रवर्तकानां असुराणां विनाशं कर्तुम् च विविधोपाय: वर्णित: अस्ति। कासं दूरीकर्तुम् एकस्मिन् स्थले एवम् प्रार्थना कृतास्ति –

**यथा सूर्यस्य रश्मय: परापतन्त्याशुभत्।**
**एवा त्वां कासे प्रपत समुद्रस्यानु विक्षरम्।।**

अत्र 'आयुष्यसूक्ते' स्वास्थ्य-दीर्घायुष्ययो: प्राप्तये अनेके प्रार्थना-मन्त्रा: सङ्कलिता: सन्ति। अत्रैव दीर्घायुष्याय 'जीवेम शरद: शतम्' इति प्रार्थना अस्ति। अथर्ववेद कतिपयेषु सूक्तेषु अनिष्टनिवारणाय, पशुरक्षणाय, हल-प्रवहणाय, बीजवपनाय, अन्नवृद्ध्यै व्यवसायवृद्ध्यै विविधविषयसम्बन्धिता: प्रार्थना-मन्त्रा: सन्ति ये 'पौष्टिकानि' कथ्यन्ते।

'प्रायश्चित्तम् इत्यस्य अन्तर्गते विभिन्नेषु यज्ञयागादिषु अनुष्ठानेषु विहितानाम् दोषाणां परिमार्जनाय पापमोचनार्थम् प्रायश्चित्तविधानं कृतमस्ति। अपराध-मोचनस्य एक: मन्त्र: एवम् अस्ति-

**यदि जाग्रत यदि स्वप्नेन एनस्योऽकरम्।**
**भूतं मा तस्माद् भव्यं च द्रपदादिव मुञ्चताम्।।**

अत्र कतिपयेषु मन्त्रेषु तत्कालीन-राजनैतिकदशाया: चित्रणम् अपि प्राप्यते। मन्त्रा: 'राजकर्माणि' रूपेण प्रसिद्धा: सन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अथर्ववेदे विज्ञानस्य विविधानाम् अङ्गानां विकासः अपि दृश्यते। अस्य विशदपर्यालोचनेन इदं ज्ञायते यत् तत्समये 'विज्ञानम्' विकसितावस्थायाम् आसीत्। रोगोत्पादकृमीणां विस्तरेण वर्णनं तान् विनाशयितुम् उपायाः अपि वर्णिताः। अत्र शल्यचिकित्सायाः अपि चर्चा प्राप्यते। एवमेव अभिचार-क्रियायाः प्रधानतयाऽपि आध्यात्मिक उच्चतायाः, राजनैतिकनिपुणतायाः, कृषि-कर्मणः, नीतिशास्त्रस्य स्वास्थ्यविज्ञानस्य च उच्चतमावस्थायाः दर्शनं भवति।

**ब्राह्मणग्रन्थाः -**

वेदो द्विविधः मन्त्रभागः ब्राह्मणभागश्च। मन्त्रभागेन सदृशः ब्राह्मणभागः अपि वेदः एव अस्ति। संहितानन्तरम् अस्य द्वितीयं स्थानम् अस्ति। ब्राह्मणग्रन्थाः वेदव्याख्यारूपाः सन्ति। वेदशेषभूता इमे ब्राह्मणग्रन्थाः। यज्ञानुष्ठानस्य विस्तृतं वर्णनं कुर्वन्ति। कतिचन कथा अपि ब्राह्मणेषु प्राप्यन्ते।

अत्र यज्ञक्रियायाः रहस्यमयस्य अर्थस्य प्रतिपादनमस्ति, अनेकेषु स्थलेषु वैदिकमन्त्राणां दार्शनिकः विचारः दृश्यते। यज्ञक्रियारीतेः व्यवधानवर्णनम्, यजमानस्य यज्ञफलप्राप्तेः सम्यक् निरूपणम् च अत्र कृतमस्ति।

प्रत्येकवेदशाखानुसारेण ब्राह्मणानि आरण्यकग्रन्थाश्च भिन्नाः सन्ति, तत्र ब्राह्मणानि यथा-

ऋग्वेदस्य ऐतरेयब्राह्मणम्, कौषीतकि-ब्राह्मणञ्चेति ब्राह्मणद्वयमस्ति। अनयोः ऐतरेयब्राह्मणे अष्टौ पञ्चिकाः, प्रतिपञ्चके पञ्चाध्यायाः, एवम् समग्ररूपेण मिलित्वा ४० अध्यायाः सन्ति। कौषीतकिब्राह्मणे केवलं त्रिंशत् ३० अध्यायाः सन्ति।

अथर्ववेदस्य ब्राह्मणम् गोपथब्राह्मणमस्ति। अत्र खण्डद्वयमेव अस्ति। प्रथमे खण्डे पञ्चाध्यायाः द्वितीये च षट् अध्यायाः सन्ति। ब्राह्मणग्रन्थेषु सर्वतः अभिनवोऽयं ग्रन्थः कथ्यते।

**आरण्यकग्रन्थाः -**

ब्राह्मणम्, आरण्यकम्, उपनिषदश्च वैदिकसाहित्यस्य पूरकसंहिताः सन्ति। ब्राह्मणग्रन्थानां पश्चात् आरण्यकानां महत्त्वपूर्णं स्थानमस्ति। वैदिक-संहितायाः अन्तिमः भागः ब्राह्मणम्, ब्राह्मणस्य अन्तिमः भागः आरण्यकम्, आरण्यकस्य अन्तिमः भागः उपनिषदः च सन्ति। आरण्यकग्रन्थाः उपनिषद्ब्राह्मणग्रन्थयोः मध्यवर्तिनः सन्ति।

यस्य साहित्यस्य अध्ययनं अध्यापनं च नगरग्रामाभ्यां दूरात् अरण्ये भवति स्म तत् साहित्यम् 'आरण्यकम्' कथ्यते। अरण्येषु निवासिनां वानप्रस्थानाम् यज्ञादेः कर्मविवेचनात्मकाः ग्रन्थाः 'आरण्यकम्' कथ्यन्ते। आचार्यसायणमते अरण्येषु अध्यापनकारणादेव एतत् साहित्यम् 'आरण्यकम्' इति नाम्ना प्रसिद्धम्।

एतेषु आरण्यकेषु यज्ञानां आध्यात्मिकानां विषयाणां विवेचनं कृतमस्ति। एतेषु विशेषरूपेण प्राणविद्यायाः महिमा प्राप्यते। ऐतरेये आरण्यके प्राणस्य विभिन्नगुणानां उल्लेखः प्राप्यते- "**प्राणेन एव अन्तरिक्षस्य वायोः च स्रष्टा अस्ति। प्राण एव पिता अस्ति।**" आरण्यकेषु प्राणः ऋषिरूपेण कल्पितः अस्ति। एवम् आरण्यकसाहित्यस्य विवेच्यः विषयः 'प्राणविद्या' अस्ति यस्याः साधना शान्ते एकान्ते च वातावरणे भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ऋग्वेदस्य आरण्यकद्वयमस्ति- ऐतरेयमारण्यकम् शाङ्खायनारण्यकञ्च। कृष्णयजुर्वेदस्य तैत्तिरीयमारण्यकम्। सामवेदस्य जैमिनीयोपनिषद्ब्राह्मणमेव तवलकारारण्यकमिति नाम्ना प्रसिद्धम्। अस्मिन् साममन्त्राणां प्रभावोत्पादिनी व्याख्या कृता अस्ति।

## उपनिषद्ग्रन्था: -

वेदानाम् अन्तिमो भाग: वेदान्त:। वेदान्त एव उपनिषद् कथ्यते। उपनिषच्छब्द: उप-नि-उपसर्गद्वयपूर्वस्य क्विप्प्रत्ययान्तस्य 'षद्लृ' धातो: योगात् निष्पन्न: भवति। 'षद्लृ' धातो: अर्थत्रयम् अस्ति-विशरणं=नाशम्, गति:=प्राप्ति:, अवसादनं=शिथिलनम् च। अस्य अर्थ: भवति यत् 'या विद्या परम्परया गुरो: समीपे उपविश्य प्राप्यते, तथा च यया समस्तानर्थोत्पादिकानां सांसारिकक्रियाणां नाश: भवति, संसारस्य कारणभूताया अविद्याया: बन्धनं शिथिलं भवति, ब्रह्मसाक्षात्कार: च भवति, सा विद्या उपनिषद् कथ्यते'। अत्र ब्रह्म-जीव-जगत्सम्बन्धिविषयाणां विशदं विवेचनं प्राप्यते। उपनिषत्सु ब्रह्म-जीव-संसार-सम्बन्धिरहस्यमपि प्रतिपादितमस्ति।

मुक्तोपनिषदि उपनिषदां संख्या १०८ उल्लिखिता। तत्र १० उपनिषद: ऋग्वेदसम्बद्धा:, १९ उपनिषद: शुक्लयजुर्वेदसम्बद्धा:, ३२ कृष्णयजुर्वेदसम्बद्धा:, १६ सामवेदसम्बद्धा:, ३१ अथर्ववेदसम्बद्धा:। वेदान्ताचार्या: एतासु उपनिषत्सु कतिचनोपनिषद: स्वमतानुसारिव्याख्यया भूषितवन्त:। तासु दश उपनिषद: प्रसिद्धा:- ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीय-ऐतरेय-छान्दोग्य-बृहदारण्यकोपनिषद:। श्वेताश्वतरोपनिषदेकादश्यपि प्रसिद्धा अस्ति।

कतिचनोपनिषद: गद्यात्मिका:, कतिचन पद्यात्मिका: कतिचन गद्यपद्योभयात्मिकाश्च। आसामुपनिषदां रचनाकाल: भिन्न:, परं प्रसिद्धा: कतिचन उपनिषद: बुद्धकालात्प्राचीन एवेति सर्वसम्मतम्।

उपनिषद: अतिसरलसरसशैल्यां तत्त्वं प्रकाशयन्ति। ऐतेन तासां महत्त्वं लोकप्रियत्वं चानुदिनम् अवर्धत्। आसां तत्त्वप्रकाशनशैल्या: निदर्शनं यथा -

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**
**बुद्धिं तु सारथिं विद्धि मन: प्रग्रहमेव च।।**
**इन्द्रियाणि हयानाहु: विषयांस्तेषु गोचरान्।**
**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण:।।**

भारतीयदर्शनस्य प्राणस्वरूपा गीताऽपि उपनिषद्रूपेण एव प्रसिद्धा।

## वेदाङ्गानि

संहिता-ब्राह्मण-आरण्यक-उपनिषद्-एभ्य: अतिरिक्तं वेदस्य षड् अङ्गानि सन्ति-शिक्षा, कल्प:, निरुक्तम्, व्याकरणम् छन्द: ज्योतिषञ्च। महर्षिणा पाणिनिना स्वशिक्षायाम् एवम् उल्लिखितम्-

**छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।** (पा.शि. ४१-४२)

पतञ्जलिनाऽप्युक्तम् पस्पशाह्निके- 'ब्राह्मणेन निष्कारणो धर्म: षडङ्गो वेदोऽध्येयो ज्ञेयश्च।'



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### १. शिक्षा –

शिक्षा नाम तत् शास्त्रम् येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पाद्यते। वेदे स्वराणां प्राधान्यं सर्वविदितम् स्वरज्ञानं च शिक्षाया अधीनम्, अत एव इदं शिक्षाशास्त्रं वेदाङ्गम्। सम्प्रति त्रिंशत्संख्याकाः शिक्षाग्रन्थाः उपलभ्यन्ते। तेषु याज्ञवल्क्यशिक्षा, वाशिष्ठीशिक्षा, कात्यायनीशिक्षा, पाराशरीशिक्षा, अमोघानन्दिशिक्षा, नारदीशिक्षा, शौनकीयशिक्षा, गौतमीशिक्षा, माण्डूकी शिक्षा, पाणिनीया शिक्षा च मुख्याः। पाणिनीया शिक्षा तु सर्वतोऽधिकं प्रसिद्धा अस्ति।

### २. कल्पः

ब्राह्मणकाले यागस्य तावान् प्रचारः जातः यत् तेषां यथावत् ज्ञानाय पूर्णपरिचयप्रदायकग्रन्थानां आवश्यकता अनुभूयते स्म। तामेव आवश्यकतां स्वल्पैः शब्दैः पूरयितुं कल्पसूत्राणां रचना जाता।

कल्पसूत्राणि द्विविधाणि सन्ति– श्रौतसूत्राणि स्मार्तसूत्राणि च। श्रुत्युक्त-योगविधिप्रकाशकानि श्रौतसूत्राणि। स्मार्तसूत्राणि अपि द्विविधानि–गृह्यसूत्राणि धर्मसूत्राणि च।

श्रौतसूत्रेषु अग्नित्रयाधानम्, अग्निहोत्रम्, दर्शपूर्णमासौ, पशुयागः नानाविधाः सोमयागाः चेति विषयाः सम्यक् विवेचिताः सन्ति।

गृह्यसूत्रेषु तेषामनुष्ठान-आचारयागानां वर्णनं विद्यते येषां सम्पादनं द्विजैः अवश्यं करणीयम्। षोडशसंस्काराणां विशिष्टं वर्णनमपि तत्र प्राप्यते।

धर्मसूत्रेषु धार्मिकनियमाः, प्रजानां राज्ञां च कर्तव्यानि, चत्वारो वर्णाः, चत्वारः आश्रमाः, तेषां धर्माः पूर्णरूपेण विवेचिताः सन्ति। एतानि धर्मसूत्राण्येव स्मृतीनां उत्पत्तिकारणानि विवेचितानि सन्ति।

शुल्वसूत्रमपि कल्पसूत्रमेव, तत् श्रौतसूत्रान्तर्गतम्। शुल्वं मापनक्रिया। इदं सूत्रमेव भारतीयज्यामितिशास्त्रस्य प्रवर्तकम्।

प्रत्येकस्य वेदस्य पृथक् पृथक् कल्पसूत्रम् अस्ति। ऋग्वेदस्य कल्पसूत्रम्– आश्वलायनं शाङ्खायनञ्च। शुक्लयजुर्वेदस्य कल्पसूत्रम्– कात्यायनश्रौतसूत्रञ्च। अनयोः कल्पसूत्रयोः श्रौतगृह्यधर्मशुल्वसूत्राणि सर्वाण्यपि सन्ति।

सामवेदस्य कल्पसूत्रम्– लाटायनश्रौतसूत्रम् द्राह्यायणञ्च। जैमिनीयशाखायाः श्रौतसूत्रम्– जैमिनिगृह्यसूत्रम्, गोभिलगृह्यसूत्रम्, खादिरगृह्यसूत्रञ्च। अथर्ववेदस्य कल्पसूत्रम्– वैतानश्रौतसूत्रम्, कौशिकसूत्रञ्च।

### ३. निरुक्तम्

निरुच्यते निःशेषेण उपदिश्यते निर्वचनविधया तत्तत् अर्थबोधनाय पदजातं यत्र तत् निरुक्तम्।

यद्यपि व्याकरणेनापि निर्वचनमुखेन पदानाम् अर्थावबोधः सिद्धयति तथापि निरुक्तानुसारेणैव अर्थाः निर्वक्तव्याः इति मुन्यनुशासनाद् व्याकरणसाध्यकतिपयकार्यविधायित्वाच्च शास्त्रमिदं पृथक् प्रणीतम्।

उपलभ्यमानो निरुक्तग्रन्थो यास्कस्य कृतिः। पाणिनेः प्राचीनोऽयं यास्कः ९०० ई. पूर्वकालिकः स्यादिति विदुषामभिप्रायः।

अत्र यास्कनिरुक्ते चतुर्दशाध्यायाः। बहवस्तु द्वादशाध्यायात्मकमेवेदं शास्त्रं मन्यन्ते अन्तिमौ द्वौ अध्यायौ पश्चात् योजितौ स्तः इति केचन मन्यन्ते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### ४. व्याकरणम्

भाषा लोकव्यवहारसाधिका भवति। यदि भाषा न स्यात् तर्हि इदं जगत् अन्धे तमसि निमज्जेत्। यथा हि दण्डिना उक्तम् –

**इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**

भाषायाः व्युत्पादनाय शुद्धये वा व्याकरणस्य अपेक्षा भवति। व्याकरणज्ञानविरहितः मनुष्यः साधून् शब्दान् प्रयोक्तुं समर्थः न भवति। वेदस्य रक्षार्थमपि व्याकरणाध्ययनम् आवश्यकम्। वेदरक्षाक्षमतयैव व्याकरणस्य वेदाङ्गत्वमपि समर्थ्यति। महर्षिणा पतञ्जलिना व्याकरणस्य अध्ययनस्य सर्वाणि प्रयोजनानि महाभाष्ये उक्तानि, यथा– 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।'

पाणिनेः अष्टाध्यायी कात्यायनस्य वार्तिकं पतञ्जलिकृतमहाभाष्यम् चैतत् मुनित्रयस्य व्याकरणं प्रसिद्धम्। परं तु भविष्यपुराणे ब्राह्मपर्वणि अष्टप्रकारकं व्याकरणं स्मृतम्–

**प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते।**
**याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा।।**
**सावित्रं च तथा प्रोक्तमष्टमं वैष्णवं तथा।**

लघुत्रिमुनिकल्पतरुकृतस्तु नव-व्याकरणानि स्मरन्ति–

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकलं पाणिनीयकम्।।**

एषु सर्वेष्वपि व्याकरणेषु लौकिकवैदिकोभयविधसाधकतया पाणिनीय-व्याकरणस्यैव प्राधान्यम् अस्ति। अतएव पाणिन्युपज्ञं व्याकरणं प्रसिद्धम्।

### ५. छन्दः

मन्त्राणां छन्दोबद्धतया छन्दसां ज्ञानं विना वेदमन्त्राः साधु उच्चारयितुं न शक्याः। शौनकविरचिते ऋक्प्रातिशाख्यस्य चरमे भागे छन्दसां पर्याप्तं विवेचनं प्राप्यते। अस्य छन्दश्शास्त्रस्य पिङ्गलच्छन्दः सूत्रनाम्ना ग्रन्थः सर्वाधिकः प्रसिद्धः। अयं केनचित् पिङ्गल-नामकेन आचार्येण विरचितः। अत्र वैदिकानि लौकिकानि च छन्दांसि विवेचितानि सन्ति।

### ६. ज्योतिषम्

इदं कालविज्ञापकं शास्त्रम्। मुहुर्तं शोधयित्वैव क्रियमाणाः यज्ञादिक्रिया-विशेषाः फलाय कल्पन्ते, नान्यथा, तन्मुहूर्त्तज्ञानञ्च ज्योतिषशास्त्राधीनम् आर्चज्योतिषेऽपि एवमेव उक्तम् –

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्।।** (आर्चज्योतिषम् ३६)

चतुर्णामपि वेदानां पृथक् पृथक् ज्योतिषशास्त्रमासीत्। तेषु सामवेदस्य ज्योतिषशास्त्रं नोपलभ्यते। अन्येषां त्रयाणां वेदानां ज्योतिषग्रन्थाः प्राप्यन्ते, यथा –

१. ऋग्वेदस्य ज्योतिषम्–आर्चज्योतिषम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. यजुर्वेदस्य ज्योतिषम्–याजुषज्योतिषम्

३. अथर्ववेदस्य ज्योतिषम्–आथर्वणज्योतिषम्, इति।

एतेषां त्रयाणामपि ज्योतिषां प्रणेता लगधो मुनिः अस्ति। अत्र याजुषज्योतिषस्य प्रामाणिकं भाष्यद्वयमपि प्राप्यते, एकं सोमाकरविरचितं प्राचीनम्, द्वितीयं सुधाकरद्विवेदिकृतं नवीनम् एतस्य ज्योतिषशास्त्रस्य त्रीणी वर्त्मानि, तदिदं शास्त्रं त्रिस्कन्धमुच्यते–

**सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमनुत्तमम्।।**

एतत्प्रवर्तकाः अष्टादश महर्षयः –

**सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।**
**कश्यपो नारदो गर्गः मरीचिर्मनुरङ्गिराः।।**
**लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।**
**शौनकोऽष्टादशाश्चैते ज्योतिःशास्त्रप्रवर्तकाः।।**

## वेदानां रचनाकालः

प्राचीनाः भारतीयाः विद्वांसः वेदान् अपौरुषेयान् मन्यन्ते। तेषां मते वेदरचनाकालविचारः सर्वथा निरर्थकः अस्ति। कतिपयाः पाश्चात्याः विद्वांसः यथाबुद्धिवैभवं वेदरचनाकालं निर्धारयन्ति। तान् विदुषः अनुसृत्य कतिपये भारतीयाः विद्वांसः अपि तेनैव मार्गेण वेदकालं निर्णेतुं प्रयतन्ते। अत्र तद्विषयकाः कतिचन विचाराः प्रस्तूयन्ते–

### १. मैक्समूलरमतम्–

मैक्समूलरमहोदयस्य मतेन ऋग्वेदस्य रचना ११५० ई.पू. समीपे जाता। बुद्धधर्मोदयात् प्रागेव ब्राह्मणग्रन्थेषु विवेचितयागविधीनां कटु–आलोचना क्रियते स्म, अपि च उपनिषत्समर्थितं कतिपयतत्त्वजातमात्मसात् क्रियते स्म। अत एव बुद्धात् पूर्वमेव (५०० ई.पू. प्राक्) ब्राह्मणोपनिषद्भागाः सम्भवन्ति। वैदिकसाहित्ये चत्वारि युगानि– छन्दोयुगम्, मन्त्रयुगम्, ब्राह्मणयुगम् सूत्रयुगञ्च। प्रत्येकयुगविकासे तेन वर्षशतद्वयं कालः कल्पितः। तदनुसारेण बुद्धात् ६०० वर्षतः पूर्वम् छन्दोयुगस्य अस्तित्वं समायाति। अतः ऋग्वेदस्य रचना ११५० ई.पू. समयात् पश्चात्कालिकी न सम्भवतीति।

अयं कालः मैक्समूलरमहोदयेन सम्भाव्यरूपेण उक्तः न तु निश्चयरूपेण, परं तु तमनुसृत्य पाश्चात्याः तदीयैरेव तर्कैः कालममुं निश्चयरूपेण कथयितुं प्रवृत्ताः।

### २. डॉ. अविनाशचन्द्रमतम्–

अयं महानुभावः वेदे निर्दिष्टानि अनेकानि भूगर्भशास्त्रीयतत्त्वानि आधारीकृत्य गणना द्वारा वेदस्य कालः २५ सहस्रसंवत्सरपूर्वं मन्यते। इदं मतम् 'ऋग्वेदिक इण्डिया' नामके पुस्तके स्पष्टतया प्रतिपादितम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### ३. शङ्करबालकृष्णदीक्षितमतम् –

वैदिकसंहितासु नक्षत्र-निर्देशकानि बहूनि वर्णनानि प्राप्यन्ते। शतपथब्राह्मणे एवम् उल्लेखः प्राप्यते–

**'एकं द्वे त्रीणि चत्वारि वा अन्यानि नक्षत्राणि, अथैता एव भूयिष्ठा यत् कृत्तिकास्तद् भूमानमेव एतदुपैति, तस्मात्कृत्तिकास्वादधीत। एता त ह वै प्राच्या दिशो न च्यवन्ते, सर्वाणि ह वा अन्यानि नक्षत्राणि प्राच्या दिशश्च्यवन्ते।'** (शतपथब्राह्मणम् २/१/२)

अनेन ज्ञायते यत् शतपथब्राह्मणरचनाकाले कृत्तिकाः नियमेन प्राच्यामासन्। सम्प्रत्येताः कृत्तिकाः पूर्वदिग्बिन्दुतः ईषदुत्तरस्यां दिशि उदयं यान्ति। दीक्षितमहोदयस्य गणनया तादृशी ग्रहस्थितिः ३००० ई.पू. काले सम्भवति। अतः स एव शतपथब्राह्मणः निर्माणकालः। तैत्तिरीयसंहिता शतपथात् प्राचीना, ऋग्वेदश्च तैत्तिरीयसंहितायाः अपि प्राचीनः। अतः ऋग्वेदस्य रचना ५०० वर्षाणि पूर्वं निश्चितरूपेण ३५०० ई.पू. काले जाता। एवञ्च सम्प्रति ऋग्वेदः ५५०० वर्षप्राचीनः इति निश्चीयते।

### ४. बालगंगाधरतिलकमतम् –

बालगङ्गाधरतिलकमहोदयस्य मते वेदरचनाकालः शङ्करबालकृष्णदीक्षितोक्तकालात् अपि प्राचीनः सिद्ध्यति। तेन हि मृगशिरानक्षत्रे वसन्तसम्पातस्य साधकानि बहूनि वेदवाक्यानि संगृहीतानि। तैत्तिरीयसंहितायाम् उच्यते– **'फाल्गुनीपूर्णिमावर्षादिः'**। तिलकमतमिदमनकूलमेव यतो यदि पूर्णश्चन्द्रः फाल्गुन्यां तदा सूर्येण मृगशिरायां भवितव्यमेव, तदेव च वसन्तसम्पातो भावी।

मृगशिरायां वसन्तसम्पातस्य कालः पूर्वोक्तकृत्तिका-कालात् प्रायः २००० वर्षाणि पूर्वं सम्भवति, यतः मृगशिरायाः कृत्तिकापर्यन्तं पश्चात् सर्पणे सहस्रद्वयाब्दी अपेक्ष्यते। अतः येषु मन्त्रेषु मृगशिरायां वसन्तसम्पातस्योल्लेखो विद्यते ते मन्त्राः ४५०० ई.पू. समयतोऽर्वाचीनाः सम्भवन्ति। एवम् तिलकमहोदयस्य मते ऋग्वेदस्य रचनाकालः ६००० वर्षपूर्वम् निर्णीतः।

जर्मनविद्वान् याकोबीमहोदयः अपि तिलकमहोदयस्य मतं पुष्णाति। तेन ऋग्वेदस्य रचनाकालः ४५०० ईशवीतः पूर्वमेव निर्धार्यते।

उपर्युक्तमतानां आलोचनेन कथयितुं शक्यते यत् वेदस्य रचनाकालस्य पूर्वसीमा ४५०० ई.पू. वर्षतः आरभ्य १५०० ई.पू. यावत् अन्तिमा स्थितिः अवश्यमेव भवितव्या।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. वेदाः भागेषु विभक्ताः सन्ति –

(क) एकस्मिन् (ख) द्वयोः

(ग) त्रिषु (घ) चतुर्षु ( )

२. धर्ममूलम् उच्यते –

(क) पुराणानि (ख) भारतम्

(ग) धर्मशास्त्रम् (घ) वेदः ( )

३. चतुर्षु वेदेषु प्राचीनतमः वेदः अस्ति –

(क) यजुर्वेदः (ख) सामवेदः

(ग) ऋग्वेदः (घ) अथर्ववेदः ( )

४. 'अपौरुषेयं वाक्यं वेद इति' प्रोक्तम्–

(क) सायणेन (ख) महीधरेण

(ग) कैय्यटेन (घ) उव्वटेन ( )

५. ऋग्वेदः विभक्तः अस्ति–

(क) एकधा (ख) द्विधा

(ग) त्रिधा (घ) चतुर्धा ( )

६. ऋग्वेदः मण्डलेषु विभक्तः अस्ति–

(क) एकस्मिन् (ख) त्रिषु

(ग) दशसु (घ) अष्टसु ( )

७. ऋग्वेदस्य नवममण्डलस्य नाम अस्ति–

(क) पवमानमण्डलम् (ख) सवितृमण्डलम्

(ग) देवमण्डलम् (घ) ऋषिमण्डलम् ( )

८. यज्ञे ऋत्विजः भवन्ति–

(क) एकः (ख) द्वौ

(ग) त्रयः (घ) चत्वारः ( )

९. सामवेदे कति मन्त्राः सन्ति –

(क) १३५९ (ख) १८८९

(ग) १५४८ (घ) १६६९ ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०. वेदानां सामवेदोऽस्मि इति प्रोक्तम्–

(क) कृष्णेन (ख) अर्जुनेन

(ग) युधिष्ठिरेण (घ) व्यासेन ( )

११. वेदान् अपौरुषेयान् मन्यन्ते–

(क) प्राचीनभारतीयविद्वांसः (ख) आधुनिकभारतीयविद्वांसः

(ग) बालगङ्गाधरतिलकः (घ) पाश्चात्यविद्वांसः ( )

१२. मैक्समूलरमते ऋग्वेदस्य रचना जाता–

(क) १५०० ई.पू. समीपे (ख) १६०० ई.पू.समीपे

(ग) ११५० ई.पू. समीपे (घ) ८०० ई.पू. समीपे ( )

१३. बालङ्गाधरतिलकमते ऋग्वेस्य रचनकालः अस्ति–

(क) ६००० वर्षपूर्वम् (ख) ५००० वर्षपूर्वम्

(ग) ४००० वर्षपूर्वम् (घ) ३००० वर्षपूर्वम् ( )

१४. वेदस्य अङ्गानि सन्तिः–

(क) पञ्च (ख) षड्

(ग) सप्त (घ) अष्ट ( )

१५. येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पाद्यते, तच्छास्त्रस्य नाम अस्ति–

(क) शिक्षा (ख) कल्पः

(ग) छन्दः (घ) व्याकरणम् ( )

**लघूत्तरात्मकप्रश्ना :**

१. ऋग्वेदस्य परिचयः संक्षेपेण लिखत?

२. वेदानां रचनाकालविषये विदुषां मतं संक्षेपेण लिखत?

३. वेदाङ्गानि कति सन्ति? संक्षेपेण वर्णयत?

**निबन्धात्मकप्रश्नाः**

१. यजुर्वेदस्य भेदविषये पौराणिकमतं विवेचयत?

२. सामवेदस्य महत्त्वं स्पष्टयत?

३. अथर्ववेदस्य वर्ण्यविषयं संक्षेपरूपेण प्रतिपादयत?

४. वैदिकसाहित्यस्य पूरकसंहिताः आधारीकृत संक्षेपेण विवेचनं कुरुत?

**वस्तुनिष्ठप्रश्नाः–उत्तरमाला**

(१) घ (२) घ (३) ग (४) क (५) ख (६) ग (७) क (८) घ (९) ग (१०) क (११) क (१२) ग (१३) क (१४) ख (१५) क

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ( ब ) लौकिकसाहित्यम्

### ( क ) प्रमुख-नाटकानि –

### प्रतिज्ञायौगन्धरायणम्

महाकविना भासेन विरचितं 'प्रतिज्ञायौगन्धरायणम्' प्रसिद्धं नाटकमस्ति। अस्य नाटकस्य कथानकः 'स्वप्नवासवदत्तम्' इत्यस्य पूर्वभागः विद्यते। अस्मिन् नाटके यौगन्धरायणनामामात्यस्य स्वामिभक्तं चरित्रं नितान्तमेव मनः आवर्जयति। चतुर्षु अङ्केषु विभक्तमिदं नाटकं प्रकरणरूपमस्ति। अस्मिन् वत्सराजोदयनेन सह उज्जयिनीनरेशस्य महासेनस्य पुत्र्याः वासवदत्तायाः गुप्तपरिणयस्य वर्णनं तथा च मन्त्रियौगन्धरायणस्य बुद्धिवैभवस्य वीरतायाश्च वर्णनं कृतमस्ति।

महासेनस्य कारागृहात् उदयनस्य उन्मोचनाय यौगन्धरायणः यां नीतिमाचरति सा सातिशयेन श्लाघनीयः अस्ति। महाकवेरिदं निखिलमपि विधानं हृदयहारकमस्ति। एतेन सहैव महासेनस्य राजप्रासादस्य दृश्यमपि कथमपि न्यूनं नास्ति। एतद्धि स्वीयेन सौन्दर्येण सर्वेषां चेतांसि चोरयति। नाटकस्यास्य कथावस्तु इत्थमस्ति –

वत्सदेशोद्भवः उदयनः रूपयौवनसम्पन्नः विशालकुलसम्भवः विदित-वेदितव्यः अधीतसर्वशास्त्रः राजकुमारः अस्ति। प्रद्योतः सेनाप्राचुर्यात् महासेननाम्ना प्रथितः अस्ति। तस्य पुत्री वासवदत्ता युवावस्थोपेता सुरूपा सगुणा विवाहयोग्या अस्ति। 'सुयोग्यवराय कन्या देया' इति चिन्तापरायणो प्रद्योतः आखेटाय स्वकीये नागवने प्रविष्टमुदयनं वशीकर्तुं 'नीलकुवलयतनु' नामकं कृत्रिमं गजं तत्र स्थापयति। उदयनः तत्र आखेटाय याति प्रद्योतसैनिकैश्च बन्दीभवति ।

यौगन्धरायणः एतद् वृत्तं निशम्य चिन्तितः भवति। राजमाता अपि स्वतनयस्य इमां दशां श्रुत्वा दुःखिता भवति। किन्तु सा जानाति यत् यौगन्धरायणः सुयोग्यः कुशलः अनुभवशीलः स्वामिभक्तः अस्ति। अतः सा तं स्वकीयं पुत्रं शत्रुकारागारात् मोचयितुं कथयति। यौगन्धरायणः प्रतिज्ञामाचरति। दैवयोगात् पार्श्ववर्तिराज्ञः अन्तःपुरे प्रविश्य स्वकार्यनिष्पादने समर्थो भवेत्।

द्वितीय अङ्के प्रद्योत महाराज्ञा अङ्गारवत्या वासवदत्तायाः विवाहाय मन्त्रणां करोति। तदैव कञ्चुकी तत्र प्रविश्य प्रसन्नतातिरेकेण 'गृहीतो वत्सराजः', इत्यस्य स्थाने वत्सराजः इत्येव ब्रवीति। तदनन्तरम् उदयनस्य घोषवती वीणाऽपि तत्र आनीयते। प्रद्योतः इमां वीणां वासवदत्तायै प्रयच्छति। महाराज्ञी अङ्गारवती निश्चयं करोति यत् वत्सराज एव सुयोग्यः वरः वासवदत्तायै।

तृतीय अङ्के वत्सराजस्य मन्त्रिणः तं कारागारद् मोचयितुं योजनां कुर्वन्ति। उदयनस्तत्र कथमपि वासवदत्तामवलोक्य तां प्रति अनुरक्तः भवति। स वसन्तकं सूचयति यत् वासवदत्तां विना कारागारात् बहिरागन्तुं न मे मनः। यौगन्धरायणः घोषवती वीणां नीलगिरिनामकं गजं वासवदत्तया सह उदयनं च स्वदेशे आनयनाय प्रतिज्ञां करोति।

चतुर्थे अङ्के वत्सराजः वासवदत्तया सह भद्रवती नाम्नीं हस्तिनीमारूह्य पलायते। प्रद्योतस्य सेना यौगन्धरायणस्य सेनामाक्रामति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दुर्भाग्यवशात् यौगन्धरायणस्य कृपाण: खण्डित: भवति, शत्रवश्च तं अधिगृह्णन्ति। प्रद्योतस्य मन्त्री यौगन्धरायणेन उदयनस्य पलायनकर्मण: निन्दां करोति। कञ्चुकी महासेनद्वारा भृङ्गारनामकं सुवर्णपात्रं उपायनरूपेण राजभक्ताय यौगन्धरायणाय आनयति। यौगन्धरायण: प्रथमं तत् न गृह्णाति किन्तु यदा स जानाति यत् प्रद्योतेन वासवदत्ताया: उदयनस्य च विवाह: चित्रफलके सम्पादित: तदा स सहर्षमुपायनं स्वीकरोति। अन्तत: मेलनं भवति। भरतवाक्येन च नाटकं पूर्णतां प्राप्नोति।

## विक्रमोर्वशीयम्

नाट्यकलाविकासदृष्ट्या 'विक्रमोर्वशीयम्' तु 'मालविकाग्निमित्रम्' नाटकस्य पश्चात् कालिदासस्य द्वितीयं नाटकम् अस्ति। पञ्चसु अङ्केषु विभक्तेषु अस्मिन् त्रोटके (उपरूपके) पुरुरवा -उर्वश्यो: पौराणिककथा वर्णिता अस्ति। इयं कथा 'मत्स्यपुराणे' प्राप्यते। अङ्कानुसारेण कथावस्तु एवम् अस्ति-

प्रथम: अङ्क: - उर्वश्या: शिवसेवानन्तरं कैलाशपर्वतात् इन्द्रलोकनिवर्तनम्, मार्गे 'केशी' नामकेन दैत्येन उर्वश्या: पीडनम्, उर्वश्या:, करूण-क्रन्दनं श्रुत्वा राज्ञा पुरुरवाद्वारा तस्या: रक्षणम्, द्वयो: मध्ये परस्परानुरागस्य प्रारम्भ:।

द्वितीय: अङ्क:- राजा पुरुरवाविदूषकयो: मध्ये उर्वशीविषयकस्य प्रेम्ण: वार्तालापम् उर्वश्या: तस्या: च सख्या: प्रेम्ण: वार्तालापश्रवणम्, उर्वश्या: प्रेमपत्रलेखनम् ।

तृतीय:अङ्क: - भरतमुने: शापप्रसङ्ग:। इन्द्रकृपा शापस्य अवधे: पुरुरवापुत्रदर्शनपर्यन्तं निर्धारणम् उर्वश्या: (पुरूरवा) नाटकनायकेन सह प्रेमपूर्वकं निवास:।

चतुर्थ: अङ्क:- उर्वश्या: कार्तिकेयस्य गन्धमादनवनं प्रति गमनम्, तत्र तस्या: लतारूपेण परिवर्तनम् वियोगे पुरुरवाविलपनम्, आकाशवाण्या पुरुरवाहेतो: सङ्गमनीयमणियुक्ताया: लताया: आलिङ्गनाय आदेश:, पुन: तस्या लताया: उर्वशीरूपेण परिवर्तनम्।

पञ्चम: अङ्क:- राज्ञ: पुत्रोत्पत्तिसूचना, उर्वश्या: विषाद:, इन्द्रलोकात् नारदस्य आगमनम्, इन्द्रस्य आदेशकथनम् यत् उर्वश्या: सदा सर्वदा पुरूरवासहधर्मिणीरूपेण निवास: भविष्यति इति।

इत्थं कलादृष्ट्या विक्रमोर्वशीयस्य स्थानम् मालविकाग्निमित्रस्य अभिज्ञानशाकुन्तलस्य च मध्ये स्थितम् अस्ति। कविना स्वप्रतिभया एकस्मिन् पौराणिके कथानके महत्त्वपूर्णं परिवर्तनं कृत्वा नवीनं रूपं प्रदत्तम्। भरतमुनिना उर्वश्या: मृत्युलोके गमनस्य शाप: कार्तिकेयस्य उपवने उर्वश्या: लतारूपेण परिवर्तनम्, एतेन परिवर्तनेन पुरुरवाविलाप: इत्यादिना कतिपयेन नवेन अनुसंधानेन अस्य नाटकस्य रोचकता परिवर्धते।

अस्मिन् नाटके शृङ्गारस्य सर्वासु दशासु अत्यन्तं मार्मिकं चित्रणं कृतमस्ति। अत्र संयोगविप्रलम्भयो: उत्तम: परिपोष: दृश्यते। यद्यपि 'विक्रमोर्वशीयम्' इत्यस्य भाषा अभिज्ञानशाकुन्तलमिव परिष्कृता नास्ति, तथापि सा प्रसादगुणोपेता सौष्ठवयुक्ता अलंकृता चास्ति। अस्य नाटकस्य लघुछन्दस: माधुर्यं वैविध्यं च निदर्शनरूपेण दर्शनीयम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उर्वश्या: अप्रतिमरूपत्वं दृष्टवा राजा मनसि एवं विचारयति–

**अस्या: सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रद:**
**शृङ्गारैकरस: स्वयं नु मदनो मासो नु पुष्पाकर:।**
**वेदाभ्यासजड: कथं नु विषयव्यावृत्तकौतूहलो**
**निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनि:।।**

कालिदासस्य उपमाकौशलमपि अत्र विशेषरूपेण प्रस्फुटिमस्ति। उर्वश्या: मूर्च्छितदशाया: चेतनदशायाम् आगमनस्य अत्यन्तं मार्मिकं वर्णनं प्राप्यते–

**आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि–**
**नैशस्यर्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा।**
**मोहेनान्तर्वस्तुनुरियां लक्ष्यते मुक्तकल्पा**
**गङ्गारोध: पतनकलुषा गच्छतीव प्रसादम्।।**

काव्यसौन्दर्यदृष्ट्या विक्रमोर्वशीयस्य चतुर्थ: अङ्क: अप्रतिम: अस्ति। तस्य प्राकृतपद्यानां गीतिसौन्दर्यं, प्रकृतिवर्णनं प्रेमीजनस्य विरहव्यथावर्णनं च समग्ररूपेण मेघदूतस्य पूर्वचित्रम् प्रस्तुतं कुर्वन्ति। नाट्यदृष्टया अपि इदं नाटकं सफलम् अस्ति।

## मुद्राराक्षसम्

'मुद्राराक्षसम्' नाम नाटकम् महाकविना विशाखदत्तेन विरचितम् अस्ति। कविना विशाखदत्तेन रचितम् अपरं नाटकं 'देवीचन्द्रगुप्तम्' अन्येषु ग्रन्थेषु उद्धरणरूपेण प्राप्यते न तु स्वतंत्ररूपेण। 'मुद्राराक्षसम्' नाम नाटकमेव केवलं स्वतन्त्ररूपेण उपलभ्यते। इदमेव नाटकम् विशाखदत्तस्य प्रसिद्धे: आधारभूतम् अस्ति। अस्य नाटकस्य प्रस्तावनायां कविना स्ववंशपरिचयं प्रस्तुवन् स्वं बटेश्वरदत्तस्य पौत्रं पृथो: पुत्रम् च घोषितम् –

"अद्य सामन्तबटेश्वरदत्तपौत्रस्य महाराजपदभाक्पृथुसूनो: कवेर्विशाखदत्तस्य कृति: मुद्राराक्षसं नाम नाटकं नाटयितव्यम्।"

परं तु इतिहासे 'बटेश्वरदत्त:' नामकस्य अथवा 'पृथु:' नामकस्य राज्ञ: वर्णनं न प्राप्यते। अतएव विशाखदत्तविषये स्पष्टरूपेण कश्चिदपि निर्णय: सम्भव: नास्ति।

मुद्राराक्षसस्य रचनाकालगणनाप्रसङ्गे मतत्रयं विद्यते। अस्य भरतवाक्ये (अन्तिमश्लोके) 'दन्तिवर्मा', 'अवन्ति वर्मा', 'चन्द्रगुप्त' इति पाठै: त्रीणि अपि मतानि पुष्णन्ति। आचार्यरामचन्द्रमिश्रेण एवम् उल्लेख: कृत:।

'दन्तिवर्मा दक्षिणदेशे पल्लवनरेशो हि ७२० तमे खीष्टाब्दे भूमिं प्रशासत, परं तु अस्मिन् समये म्लेच्छोपद्रव: नासीत् इति भरतवाक्यम् न अन्वेति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

द्वितीय: चन्द्रगुप्त: ३७५-४१३ ख्रीष्टाब्दकाले आसीत् इति तस्मिन्नेव काले विशाखदत्तस्य समय: इति जायसवाल: (इदमपि मतं न तथ्यं, यत: चन्द्रगुप्तकालात् ५० वर्षत: परत: हूणानाम् आक्रमणम् अजायत अतो न भरतवाक्यसङ्गति:)। अवन्तिवर्मा एक: काश्मीरक:, अपरश्च कान्यकुब्जशासिता मौखरिवंश्य:। अस्यैव पुत्रो ग्रहवर्मा, महाराज-हर्षवर्धनस्य भगिनीं राजश्रियं परिणीतवान्। अस्यैव समये विशाखदत्त: मुद्राराक्षसं विरचितवान् इति मतमेव इतिहाससमर्थितं यत: अस्मिन्नेव काले हूणानां उपद्रव: पश्चिमोत्तरभारते अजायत। इयं घटना ५८२ ख्रीष्टाब्दसमीपे जाता, अत: मुद्राराक्षसस्य प्रणयनकाल: षष्ठशताब्दी सिद्ध्यति।''

प्रायेण बहुभि: विद्वद्भि: विशाखदत्तस्य अयमेव: काल: समर्थ्यते।

**कथानकम् –**

'मुद्राराक्षसम्' सम्पूर्णे संस्कृतसाहित्ये एका विलक्षण नाट्यकृति: विद्यते। सप्तसु अङ्केषु इदं नाटकं राजनीतिप्रधानं कूटनीतिसमाविष्टं चास्ति। अस्य कथावस्तु, क्लिष्टा कूटनीतियुक्ता चास्ति। अस्मिन् नाटके चाणक्य: मगधराजस्य नन्दस्य मन्त्रिण: राक्षसस्य च मुद्रया विविधानि कार्याणि करोति।

अतएव 'मुद्राराक्षसम्' नाम सार्थकम् अस्ति। अङ्कानुसारेण कथानकं संक्षेपेण एवम् अस्ति-

**प्रथमोऽङ्क: –** नान्दीपाठप्रस्तावनानन्तरं चाणक्यस्य प्रवेश: भवति। तेन नन्दवंशं विनाशयितुं कृतप्रतिज्ञावर्णनं राक्षसं वशीकर्तुं संकल्पश्च। चाणक्यस्य स्वगुप्तचरेण निपुणकेन राक्षसस्य मुद्राप्राप्ति: वर्णितास्ति।

**द्वितीयोऽङ्क: –** राक्षसस्य कूटनीते: असफलताया: वर्णनम्। चन्द्रगुप्त-चाणक्ययो: मध्ये विभाजनप्रयासवर्णनम् विफलत्वं च वर्णितम्।

**तृतीयोऽङ्क: –** चन्द्रगुप्तचाणक्ययो: छद्मकलहस्य मतभेदस्य च वर्णनम्।

**चतुर्थोऽङ्क: –** मलयकेतो: कपटमित्रस्य भागुरायणस्य कपटयोजनाया: वर्णनम्, राक्षसेन स्वयोजनायां विफलताया: ज्ञानम्, नन्दवंशसिंहासने राक्षसेन चन्द्रगुप्तं निवार्य मलयकेतो: आसीनं कर्तुं प्रयास:।

**पञ्चमोऽङ्क: –** मलयकेतो: राक्षसे अविश्वासर्णनम्, चाणक्यस्य कूटनीते: उत्कर्षवर्णनं राक्षसस्य विरोधेन मलयकेतो: स्वसामन्तै: सह बन्धनम् ।

**षष्ठोऽङ्क: –** चाणक्येन समस्तशत्रुदलोपरि यूक्तिपूर्वकं स्ववशीकरणवर्णनम्, राक्षसस्य सैन्यशिविरात् निर्गत्य पाटलिपुत्रे आगमनम्, तत्र जीर्णोद्याने गुप्तचरेण राक्षसस्य अनुगमनम्, स्वमित्रस्य चन्दनदासस्य मृत्युदण्डं श्रुत्वा मित्रस्य रक्षार्थं प्रस्थानम् वर्णितम्।

**सप्तमोऽङ्क: –** चाणक्यस्य कूटनीते: साफलस्य राक्षसस्य असाफल्यस्य च वर्णनम्, विवशीभूय राक्षसेन चन्द्रगुप्तस्य मन्त्रित्वस्य स्वीकरणम्, मलयकेतो: स्वराज्यप्राप्ति: चन्दनदासस्य नगरश्रेष्ठपदस्य प्राप्ति:, प्रतिज्ञापूर्त्यनन्तरं चाणक्येन स्वशिखाबन्धनम्, भरतवाक्येन नाट्यसमाप्तिश्च।

**मुद्राराक्षसस्य वैशिष्ट्यम् –** मुद्राराक्षसे कतिपयानि एतादृशानि वैशिष्ट्यानि सन्ति यानि अन्येषु संस्कृतनाटकेषु न उपलभ्यन्ते। तानि द्रष्टव्यानि-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१. 'मुद्राराक्षसम्' पूर्णतया राजनीतिप्रधानं नाटकमस्ति यस्य आधारः ऐतिहासिकः विद्यते।

२. अत्र अङ्कानामपि विभाजनं दृश्येषु उपलभ्यते। तृतीये अङ्के नैकदृश्यपरिवर्तनं स्पष्टरूपेण ज्ञायते।

३. स्त्रीपात्राणां पूर्णतया अभावः वर्तते, अतएव शृङ्गाररसस्य अभिव्यञ्जना कुत्रापि न दृश्यते।

४. मुद्राराक्षसं विशुद्धं घटनाप्रधानं नाटकमस्ति, अतः कस्यापि रसविशेषस्य विशिष्टता न प्रतीयते। दशरूपककारेण धनञ्जयेन 'नाटकं रसाश्रितं भवेत्' एतद्दृष्ट्या इदं नाटकं वीररसप्रधानं नाटकम् अस्ति।

५. विशाखदत्तेन अस्मिन् नाटके धीरोदात्तः क्षत्रियः चन्द्रगुप्तः नायकरूपेण न स्वीकृतः अपितु ब्राह्मणः चाणक्यः नायकरूपेण स्वीकृतः।

६. अस्मिन् नाटके विदूषकस्य अभावः विद्यते। अतएव हास्यस्य अभावः, फलतः सर्वत्र गम्भीरं वातावरणं दृश्यते।

७. वास्तविकरूपेण इदं नाटकम् आद्यन्तं ओजस्वितायाः, पौरुषतायाः, तेजस्वितायाः च ओत-प्रोतम् अस्ति।

८. कार्यान्वितिदृष्ट्या अपि इदं नाटकं सफलतम् अस्ति। अत्र मित्रतायाः चित्रितानि, घटनानिर्वहणे च समर्थानि सन्ति।

९. नाट्यशास्त्रदृष्ट्या अस्मिन् नाटके सर्वेषाम् अपेक्षितानां नाट्यतत्त्वानां यथास्थाने समावेशः प्राप्यते। कथावस्तु-विकासदृष्ट्या पञ्चार्थप्रकृतीनां पञ्चावस्थानां च यथास्थाने निर्देशः, पञ्चसन्धीनामपि सम्यक्प्रयोगः विहितः। नान्दी-प्रस्तावनायुक्ता इयं कृतिः कवेः विशाखदत्तस्य अपेक्षितसर्वनाट्यगुणान्विता सफला कृतिः अस्ति।

१०. मुद्राराक्षसस्य रचनायाम् उत्कृष्टा कलात्मकता अस्ति। कविना पदे-पदे औचित्यविचारः कृतः।

**भाषाशैली –**

भाषाशैलीदृष्ट्या अपि इदं नाटकं श्रेष्ठम् अस्ति। नाटककारेण समय-परिस्थिति-पात्रानुसारेण भाषा-प्रयोगः कृतः। शब्दचयनम्, शब्दविन्यासः स्वाभाविकः आडम्बरविहीनश्च अस्ति। भावानुकूलैः सर्वत्र शब्दानां प्रयोगः कृतः परं तु मन्त्रणाकाले सुन्दर-सरस शब्दानां प्रयोगः। कथोपकथनं संक्षिप्तं परं तु सारगर्भितम् अस्ति। अत्र संस्कृतभाषायाः अतिरिक्तं नाटककारेण शौरसेनी-महाराष्ट्र-मागधी-प्राकृतभाषायाः प्रयोगः कृतः, यत् संस्कृतनाटकेषु आवश्यकमस्ति।

महाकवेः विशाखदत्तस्य शैली विषयानुरूपेण गाम्भीर्येण ओत-प्रोतम् अस्ति। शैल्याः गाम्भीर्येण कवेः कविताकामिनी मन्दमन्थरगत्या चलति। कवेः पदावलिः सशक्ता, प्रवाहमयी स्वाभाविका चास्ति। उदाहरणं द्रष्टव्यम् अस्ति –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**आस्वादित-द्विरद-शोणित-शोण-शोभां,**
**सन्ध्यारूणामिव कलां शशलाञ्छनस्य ।**
**जृम्भाविदारित-मुखस्य मुखात् स्फुरन्तीं**
**को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम्।।**

विशाखदत्तस्य शैल्यां कुत्रापि कृत्रिमता नास्ति। काव्योचिता उदात्तता सर्वत्र विद्यमाना अस्ति। वीररसस्य परिपाकं अत्यन्तं रमणीयम् अस्ति। गौडीरीतेः प्रयोगेण वीररसस्य अभिव्यञ्जना आकर्षिका–

अलङ्कारेषु उपमा-रूपक-श्लेष-अर्थान्तरन्यास-अप्रस्तुतप्रशंसा-समासोक्तीत्यादीनां अलङ्काराणां प्रयोगः सफलतापूर्वकः कृतः अस्ति। व्यंग्यार्थप्रतीतिः नाटककारेण श्लेषद्वारा अतिकुशलतया अभिव्यञ्जिता। छन्दस्सु शार्दूलविक्रीडितं-स्रग्धरा-वसन्ततिलका-शिखरिणी- अनुष्टुप्-आदीनां सम्यक् प्रयोगः विहितः।

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

१. 'प्रतिज्ञायौगन्धरायणम्' नाट्यकृतिः कस्य रचना अस्ति ?

(क) कालिदासस्य (ख) भासस्य
(ग) बाणस्य (घ) भवभूतेः ( )

२. स्वप्नवासवदत्तायाः पूर्वभागम् अस्ति ?

(क) उत्तररामचरितम् (ख) प्रतिज्ञायौगन्धरायणम्
(ग) महावीरचरितम् (घ) वेणीसंहारम् ( )

३. 'विक्रमोर्वशीयम्' इत्यस्य रचनाकारस्य नाम किम् ?

(क) भासः (ख) बाणभट्टः
(ग) कालिदासः (घ) भवभूतिः ( )

४. 'विक्रमोर्वशीयम्' इति नाटकस्य कथा पूर्वरूपेण कुत्र प्राप्यते?

(क) विष्णुपुराणे (ख) अग्निपुराणे
(ग) मत्स्यपुराणे (घ) वायुपुराणे ( )

५. 'देवीचन्द्रगुप्तम्' इत्यस्य रचनाकारः अस्ति?

(क) कालिदासः (ख) बाणभट्टः
(ग) विशाखदत्तः (घ) भासः ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### अतिलघूत्तरात्मक प्रश्नाः –

१. 'प्रतिज्ञायौगन्धरायण' नाटकम् अङ्केषु कतिसु विभक्तं अस्ति?

२. विक्रमोर्वशीयम् नाटके कस्य रसस्य प्रमुखरूपेण वर्णनम् अस्ति ?

३. मुद्राराक्षसस्य रचनाकारः कः अस्ति ?

४. 'मुद्राराक्षसम्' इति नाटकं कतिसु अङ्केषु विभक्तं अस्ति ?

### लघूत्तरात्मक प्रश्नाः –

१. प्रतिज्ञायौगन्धरायणम् इत्यस्य कथासारं संक्षेपेण लिखत।

२. मुद्राराक्षसस्य वैशिष्ट्यं संक्षेपेण लिखत ।

### निबन्धात्मक प्रश्नाः –

१. भाषाशैलीदृष्ट्या 'मुद्राराक्षसम्' इत्यस्य नाटकस्य समीक्षणं कुरुत ?

२. 'विक्रमोर्वशीयम्' इति नाटकस्य कथासारं वैशिष्ट्यं च लिखत ?

### वस्तुनिष्ठप्रश्नाः-उत्तरमाला

१. (ख) २.(ख) ३. (ग) ४. (ग) ५. (ग)

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## (ख) गद्यकाव्यानि–

संस्कृते पद्यसाहित्यमिव गद्यस्य प्रयोगः अपि वैदिककालादेव भवति। कृष्णयजुर्वेदः ब्राह्मणग्रन्थाः, उपनिषदश्च अधिकांशतः गद्ये एव वर्तन्ते। यद्यपि संस्कृतसाहित्ये गद्ये ग्रन्थितानां ग्रन्थानां संख्या अंगुलिगणनीयाः एव वर्तन्ते, तथापि पद्यस्य अपेक्षया गद्यस्य महत्त्वं प्रतिपादयितुं संस्कृतस्य प्राचीनैः आचार्यैः एषा सूक्तिः प्रसारिता– '**गद्यं कवीनां निकषं वदन्ति**'। गद्यस्य महत्त्वं एतस्मादेव कारणात् वर्तते यत् गद्यकाव्यरचना अतिकठिना अस्ति।

लौकिकगद्यस्य दर्शनं सर्वप्रथमं महाभारते एव विद्यते। गद्ये एव अर्थशास्त्रं तथा महाभाष्यादयः ग्रन्थाः उपलभ्यन्ते। पुराणानां गद्यं साधारणकोटिकं वर्तते। साहित्यशास्त्रकर्तृणां दार्शनिकानां च गद्यं पारिभाषिकं अत्यन्तं कठिनं चास्ति। चम्पूकाव्यमपि गद्यकाव्ये एव परिगण्यते। नवविधस्य उपन्यासस्य अपि गणना गद्यसाहित्ये एव भवति।

संस्कृतगद्यकाव्यं ओजः गुणोपेतं समासबहुलं चास्ति। उक्तं हि दण्डिना–

**'ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्।'**

काव्यस्यातिदीर्घान् समासान्, दुर्बोधान् घटनासंकेतान्, श्लेषयमकानुप्रासोपमोत्प्रेक्षापरिसंख्यादीन् अलंकारान् प्रयोक्तुं अत्र पूर्णा स्वतंत्रता वर्तते। प्रकृतेः सूक्ष्मचित्रणस्य स्त्रीपुरुषयोः नैतिकमानसिकशारीरिकगुणानामेव वर्णनस्य प्राधान्यमत्र वर्तते। गद्यकाव्यं प्राचीनैः आलङ्कारिकैः द्विधा विभक्तम्– आख्यायिका कथा च।

प्राचीनकाले गद्यकाव्यस्य परिमितसंख्यायाः किं कारणमस्ति इत्येषः प्रश्नः। इदं सत्यं यत् संस्कृते गद्यकाव्यस्य संख्या परिमिता एवास्ति, तथापि नैकगद्यकाव्यानामुल्लेखो साहित्ये अस्ति। पद्ये मादकापूर्णः श्रुतिमाधुर्यगुणः वर्तते, परं गद्ये ईदृग्विधस्य गुणस्य नोपलब्धिः। एतेन सार्धमेव समासबाहुल्येन गद्यकाव्यमधिगन्तुम् अतिदुष्करम् आसीत्, एतस्मादेव कारणात् गद्यरचनायां कवीनां प्रवृत्तिः बहुला नासीत्।

संस्कृतगद्यकाव्ये कवित्रयस्य प्रामुख्यम् अस्ति–सुबन्धुः, बाणभट्टः, दण्डी च । एतेषां काव्येषु गद्यस्य चरमोत्कर्षः प्राप्यते। एतेषां रचनासु एव सर्वप्रथमं वास्तविकस्य गद्यस्य दर्शनं भवति।

एतस्मात् बहुकालात् पूर्वमेव शिलालेखेषु गद्यस्य साहित्यप्रयोगः प्रथमतया कृतः प्रतीयते।

रुद्रदाम्नः शिलालेखे हरिषेणस्य च प्रयागप्रशस्तौ विजयस्तम्भवर्णने अखिन्नगद्यशैलीनिदर्शनं पूर्णरूपेण भवति, यथा हरिषेणस्य प्रयागप्रशस्तौ –

**''सर्वपृथिवीजयजनितोदयव्याप्तनिखिलावनितलां कीर्तिमितस्त्रिदशपति-भवनगमनावाप्तललितसुखविचरणामाचक्षाण इव भुवोर्बाहुरयमुच्छ्रितः स्तम्भः।''**

हरिषेणस्य शिलालेखे प्रयागप्रशस्तौ च गद्यस्य यद्रूपं प्राप्यते तदेव अग्रेतनैः कविभिः परिमार्जितं सत् साहित्यिकगद्यस्य गौरवं वर्धयितुं प्राक्रमत। साहित्यिकगद्यस्य आद्यः ग्रन्थः सुबन्धोः वासवदत्ता एव उपलभ्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## वासवदत्ता

'वासवदत्ता' नामकः एकः एव ग्रन्थः सुबन्धुकृतत्वेन प्राप्यते। अयमेव ग्रन्थः सुबन्धेः प्रसिद्धेः आधारः अस्ति। अस्य सुबन्धोः समयः क? इति अत्र विचार्यते–

१. अयं सुबन्धुः स्वग्रन्थे विक्रमादित्यं स्मरति –

**सा रसवत्ता विहता नवका विलसन्ति चरति नो कङ्कः।**
**सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये।।**

परं तु सः कतमो विक्रमादित्यः अस्मिन् प्रसङ्गे बहवः आलोचकाः मिहिरकुलनामकस्य हूणराजस्य पराजेता बालादित्यसखा यशोधर्मा एवायं विक्रमादित्यः इति निर्णयन्ति। यशोधर्मणः समयश्च षष्ठशतकस्य मध्यभागः इति निर्णयन्ति। एतेन सुबन्धोः समयः षष्ठशतकस्य मध्यभागः इति निर्णयन्ति। एतेन सुबन्धोः समयः षष्ठशतकस्य पूर्वभागः इति वक्तुं शक्यते।

२. बाणभट्टः सुबन्धोः कथां धिया निबद्धेयमतिद्वयी कथा इत्येवं स्मरति। बाणः सप्तमशतकोत्पन्नः इति, ततः पूर्ववर्तित्वेन सुबन्धोः षष्ठशतकपूर्वभागभवत्वं युज्यते एव।

३. सुबन्धुना स्ववासवदत्तायां श्लेषद्वारा उद्योतकरं स्मर्यते–न्यायस्थिति–मिवोद्योतकरस्वरूपाम्। अस्योद्योतकरस्य समयः षष्ठसप्तमशताब्द्योरन्तकाले मन्यते। एभिः निदर्शनैः सुबन्धोः समयः षष्ठशतकं मन्यते। आचार्येण बलदेवापाध्यायेनापि विविधैः प्रमाणैः सुबन्धोः समयः षष्ठशतक एव निश्चितः, यः सर्वथा युक्तः अस्ति।

## कथानकम्–

सुबन्धोः वासवदत्तायाः सम्बन्धः प्राचीनभारतस्य आख्यायिकायाः वासवदत्तायाः उदयनस्य प्रणयकथायाः च सर्वथा भिन्नः अस्ति। अस्याः सम्पूर्णं कथानकं कवेः मस्तिष्कस्य कल्पना अस्ति।

'राज्ञः चिन्तामणेः पुत्रस्य राजकुमारस्य कन्दर्पकेतोः स्वप्ने एका परमसुन्दरी कन्या आयाति। तस्याः अन्वेषणे कन्दर्पकेतुः स्वमित्रेण मकरन्देन सह सहसा निर्गच्छति। रात्रौ सः विन्ध्यवने तिष्ठति यत्र वृक्षस्थितसारिका ज्ञायते यत् पाटलिपुत्रस्य राजकुमारी स्वप्ने कन्दर्पकेतुं अपश्यत्। तस्य कन्दर्पकेतोः अन्वेषणे सारिका तमालिका च संलग्ने स्तः। एवंविधया शुकदम्पतीद्वारा नायकनायिकयोः मेलनं भवति। उभयोः हृदये परस्परं प्रगाढानुरागः अस्ति, परं तु वासवदत्तायाः पिता श्रृङ्गारशेखरः तस्याः विवाहं केनचित् विद्याधरेण सह कर्तुम् इच्छति। अस्मात् कारणात् वासवदत्ता कन्दर्पकेतुना सह विन्ध्याट्व्यां पलायनं करोति। तत्र कन्दर्पकेतुं विना एकाकीरूपेण वने भ्रमणार्थं गच्छति सा। तां प्राप्त्यर्थं किरातानां समूहद्वये संघर्ष भवति। वासवदत्ता गुप्तरूपेण कस्यचित् ऋषेः आश्रमे प्रविशति, यत्र सा ऋषिशापवशात् शिलारूपेण परिवर्तिता भवति। अपरतः कन्दर्पकेतुः वासवदत्तावियोगे आत्महत्यां कर्तुम् उद्यतः भवति, परं तु आकाशवाण्या सः विरमति। अन्ततोगत्वा सः वने तस्याः अन्वेषणं करोति, यत्र कन्दर्पकेतोः स्पर्शद्वारा सा मानुषीरूपं धारयति। अतः परं मकरन्दः तत्र आगच्छति। सर्वे राजधान्यां निवर्त्य सुखपूर्वकं जीवनयापनं कुर्वन्ति इति।'



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अस्याः वासवदत्तायाः कथा अतिस्वल्पा निर्जीवा चास्ति, परं तु कविना सुबन्धुना स्वप्रतिभया सुन्दरवर्णनेन हृदयावर्जिका कृता।

### काव्यवैशिष्ट्यम्-

अस्याः वासवदत्तायाः प्रशंसायां बाणभट्टः लिखति हर्षचरिते-

**कवीनामगलद्दर्पो नूनं वासवदत्तया।**
**शक्त्येव पाण्डुपुत्राणां नूनं वासवदत्तया।।**

शबदार्थालङ्कारसौष्ठवैः वासवदत्तायाः तुलायां कोऽपि अन्यो गद्यग्रन्थो नास्तीति तद् अध्ययनेन प्रतिभासते। तत्र शब्दसौष्ठवं यथा-'अभूदभूतपूर्वः सर्वोर्वीपतिचक्र-चूडामणि-श्रेणीशाणकोणकषणनिर्मली कृतचरणनखमणिनृसिंह इव दर्शितहिरण्यकशिपुक्षेत्रदानविस्मयः, कृष्ण इव कृतवसुदेवतर्पणः, नारायण इव सौकर्यसमासादितधरणिमण्डलः, कंसारातिरिव जनितयशोदानन्दसमृद्धिः। विरोधाभासः यथा- विद्याधरोऽपि सुमनाः धृतराष्ट्रोऽपि गुणप्रियः, क्षमानुगतोऽपि सुधर्माश्रितः, बृहन्नलानुभावोऽप्यन्तः सरलः, महिषीसभवोऽपि वृषोत्पाद्यः, तरलोऽपि महानायको राजा चिन्तामणिर्नाम। परिसंख्या यथा-'छलनिग्रहप्रयोगो वादेषु, नास्तिकता चार्वाकेषु, कण्टकयोगो नियोगेषु, खलसंयोगः शालिषु द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु, नेत्रोत्पाटनं मुनीनाम्, द्विजराजविरुद्धता पङ्कजानाम्, सूचीभेदो मणीनाम्।'

वासवदत्तायाः आख्यायिकाग्रन्थतया कतिचन श्लोका अपि यत्र तत्र निवेशिताः सन्ति यैः सुबन्धोः पद्यप्रणयनपाटवं प्रकटीभवति।

इदं सत्यं यत् एवंप्रकारकः वाक्यविन्यासः क्लिष्टतां भजते कृत्रिमतामाश्रयति, वाचकान् क्लिश्नाति तथापि कल्प्राप्रौढिशब्दचयनालङ्कारसज्जाभिः अयं कविः सकलहृदयस्तुत्यः इति निर्बाधं वक्तुं शक्यते।

यद्यपि बाणस्य इव रमणीयार्थप्रतिपादनसमये रमणीयशब्दसृष्टिः, दण्डिनः इव पदलालित्यं सुबन्धौ न विद्यते, तथापि विद्वज्जनहृदये श्लेषादिविविधालङ्कारप्रयोगेण सुबन्धोः सम्मानजनकं स्थानं विद्यते एव।

## कादम्बरी

गद्यसम्राट् महाकविबाणभट्टेन विरचित-कादम्बरी बाणस्य सर्वश्रेष्ठं गद्यकाव्यमस्ति। इयं कथाग्रन्थरूपा अस्ति। स्वयमेव कविना- 'धिया निबद्धेयमतिद्वयी कथा' इति कादम्बर्याः कथाग्रन्थत्वम् उद्घोषितम्। कादम्बर्यां निबद्धा कथा गुणाढ्यकृतायाः बृहत्कथायाः गृहीता। बृहत्कथायाः साम्प्रतम् उपलब्धिः नास्ति तथापि बाणकाले सा उपलभ्या आसीत् इति वक्तुं शक्यते। बृहत्कथातः नृपसुमनसः साधारणीं कथाम् आदाय बाणभट्टेन काव्यकलानैपुण्येन तस्यां वैशिष्ट्यमुत्पाद्य कादम्बरी विरचिता।

कादम्बर्याः कथा जन्मत्रयवृत्तान्तस्य अङ्गीकारेण जटिला जाता। एका कथा कथान्तरमुद्भावयति इति प्रथमा कथा सावशेषैव द्वितीयायाः कथायाः अवसानप्रतीक्षमाणा तिष्ठति। एवम् अपरापि कथा इति कथासाङ्कर्यम् अत्र विद्योतते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**कथानकम्-**

अस्या: कादम्बर्या: कथानकं संक्षेपत: एवम् अस्ति– 'विदिशायां शूद्रको नाम राजा आसीत्। एकदा चाण्डालकन्यका एकं पञ्जरस्थं शुकं तस्मै उपाहरत्। नृपेण गृहीत: स: शुक: तस्मै शूद्रकाय स्वपूर्वजन्मन: कथाम् आख्यातवान्। जन्मकाले एव मम माता मृता, तात: अपि लुब्धकै: मारित:। वृक्षादय: पतितं भूमौ सरन्तं मां जाबालिशिष्यान्यतम: दयया उत्थाप्य स्वगुरो: आश्रमे नीतवान्।

तत्र जाबालि: मद्वृत्तान्तम् इत्थम् अकथयत्–उज्जयिन्यां तारापीडो नाम राजा आसीत्, तस्य पत्नी विलासवती, शुकनासश्च तस्य अमात्य:। प्रौढे वयसि नृपस्य चन्द्रापीडनामक: पुत्र: जात:। अमात्यस्य शुकनासस्य सुतश्च वैशम्पायन: जात:। तौ प्राप्तवयसो: गुरुकुले शिक्षितौ। शुकनासेन राजपुत्र: चन्द्रापीड: सम्यक् उपदिष्ट:। दिग्विजयप्रवृत्त: चन्द्रापीड: गन्धर्वमिथुनम् अनुधावन् एकं सरोच्छेदं दृष्टवान्। तत्र महाश्वेता नाम कापि सुन्दरी तप: प्रवृत्ता दृष्टा स्ववृत्तान्तमुक्तवती। मया पुण्डरीकनामके मुनितनये स्नेह: कृत:, स: लोकान्तरं गत:, तमनुकर्तुकानां मां कापि दिव्याङ्गना 'भूयोऽपि युवयो: सङ्गम: भावीति'

मां विबोध्य तच्छरीरं लोकान्तरम् अनैषीत्। महाश्वेतैव चन्द्रापीडाय कादम्बरीवृत्तम् उक्तवती। कादम्बरीचन्द्रपीडयो: साक्षात्कारे जाते द्वयो: अनुराग: जात:। तदैव पितु: दूते आगते चन्द्रापीड: स्वां राजधानीं प्रतिनिवृत्त:। कादम्बर्या: चन्द्रापीडविरहे देहं त्यक्तुमुद्यतायां तत्सखी पत्रलेखा तां सान्त्वयित्वा चन्द्रापीडस्य समीपमागत्य तदवस्थां तस्मै न्यवेदयत्।

एतावती कथा बाणभट्टेन लिखिता। अस्या: उत्तरार्द्धभागस्य कथा तस्य तनयेन भूषणभट्टेन पूरिता। चन्दापीड: राजधानीं गच्छन् वैशम्पायनं तदनुरोधान्महाश्वेताया: आश्रमे एव स्थापितवान्। तत्र महाश्वेतां कामयमान: वैशम्पायन: तस्या: शापेन शुक: जात:। एवं श्रुत्वा पत्रलेखया सहागत: चन्द्रापीड: स्वप्राणान् विससर्ज। अथ कादम्बरी तदवस्थं चन्द्रापीडं दृष्ट्वा बहु अव्यथत। तत: कादम्बरीमहाश्वेते इत्थं दिव्यां वाचं श्रुत्वा तथैव तस्थतु: – 'शापवशाच्चन्द्रापीड: प्राणैर्वियुक्त:, अस्य देहं संरक्ष्यताम्, पुनरपि युवयो: युष्मद्दयिताभ्यां सह सङ्गम: भावीति।' इन्द्रायुधो नाम चन्द्रपीडस्य अश्व: तत्क्षणं तस्मिन्नेव सरसि अगाहत। तत्स्थाने पुण्डरीकस्य सखा कपिञ्जल: सरस: निर्गत्य कादम्बरी–महाश्वेते सूचितवान् यत् चन्द्रापीड: चन्द्रस्य, वैशम्पायन: पुण्डरीकस्य, इन्द्रायुधश्च कपिञ्जलस्य अवतारा: आसन्।

एवं महर्षिमुखात् कथाया: श्रवणानन्तरं मम 'अहमेव प्राक् पुण्डरीकावतार: 'वैशम्पायन' इति ज्ञानम् अजायत। साम्प्रतं शापावधे: प्राप्तत्वात् शूद्रकस्य देहत्याग: कादम्बरी भुजान्तरालगतस्य चन्द्रापीडस्य सुप्तोत्थितस्येव विबोध:, पुण्डरीकस्य समागमनञ्च अजायत्। तत: चन्द्रापीडेन कादम्बरी पुण्डरीकेन च महाश्वेता परिणीता, इति कादम्बर्या: कथा।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## पात्रचित्रणम्–

कादम्बर्याः पात्रचित्रणं सम्यक् प्रकारेण सजीवतया कृतमस्ति। राजा शूद्रकः, जाबालिः, तारापीडः, महाश्वेता, कादम्बरी चेति सर्वाणि पात्राणि तथा वर्णितानि यथा तानि वाचकानां पुरः स्थितानि इव प्रतिभान्ति। एकत्र पाठकः यदि शबरसेनाप्रयाणं पठित्वा विस्मयाविष्टः भवति, जाबालेः आश्रमं दृष्ट्वा अस्ततिमिरान्तःकरणः भवति तदाऽपरत्र सः एव कादम्बर्याः महाश्वेतायाः वा वर्णनं पठित्वा लोकान्तरसमुपस्थितः इव अच्छोदसरसः वर्णनं श्रुत्वा कुतुकाकुल इव सुधासिक्तः इव भवति। एकतः यदि शुकनासोपदेशमधीत्य हृदयं निर्मलदर्पणतां नयति, तदा अपरत्र राजा अन्तःपुरवर्णनं श्रुत्वा हृदयं रञ्जयति। प्राकृतिकवस्तूनां वर्णनेऽपि कादम्बरी न कुतोऽपि हीयते।

## काव्यवैशिष्ट्यम्–

कवितायां यावत्कलापक्षस्य विभावनं तावत् अलङ्काराणां सन्निवेशः। अर्थचयने शब्दगुम्फेन च न केवलं गद्यकाव्यानि एव अपितु समस्तमपि संस्कृतवाङ्मयम् अतिशय्य वर्तते। कादम्बरी इति कथनं न अतिशयोक्तियुक्तम्–

**नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः।**
**विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम्।।**

इति दुर्लभत्वेन यदुक्तं तदत्र कादम्बर्याम् सुलभमिति महद्गौरवजनकम् अस्य कवेः।

अत्र तत्तदलङ्काराणां यादृशः मनोरमः प्रयोगः कृतः संस्कृतसाहित्ये तादृशः अन्यत्र दुर्लभः। उदाहरणरूपेण कतिचनोद्धरणानि प्रस्तूयन्ते, यथा–

'प्रावृषमिव घनकेशजालम्, शरदमिव विकसितपुण्डरीकलोचनम्' अत्र यादृशः तदुत्थापिता चोपमा यादृशी तदुभयं मिलित्वा स्वर्णे सुगन्धं सृजतीव। अतिशयोक्तेर्बहुलेऽपि प्रयोगे–

'अथ परिसमाप्तमीक्षणयुगलस्य द्रष्टव्यदर्शनफलम् आलोकितः खलु रमणीयानामन्तः, दृष्ट आह्लादनीयानामवधिः, वीक्षिता मनोहराणां सीमान्तलेखा, प्रत्यक्षीकृता प्रीतिजनानां परिसमाप्तिः विलोकिता दर्शनीयानामवसानभूमिः।' सुभगपदावललिगुम्फिता इयम् अतिशयोक्तिः श्रुतमात्रैव मनो मादयति।

रशनोपमायाः प्रयोगे यौवनस्य वर्णनं अत्याकर्षकम्–'क्रमेण च कृतं मे वपुषिवसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन नवयौवने न पदम्।'

परिसंख्यायाः प्रयोगे अपि अयं कविः 'निरन्तरश्लेषघनां सुजानिं महास्रजं चम्पकपुष्पकैरिव' रचितां कविताम् उपस्थापयति। यथा –

'यत्र वयः परिणामे द्विजपतनम्, उपवनचन्दनेषु जाड्यम्, अग्नीनां भूमिमत्त्वम् एणकानां गीतव्यसनम्, शिखण्डिनां नृत्यपक्षपातः, भुजङ्गमानां भोगः, कपीनां श्रीफलाभिलाषः मूलानामधोगतिः।'

न केवलं अलङ्काराणाम् उपस्थापने एव अपितु कवितायाः उद्देश्यस्य 'सत्यं शिवं सुन्दरम्' इति विशेषितस्य लोककल्याणस्यापि निवेशने बाणः पूर्णरूपेण जागरूकः इति कादम्बर्याः परिशीलनेन एव ज्ञायते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भाषाशैली–**

बाणस्तु: पाञ्चालीप्रिय: –

**शब्दार्थयो: समो गुम्फ: पाञ्चाली रीतिरिष्यते।**
**शिलाभट्टारिकावाचि बाणोक्तिषु च सा मता।**

बाण: प्रायश: स्वरचनासु पाञ्चालीरीते: विभावनां प्रस्तौति। अस्य रचनासु पदपदार्थानां, मनोभावावेशानां यादृशं सुरुचिपूर्णं सामञ्जस्यमभिलक्ष्यते न तादृगन्यत्र क्वचिदवतरति दृष्टिपथम्। विषयवस्त्वनुरूप: पदविन्यासविलास एव अस्य रचनाया: वैशिष्ट्यम्।

कादम्बर्याम् अयं बाण:यत्र दीर्घसमासोपेतं वाक्यावलिं विन्यस्य वाचकानां पुरत: वर्णनबाहुल्यमुपस्थापयति तत्रैवलघुवाक्यानां प्रयोगेऽपि न मन्दायते। एतेन तत्प्रतिभाया: सर्वगुरुत्वं प्रकटीभवति। कपिञ्जल: पुण्डरीकं कामपीडितमुपदिशति–

''नैतदनुरूपं भवत: क्षुद्रजनक्षुण्ण एष मार्ग:, धैर्यधना हि साधव:, किं य: कश्चित्प्राकृत इव विकलीभवन्तमात्मानं न रुणत्सि, क्व ते तद् धैर्यम्, क्वासाविन्द्रियजय:।''

एवमेव शुकनासोपदेशे अल्पसमासयुक्तपदै: लघुवाक्यै: च सरसं वर्णनं कविना कृतम्। यथा–

**'इयं हि लक्ष्मी: पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, कालकूटान्मोहनशक्तिम्, मदिराया: मदम्, उच्चैश्रवस: चञ्चलताम् इत्येतानि सहवासपरिचयवशात् विरहविनोदचिह्नानि गृहीत्वेव सागरादुत्थिता।' तथा हि 'लब्धापि दु:खेन पाल्यते, न परिचयं रक्षति, नाभिजनमीक्षते, न रूपमालोक्यते, न शीलं पश्यति, न वैदग्ध्यं गणयति।'**

अत: बाणभट्टस्य माधुर्यगुणोपेतां ललितां पदावलीं दृष्ट्वा केनापि सत्यमेव उक्तम् यत्–

**रुचिरस्वरवर्णपदा: रसभाववती जगन्मनो हरति।**
**सा किं तरुणी? नहि नहि वाणी बाणस्य मधुरशीलस्य।।**

महाकविबाणस्य भाषाऽपि अतिसमृद्धा सर्वथा भावानुरूपा चास्ति। उत्तमानां निम्नानां च पात्राणां वर्णने, अच्छोदादिविविधिप्राकृतिकवस्तुवर्णने सर्वत्र सजीवत्वं सृष्टं साफल्यं चासादितम्। अस्य बाणस्य भाषासमृद्धिं दृष्ट्वैव पाश्चात्यविद्वांस:कादम्बरीं अरण्यानीं मन्यन्ते। तेषां मते बाणस्य गद्यं खलु तद् भारतीयम् अरण्यं यत्र क्षुपोच्छेदं विना मार्गो दुर्लभ:। यत्र च बहव: अप्रतीतार्था: शब्ददन्दशूका: तत्र प्रविविक्षून् प्रतीक्षमाणा: निलीय स्थिता:।

वस्तुत: बाणभट्टस्य गद्य महाविशालसप्तभूमराजप्रासादोपमम्, यत्र क्वचन प्रकोष्ठेरमणीयाकृति–विशिष्टपरिधानापबृहितरमणीचित्रम् क्वचिन्मृगयोपयुक्तनानाजीवस्य चित्राणि, क्वचित्कलकलनिनादिनी खरस्रोता नदी चित्रिता, क्वचित्तपो–भूमिर्निदर्शिता, क्वचिच्च निपतत् शरभीषणा रणभूमि: अङ्किता। संस्कृतभाषाकविषु बाणभट्टसमान: कोऽपि शब्दचित्रप्रस्तुतौ सिद्धहस्त: नाभूत् इति कथनं नितान्त–सत्यम्। साधारणत: अन्ये कवय: घटनां वर्णयन्ति, परं तु बाण: चित्रोपस्थापनद्वारा कथां विस्तारयति, अत एव तस्य कथा मन्दं चलति। प्रभातसमये सूर्योदयवर्णन–प्रसङ्गे नानाविधै: उपमानै: प्रस्तुतं चित्रम् अतिसुन्दरं वर्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एतत्सकलं वैशिष्ट्यं दृष्ट्वा गोवर्द्धनाचार्येण उक्तम्–

**जाता शिखण्डिनी प्राग्यथा शिखण्डी तथावगच्छामि।**
**प्रागल्भ्याधिकमाप्तुं वाणी बाणो बभूवेति।।**

## हर्षचरितम्

'हर्षचरितम्' महाकविना बाणभट्टेन विरचिता एका प्रसिद्धा आख्यायिका अस्ति। बाणभट्टेन विरचितं ग्रन्थद्वयं प्राप्यते–हर्षचरितम् कादम्बरी च। चण्डीशतकम्, पार्वतीपरिणयः मुकुटताडितकम् इति त्रयोऽन्ये प्रबन्धाः तन्नाम्ना प्रथिता अपि वस्तुतः न तस्य कृतयः। अस्मिन् विषये विदुषां मध्ये मतैक्यं नास्ति। अतः ग्रन्थद्वयमेव बाणभट्टकृतिरूपेण प्रसिद्धम् अस्ति।

गद्यसाहित्याकाशे अस्य बाणभट्टस्य महती प्रसिद्धिः अस्ति। अस्य समयः प्रायेण निश्चितः अस्ति। अयं कविः सम्राट्हर्षवर्धनस्य समकालीनः आसीत्। महाराजहर्षदेवः ६०६ ईशवीयसमयात् आरभ्य ६४८ पर्यन्तं थानेश्वरनाम्नि स्थाने राज्यं कृतवान्। सः चायं हर्षः बाणभट्टेन स्वकीये हर्षचरिते सविशेषं वर्णितः। एतेन बाणभट्टस्य तत्समयवर्तित्वं प्रमीयते, तथा च बाणस्य समयः सप्तशतकं सिद्धयति।

बाणभट्टः वात्स्यायनवंशे जन्म गृहीतवान्। तत्पूर्वजाः बिहारप्रान्तस्थितस्य शोणाख्यस्य हिरण्यबाह्वपरनामकस्य महानदस्य तटे प्रीतिकूटनामकग्रामे न्यवसन्। तस्य पिता चित्रभानुः माता च राज्यदेवी आसीत्। बाणेन हर्षचरिते स्ववंशपरिचयः विस्तृतेन प्रदत्तः। कादम्बर्याम् अपि स्ववंशवर्णनं कृतवान्।

बाणभट्टेन बहुदेशाटनं कृतम्। देशभ्रमणेन तस्य प्रज्ञानप्रकर्षे महाँल्लाभो जातः। देशाटनात् परतः सः स्वगृहे अवस्थाय शास्त्राणाम् अध्ययने प्रावर्तत।

**प्रतिपाद्यः–**

'हर्षचरितम्' बाणभट्टेन विरचितः प्रथमः ग्रन्थः अस्ति। कादम्बर्याः अपेक्षया हर्षचरितम् प्रथमा रचना अस्ति। यतो हि कादम्बर्याः भाषाशैली हर्षचरितस्यतुलनायां अतिप्रौढ़ा अस्ति। 'हर्षचरितम्' अष्टोच्छ्वासेषु विभक्तम् एका आख्यायिका अस्ति। अत्र बाणेन स्वयमपि लिखितम्–

**तथापि नृपतेर्भक्त्या भीतो निर्वहणाकुलः।**
**करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम्।।**

ग्रन्थेऽस्मिन् प्रथमोच्छ्वासत्रये बाणेन स्वीया आत्मकथा लिखिता। चतुर्थादुच्छ्वासात् आरभ्य समाप्तिपर्यन्तं राज्ञः हर्षस्य चरितं वर्णितम्। हर्षस्य पितरौ यशोमती–प्रभाकरवर्धनौ आस्ताम्। ज्येष्ठः भ्राता राज्यवर्द्धनः, अनुजा राज्यश्रीः चासीत्। चतुर्थोच्छ्वासे राजकुमारयोः तत्स्वसुश्च जन्मवृत्तानि, पञ्चमे उच्छ्वासे राजकुमारयोर्विजययात्रा वर्णिता। हूणानां जयार्थे गते राज्यवर्धने हर्षे च मृगयां गते प्रभाकरवर्धनः मृतकल्पः जातः इति श्रुत्वा हर्षः मृगतयाः निवृत्तः। षष्ठे उच्छ्वासे राज्यवर्धनस्य परावर्तनम्, ग्रहवर्मणः मृत्युः, राज्यश्रियः बन्दीभावः, राज्यश्रियः उद्धाराय राज्यवर्धनस्य प्रस्थानम्, गौडेश्वरशशाङ्कद्वारा तस्य वधश्च वर्णितः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सप्तमे उच्छ्वासे हर्षस्य दिग्विजययात्रा, मालेश्वरविजय:, अष्टमे राज्यश्रिय: प्राप्ति:, दिवाकरमित्राख्यबौद्धभिक्षुणा सङ्गति:। एवंविधया मूलकथा विस्तरेण अत्र वर्णिता।

**काव्यवैशिष्ट्यम्-**

कादम्बरीवत् इदं हर्षचरितम् अपि अपूर्णमेव स्थितम्। तत्रापि कारणं कुबेरसामयिकं मरणमेव मन्यन्ते विद्वन्मीमांसका:। ऐतिहासिकांशं वर्जयित्वा सन्दर्भोऽयं सर्वथा काव्यलक्षणोपेत:।

ओज: समासभूयस्त्वमेतद् गद्यस्य जीवितम् इति गद्यं विशेषयताम् आलङ्कारिकाणां मते गद्यलेखकानां मूर्धन्य: बाण:, गद्यकाव्यानां प्रथमं च हर्षचरितम्। पाञ्चालीरीते: भक्त: यथा बाण: तथा न कोऽपि अपर:। व्यञ्जनाप्रयोगे वक्रोक्तिरचनायां च बाण: सकलकविमूर्धन्य:।

इदं हर्षचरितम् न केवलम् उत्तमगद्यभावेनैव अत्यादरणीयम् अपितु सप्तमशतकस्य स्फुटेतिहासभावेनापि प्रशस्यतमम्। अत्र यत् ऐतिहासिकमितिवृत्तं वर्णितं तत् कस्मिंश्चिदप्यंशे तात्कालिकेतिहासात् न भिन्नम्। अस्मिन् तात्कालिकस्य उत्तरभारतस्य स्थिति: प्रकटं प्रकाश्यते। सप्तमे उच्छ्वासे वन्यग्रामाणां तत्रत्यगृहाणां वर्णनं नितान्तं सत्यं सरसञ्च। तस्मिन् कालेऽपि भारतम् सांस्कृतिकदृष्ट्या रमणीयम् आसीत्, एतत्सत्यं तदा प्रतीयते यदा वयं हर्षचरिते वेशभूषयो: आचारविचारयो: सेनासंस्थानस्य च वर्णनं पठाम:। राज्यश्रिय: विवाहावसरे विविधै: शिल्पै:, विविधै: जनैश्च प्रस्तुतानि आभूषणानि वस्त्राणि च भारतीयसंस्कृते: उन्नतदशाया: वर्णनं स्पष्टरूपेण कुर्वन्ति इति।

## शिवराजविजय:

'शिवराजविजय:' पण्डितेन अम्बिकादत्तव्यासेन विरचित: संस्कृतसाहित्यस्य प्रथम: उपन्यास: अस्ति। उपन्यास: सर्वथा एका नवविधा अस्ति। संस्कृतजगति उपन्यासलेखनम् अनूदितसाहित्येन सह प्रादुर्भूत। अयं शिवराजविजय: संस्कृतस्य प्रथम: ऐतिहासिक: उपन्यास: अस्ति य: व्यासमहाभागेन १८७० ईसवीये वर्षे लिखित:। अयं ग्रन्थ: एकोनविंशत्या: शताब्द्या: सर्वश्रेष्ठ: सुललित: गद्यग्रन्थ: अस्ति। यद्यपि व्यासमहोदयस्य ७८ रचना: सन्ति, परं तु एतस्य यश: शिवराजविजये एव प्रतिष्ठापूर्वकं अवलम्बितम् अस्ति।

शिवराजविजयस्य रचनाकारस्य पण्डितस्य अम्बिकादत्तव्यासस्य जन्म १९१५ संवत्सरे चैत्रशुक्लपक्षे अष्टम्यां तिथौ जयपुरे अभवत्। अस्य पूर्वजा: पाराशर-गोत्रीया: ब्राह्मणा: आसन् ये जयपुरत: पूर्वस्यां दिशि स्थिते मानपुरानामके ग्रामे न्यवसन्। पश्चात् ते वाराणसीं गत्वा तत्रैव अवसन्। अम्बिकादत्तव्यासस्य पिता पण्डित: दुर्गादत्तव्यास: एक: कुशल: कथावाचक: आसीत्।

पण्डित: अम्बिकादत्तव्यास: बाल्यकालादेव बहुप्रतिभाशाली आसीत्। स: बहुभाषाविद् आसीत्। हिन्दी-संस्कृत-अंग्रेजी-बंगला-आदीनां भाषाणां उपरि समानरूपेण एकाधिकार: आसीत्। न्याय-व्याकरण-वेदान्तादिषु विविधदर्शनेषु अस्य असाधारणगति: आसीत्। कविताकलायाम् ईदृश: प्रवीण: आसीत् यत् एकघटिकायामेव शतश्लोकानां रचनां कर्तुं समर्थ:।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शतप्रश्नान् अविच्छिन्नकाल-व्यवधानेन एकवारमेव श्रुत्वा तेषां उत्तरं तत्क्रमेण एव दातुं अद्भुता क्षमता आसीत् अतएव सः 'शतावधानीकः' 'घटिकाशतकम्' इत्यादिभिः उपाधिभिः विभूषितः। स्वजीवनस्य अल्पकाले (केवलं ५२ वर्षकाले) व्यासमहोदयेन संस्कृतं बहूपकृतम्। शिवराजविजयरचनया सः गद्यसाहित्याकाशे-सुबन्धु-दण्डी-बाणभट्ट आदीनां कवीनां पङ्क्तौ विराजमानः भवति। शिवराजविजये वर्णिता कथा यद्यपि ऐतिहासिकप्रधाना, तथापि अम्बिकादत्तव्यासेन स्वप्रतिभया कल्पनया च उच्चकोटिसाहित्यिकतया विभूषिता। अत्र कथावस्तु संघटना प्राच्यपाश्चात्योः शिल्पविधानेन समन्विता अस्ति। अत्र कथाद्वयं समानरूपेण चलति। एकस्याः कथायाः नायकः वीरशिवाजी अस्ति अपरस्य च नायकः रघुवीरसिंहः अस्ति। कथाद्वयम् परस्परं पूरकम् अन्योन्याश्रितं चास्ति। शिवराजविजयस्य सम्पूर्णा कथा त्रिषु निःश्वासेषु अस्ति।

अस्मिन् शिवराजविजये इतिहासकल्पनयोः यथार्थादर्शयोः कल्पनानुभवयोः च सुसमन्वयः विद्यते। सर्वाणि पात्राणि स्वचरित्रनिर्वहणे पूर्णरूपेण पारङ्गतानि। शिववीरः, गौरसिंहः, रघुवीरसिंहः, यशवन्तसिंहः, अफजलखान्, शाइस्ताखान्, ब्रह्मचारी आदयः सर्वे स्वाभाविकतायाः यथार्थतायाः च निर्वहणे पूर्णतया सफलाः सन्ति। ब्रह्मचारिवर्णने कविः तस्य स्वाभाविकं चित्रम् उपस्थापयति- ''बटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चाऽऽसीत्।''

ब्रह्मचारिगुरुणा योगिराजकृते योगीनां यत् यथार्थं स्वरूपं प्रस्तुतम् तत् पूर्णरूपेण योगपरकम्- **''भगवन्! बद्धसिद्धासनैः निरुद्ध-निःश्वासैः प्रबोधित-कुण्डलिनीकै-र्विजितदशेन्द्रियैर-नाहतनादतन्तुम् अवलम्ब्याऽऽज्ञाचक्रं संस्पृश्य चन्द्रमण्डलं भित्त्वा, तेजः पुञ्जमविगणय्य, सहस्रदलकमलस्यान्तः प्रविश्य, परमात्मानं साक्षात्कृत्य तत्रैव रममाणैर्मृत्युञ्जयैरानन्द-मात्रस्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः।''**

**रसयोजना-**

यद्यपि शिवराजविजयस्य प्रधानरसः वीररसः अस्ति, तथापि अन्ये रसाः उपकारिरूपेण निरूपिताः सन्ति। काव्योद्देश्यानुरूपं वीररसस्य विशेषचित्रणं कृतमत्र। वीरशिवस्य शौर्यस्य यत् अद्भुतं वर्णनं विहितम् तत् अत्यन्तं स्पृहणीयम् अस्ति। गौरसिंहः अफजलखानं कथयति-

**''को नामापरः शिववीरात् ? स एव राजनीतौ निष्णातः स एव सैन्धरोह विद्यासिन्धुः, स मल्लविद्यामर्मज्ञः स एव बाणविद्यावारिधिः, स एव वीरवारवरः, पुरुषपौरुष-परीक्षकः स एव दीनदुखदावदहनः, स एव स्वधर्मरक्षणसक्षमः''**

पण्डितेन व्यासेन यत्र-तत्र शृङ्गार रसस्यापि चित्रणं कृतम्। अस्य शृङ्गारस्य सर्वत्र शिष्टं सात्त्विकं च वर्णनं कृतम्। कुत्रापि मादकतायाः उच्छृंखलतायाः दर्शनं लेशमात्रम् अपि नास्ति। यत्र-तत्र करुणरसस्यापि हृदयावर्जकं वर्णनं कृतमस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अलङ्कारयोजना –**

विरोधाभास: व्यासमहोदयस्य प्रियालङ्कार: अस्ति। विरोधाभासवर्णने स: बाणतुल्य: प्रतीयते। एतदतिरिक्तं दीपक-श्लेष-परिसंख्या-यथासंख्योदात्त-आदीनामपि अलङ्काराणां सम्यक् प्रयोग: कृत: अस्मिन् ग्रन्थे।

**भाषाशैली–**

पण्डितस्य अम्बिकादत्तव्यासस्य भाषाया: उपरि पूर्णाधिकार: आसीत्। भावानुरूपं भाषाया: प्रयोगे सम्पूर्णतया दक्ष: आसीत्। भावानां सरलस्वाभाविकयो: अभिव्यक्तये तस्य भाषा द्रष्टव्या–

व्यासेन शिवराजविजयान्तर्गते पाञ्चालीरीति: प्रयुक्ता। एकत्र समस्तपदावल्या: प्रयोग: दृश्यते अन्यत्र तु लघुसमासशैल्यन्विता पदावलि: प्रयुक्ता अस्ति।

**प्रकृतिचित्रणम्–**

प्रकृतिचित्रणेऽपि महाकवि: व्यास: बाणभट्टतुल्य:। अनेन शिवराजविजये प्रकृत्या: चारुचित्रणं कृतम्। सूर्योदयस्य, सूर्यास्तस्य, चन्द्रोदयस्य, चन्द्रास्तस्य रात्रेश्च वर्णने अतिकुशलता प्रस्तुता अमुना कविना।

**सामाजिक-चित्रणम्–**

शिवराजविजय: एकमात्रम् ईदृश: उपन्यास: अस्ति यत्र तात्कालिकसामाजिकदशानां चरित्राणाञ्च समग्ररूपेण वर्णनं उपलभ्यते। साहित्यम् समाजस्य दर्पणम् भवति इत्यनुसारम् शिवराजविजय: पूर्णरूपेण तत्समयस्य चित्रणे सफल:।

पण्डितव्यासेन शिवराजविजये तत्कालीनमुगलसम्राज्यस्य सुन्दरं चित्रणं कृतम्। तस्मिन् समये राजान: अकर्मण्या: विलासप्रिया: आसन्। सम्पूर्णा हिन्दुजाति: मुगलानां (यवनानां) अत्याचारे पीडिता आसीत्। मुगलानां साम्राज्य: भारतवर्षे निरन्तरं वृद्धित्वं प्राप्य अग्रसर: आसीत्। यवनेभ्य: हिन्दुकन्याया: अपहरणं, मन्दिरे देवमूर्तीनां विध्वंस: पवित्रधर्मग्रन्थानां विनाश:, अनाथहिन्दूनां प्रताडनं च सततं क्रियते स्म, हिन्दुराजान: मुगलशासकानां दासतां स्वीकृत्य तेषां कृपायाम् जीविता: आसन्।

अस्याम् विषमपरिस्थितौ महाराष्ट्राधीश्वरेण वीरशिवाजी द्वारा स्वशौर्यपराक्रम-सदाचरणेन हिन्दुप्रजाया: हिन्दुत्वस्य च रक्षणं कृतम्। तेन शिववीरेण हिन्दुजनानां मध्ये शौर्यस्यवीरताया: च भाव: पुनर्जागरित:। हिन्दुजनेषु देशभक्ते:, राष्ट्रभक्ते:, आत्मविश्वासस्य, स्वधर्मानुरागस्य, मातृभूमे: सेवाभावस्य भावना विकसिता शिवाजी द्वारा। हिन्दूनां उपरि यवनानां आत्याचारस्य चरमसीमा आसीत् तत्समये। व्यास महोदयेन तस्य स्वाभाविकं चित्रणं कृतम् –

**''.......क्वचिद्दारा अपह्रियन्ते क्वचिद्धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादा:,क्वचिद्रुधिरधारा:, क्वचिदग्निदाह:, क्वचिद्गृहनिपात:, इत्येव श्रूयते अवलोक्यते च परित:।''**

एवं सम्यक् रूपेण शिवराजविजयस्य पर्यालोचनेन पण्डिताम्बिकादत्त-व्यासविषये 'गद्यं कवीनां निकषं वदन्ति' इत्युक्ति: सर्वथा समीचीना युक्तियुक्ता च प्रतीयते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

१. संस्कृतगद्यकाव्यस्य विशेषता अस्ति–

(क) समासबहुलता (ख) ओजसमासबहुलता

(ग) अल्पसमास बहुलता (घ) समासरहितबहुलता

२. 'वासवदत्ता' रचना वर्तते–

(क) सुबन्धोः (ख) दण्डिनः

(ग) बाणस्य (घ) अम्बिकादत्तस्य

३. 'हर्षचरितम्' इत्याख्यायिकायाः रचनाकारः अस्ति–

(क) बाणभट्ट (ख) सुबन्धुः

(ग) दण्डी (घ) अम्बिकादत्तः

४. संस्कृतसाहितस्य प्रथमः उपन्यासः अस्ति–

(क) कादम्बरी (ख) वासवदत्ता

(ग) दशकुमारचरितम् (घ) शिवराजविजयम्

### अतिलघूत्तरात्मक प्रश्नाः–

१. कादम्बर्याः उत्तरार्द्धभागस्य कथा केन पूरिता ?

२. 'चण्डीशतकम्' इत्यस्य ग्रन्थस्य रचनाकारः कः ?

३. पं. अम्बिकादत्तस्य पितुर्नाम किम् ?

४. 'शतावधानीकः' 'घटिकाशतकम्' इत्यादिभिः उपाधिभिः कः प्रसिद्धः?

### लघूत्तरात्मकप्रश्नाः–

१. हर्षचरितस्य परिचयं संक्षेपेण लिखत?

२. शिवराजविजयस्य परिचयं संक्षेपेण लिखत?

### निबन्धात्मकप्रश्नाः–

१. बाणभट्टस्य भाषाशैल्याः समीक्षणं कुरुत?

२. शिवराजविजयमाश्रित्य तत्कालीन सामाजिकचित्रणं कुरुत ?

**उत्तरमाला – वस्तुनिष्ठप्रश्नाः**

१.(ख) २.(क) ३.(क) ४.(घ)

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ( ग ) राजस्थानस्य अर्वाचीनसाहित्यकाराः

संस्कृतभाषायाः तदन्तर्गतस्य वाङ्मयस्य च विविधेषु वैशिष्ट्येषु एकम् असाधारणं वैशिष्ट्यं तस्य अखिल-भारतीयत्वम् अस्ति। हिन्दी-मराठी-कन्नडादि-वाङ्मय-शाखासु एतद् वैशिष्ट्यं नास्ति। अतः अखिलभारतीयदृष्ट्या तत्सर्वं तद्गुणसमृद्धम् अपि प्रादेशिकं वाङ्मय वक्तुं युज्यते। परं तु संस्कृतवाङ्मयस्य इतिहासे प्राचीनकालतः प्रारभ्य इदानीं यावत्, विविधप्रदेशवास्तव्यानां महाकवीनां, दार्शनिकानां, भाष्यटीकादिकर्तॄणां भूयांसि नामधेयानि लभ्यन्ते।

आधुनिकाले तत्तत्प्रदेशोद्भूतस्य संस्कृत-वाङ्मयस्य पर्यालोचनपराः बहवः प्रबन्धाः प्रकाशम् आगताः। तेषु शोधप्रबन्धेषु यद्यपि तत् तत् प्रदेशवासिनां ग्रन्थानां समीक्षणं वर्तते तथापि तत्र कापि प्रादेशिकी संसृष्टिरपि दृष्टिपथम् आयाति। यथा च तंजौरराज्योद्भवानां संस्कृतोपासकानां नामावल्यां बहूनि केरलीयानां, महाराष्ट्रीयाणां कर्नाटकस्थानां च नामानि उपलभ्यन्ते। काशीस्थितेषु गन्थकर्तृषु न केवलम् उत्तरप्रदेशीयाः एव अपितु बङ्ग-कलिङ्ग-नेपाल-बिहारादि-प्रदेशीयानां विद्यन्ते। तथैव राजस्थानेऽपि भारतवर्षस्य विविध-प्रदेशात् आगत्य सरस्वतीसमुपासकाः संस्कृतशारदायाः सेवाम् अकुर्वन्। इत्थं बहुविध-रचनाभिः संस्कृतभाषा निरन्तरम् उपकृता।

एकोनविंशति-विंशति-शताब्दीमध्ये बहुभिः विद्वद्भिः बहुविधविषयेषु उन्नतं लेखनकार्यं कृतम्। अत एव राजस्थानस्य राजधानी 'जयपुरम्' तु अपरा काशी इति नाम्ना सुविख्यातं संस्कृत-जगति।

अत्र विविधविधानां लेखनकार्यानुरूपं राजस्थानप्रान्तस्य विशेषसन्दर्भे आधुनिकसंस्कृत साहित्यकाराणां परिचयः प्रस्तूयते-

### श्रीसीतारामभट्ट पर्वणीकरः –

श्रीसीतारामभट्ट पर्वणीकरः पर्वणीकुलप्रवर्तकस्य श्रीमाधवभट्टस्य कनिष्ठः भ्राता आसीत्। पर्वणीकरवंशस्य मूलोद्गमस्थानं महाराष्ट्रे नासिकजनपदे स्थितः पर्वणी नामकः ग्रामः अस्ति। अयं कविः सवाई-जयसिंहस्य राज्याश्रितः कविः आसीत्। इतिहासे जयसिंहशासनकालः १८१८ ईशवीतः १८३४ ईशवीयपर्यन्तम् आसीत्। अतः सीतारामभट्टपर्वणीकरस्य स्थितिः एकोनविंशत्याः शताब्द्याः पूर्वार्द्धे आसीत्।

अयं कविः एकः महान् काव्यकारः आसीत्। अनेन विरचितेषु महाकाव्येषु 'ईश्वरविलासः' महाकाव्यं सुप्रसिद्धम् अस्ति। अस्मिन् ऐतिहासिककाव्ये जयपुरशासकस्य ईश्वरीयसिंहस्य तस्य पूर्वजानां क्रमिकं वर्णनम् अस्ति। इदं काव्यं चतुर्दशसर्गे निबद्धम् अस्य अङ्गीरसः वीररसः अस्ति। अत्र वैदर्भ-गौडीपाञ्चाली-आदयः रीतयः यथास्थानं प्रयुक्ताः सन्ति। अस्मिन् महाकाव्ये अलङ्कार-रस-वर्णनवैविध्य-भाषादिदृष्टिभिः महाकवेः अद्भुतकाव्यप्रतिभायाः दर्शनं भवति। एतदतिरिक्तम् अन्येषु महाकाव्येषु-जयवंशम्, नलविलासः, नृपविलासः, राघवचरितम्, लघुरघुकाव्यम् आदयः काव्यग्रन्थाः प्रमुखाः सन्ति। एतेषां महाकाव्योपरि राजस्थानविश्वविद्यालये नैकशोधकार्याणि सम्पादितानि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### राजवैद्यः श्रीकृष्णरामभट्टः–

श्रीकृष्णरामभट्टेन विरचितं प्रसिद्धं महाकाव्यम् 'कच्छवंश' महाकाव्यम् अस्ति। अयं कविः जयपुरनरेशस्य राजवैद्यस्य श्रीकुन्दनरामभट्टस्य ज्येष्ठः पुत्रः आसीत्। भवतः जन्म राजस्थानस्य राजधान्यां जयपुरे १९०५ विक्रम संवत्सरे श्रीकृष्णजन्माष्टम्यां तिथौ अभवत्। भवान् जीवनाथ ओझा महाभागात् चन्दनदास-स्वामिनः शिक्षां प्राप्तवान्। अस्य उल्लेखः कविना 'जयपुरविलासे' स्वकाव्ये कृतम्-

**येनाशिक्षि स जीवनाथगुरुतः काव्यप्रकाशाशयः,**
**छन्दश्चन्दनदासतः सगणितं वैद्यागमस्तातत:।**
**सूते गन्धकजारणाविधि कृता येन क्रिया नैकशः,**
**सोऽहं नूतनकाव्यपश्चककृतिः श्रीकृष्णशर्माकविः।।**

श्रीकृष्णरामभट्टः जयपुरस्थिते महाराजा संस्कृतमहाविद्यालये आयुर्वेदस्य व्याख्याता आसीत्। भवतः १९५४ ईसवीये वर्षे स्वर्गलाभः जातः।

श्रीकृष्णरामभट्टविरचितेषु महाकाव्येषु 'कच्छवंशमहाकाव्यम्' सुप्रसिद्धम् अस्ति। अस्मिन् जयपुरस्य कच्छवाहा-वंशीयशासकानां जीवनचरितम् १९ सर्गेषु वर्णितम्। अस्य भाषालालित्यं पदप्रयोग-पाण्डित्यञ्च प्रशंसनीयमस्ति।

'जयपुरविलासः' अनेन कविना सुरचितं रमणीयं खण्डकाव्यम् अस्ति। इदं खण्डकाव्यम् पञ्चसर्गेषु विभक्तम् अस्ति। अस्मिन् जयपुरस्य तात्कालिकस्थितेः चित्रणम् अस्ति। अस्य काव्यस्य कलापक्षः अत्युन्नतः समृद्धः चास्ति, परं तु भावपक्षस्य उत्कृष्टा तथैव नास्ति, तथापि अस्य काव्यस्य भाषा-शैली सरला, सरसा, हृदयग्राह्या चास्ति। भाषायां स्वाभाविकः प्रयोगः, वैदर्भीरीतेः विशुद्धरूपेण प्रयोगः च कृतः अत्र।

यमकालङ्कारस्य प्रयोगः रमणीयः, यथा-

**सकलया कलया किल शिल्पिभिः, रचितयाऽर्चितयालयमालया।**
**जयपुरं जयति क्षितिमण्डले, विमलया मलयाद्रिगुणाढ्यया।।**
**अतिविलक्षण-लक्षण-लक्षिता, ललितगीतिगतिस्फुटमङ्गला।**
**जयपुरमहती महिताहिता, महिमतो हिमतोषितमानवाः।।**

अत्र यमकालङ्कारेण सह अनुप्रासजन्यमाधुर्यः अपि चित्ताकर्षकरूपेण दृश्यते। छन्दोयोजनायां अयं कविः हिन्द्याः दोहाच्छन्दतः प्रभावितः दृश्यते। एकम् उदाहरणं द्रष्टव्यम्-

**व्याकुलता जयपत्तने नो पवनादपरत्र।**
**सरोगता कमलैर्विना भाति न कुत्रचिदत्र।।**

### पं. श्री सूर्यनारायणशास्त्री–

पण्डितः श्रीसूर्यनारायणशास्त्री व्याकरणाचार्यः आसीत्। तस्य जन्म हरियाणाप्रान्तान्तर्गते महेन्द्रगढ़स्थिते गौडपरिवारे १९४० विक्रमाब्दे अभवत्। तस्य शिक्षा जयपुरे अभवत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सः जयपुरे स्थिते महाराजासंस्कृत-महाविद्यालये प्राध्यापकः विभागाध्यक्षश्च आसीत्। जयपुरतः प्रकाश्यमानायाः मासिक-पत्रिकायाः 'संस्कृतस्य रत्नाकरस्य' आजीवनसदस्यः आसीत् सः। एतस्य सम्पूर्णाः रचनाः अस्याम् पत्रिकायामेव प्रकाशिताः।

'मानवंश' महाकाव्यम् पण्डितशास्त्रिणा विरचितं सुप्रसिद्धं महाकाव्यम् अस्ति। काव्यमिदम् १९ सर्गेषु निबद्धम्। इदमेकम् ऐतिहासिकं महाकाव्यम् अस्ति। अस्मिन् जयपुरनरेशस्य मानसिंहस्य पूर्वजानाञ्च वर्णनं कृतम्। रघुवंश-शैल्याधारिता इयं अद्वितीया कृतिः। जीवनस्य विविधपक्षाणां स्वाभाविकचित्रणम् अस्य प्रमुखविशेषता अस्ति। भावपक्षस्य कलापक्षस्य च रुचिरं सामञ्जस्यम् अपि अत्र उपलभ्यते। वीररसप्रधानतया ओजगुणस्य स्वाभाविकः समावेशः, परं तु प्रसादस्य अपि छटा हृदयावर्जका विद्यते। अलङ्काराणां प्रयोगः अपि सम्यक् प्रकारेण कृतः। एकम् उदाहणम् द्रष्टव्यमस्ति ।

मानवंशमहाकाव्यात् अतिरिक्तं शास्त्रिमहोदस्य प्रसिद्धिं प्राप्तं काव्यद्वयम् उपलभ्यते-कृष्णदूतम् उद्योगलहरी च। 'कृष्णदूतस्य' दूतपरम्परायाम् महत्त्वपूर्णं स्थानं विद्यते। अस्य खण्डकाव्यस्य कथानकं महाभारतात् आहरितम्। अस्मिन् कालिदासस्य मेघदूतस्य प्रभावः स्पष्टतया दृश्यते।

'उद्योगलहरी' अपि कवेः संस्कृतलहरी काव्येषु विशिष्टा। अत्र मानवस्य समस्तनैतिकोन्नतेः उद्योगमेव कारणरूपेण व्याख्यातम्।

## पण्डितः विद्याधरशास्त्री-

पण्डितविद्याधरशास्त्रिणः जन्म आंग्लपञ्चाङ्गानुसारम् सन् १९०१ ईसवीये अगस्तमासे चतुर्थ्यां तिथौ राजस्थानस्य 'चूरू' जनपदे अभवत्। अस्य पिता पण्डितदेवीप्रसादशास्त्री प्रकाण्डः पण्डितः आसीत्। अस्य पितामहः पण्डितः हरनामदत्तशास्त्री भारतीयस्तरे ख्यातिप्राप्तः विद्वान् आसीत्।

पण्डितेन शास्त्रिणा स्वपितामहोपरि 'हरनामामृतम्' नामकं १६ सर्गाणां महाकाव्यं विरचितम्। अस्य महाकाव्यस्य नायकः पण्डितहरनामदत्तः एव अस्ति। महाकाव्यस्य प्रमुखस्थलेषु मरुप्रदेशस्य वर्णनम्, नायकस्य बाल्यावस्थायाः, छात्रावासजीवनस्यच वर्णनं विशेषरूपेण उल्लेखनीयम्। नायक-जीवनस्य सर्वपक्षस्य साङ्गोपाङ्गं वर्णनमत्र विद्यते। अस्मिन् महाकाव्ये भाषाशैल्याः सहजता सरलता च विशेषतः उल्लेखनीया। अस्य ११ सर्गे वर्णितस्य वैराग्य-भावनायाः सम्यक् चित्रणं द्रष्टव्यम्-

**शान्तोऽप्यशान्ताज्जातो मनस्वी कौवेरकाशीः बहुधा जगाम।**
**गुहागतः कश्चन् यत्र सिद्धः प्रबोधयामास बुधं तमित्थम्।।**

अयं महाकविः बाल्यकालादेव संस्कृतभाषाप्रयोगे निष्णातः आसीत्। १५ वर्षीये लघ्ववस्थायामेव अनेन 'शिव-पुष्पांजलिः' नामकं स्तोत्रं रचितम्। एषः बीकानेरस्थिते डूंगरमहाविद्यालये प्रवक्तापदं विभागाध्यक्ष-पदञ्च अलङ्कृतवान्। तत्रैव 'हिन्दीविश्वभारती' इति नाम्नी संस्था स्थापिता तेन। राष्ट्रपति-पुरस्कारेणापि विभूषितः सः। सन् १९८३ ईसवीये फरवरी मासे स्वर्गं प्राप्तवान्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### आचार्यः मधुकरशास्त्री–

आचार्यमधुकरशास्त्रिणः जन्म जयपुरसमीपस्थिते रामपुराग्रामे अभवत्। अस्य पितुर्नाम घासीलाल जोशी अस्ति, यः कोटानगरस्थितस्य राजस्थान-प्राच्यविद्याप्रतिष्ठानस्य नियंत्रकपदात् सेवानिवृत्तः। आचार्यशास्त्रिणा विरचितं प्रसिद्धं महाकाव्यम् 'श्रीमहावीरसौरभम्' अस्ति। १६ सर्गेषु निबद्धमिदं महाकाव्यम् तीर्थंकरस्य भगवतः महावीरस्य जीवनस्य वर्णनस्वरूपम् अस्ति। अस्य रचना आचार्येण निर्धारितमानबिन्दूनां अनुसारेण कृता। प्रत्येके सर्गे यथोचितं छन्दः परिवर्तनं कृतमस्ति।

अस्य महाकाव्यस्य भाषा सरला चास्ति। दीर्घसमस्तपदानां प्रयोगः प्रायेण न कृतः रसयोजनाऽपि समुचितदृष्ट्या प्रस्तुता। कविना अत्र उद्घोषितम् यत् भगवता महावीरेण स्याद्वादस्य अनेकान्तवादस्य वा उपदेशः प्रजातांत्रिक-भावनायाः विकासार्थम् प्रदत्तः-

**समाजसंघर्षविनाशहेतोः स्याद्वाद-भाषामदिशत् प्रभुस्सः।**
**भुवि प्रजातान्त्रिकपद्धतीनां मूलं त्वनेकान्तसुचिन्तनं च।।**

### श्रीपद्मदत्त ओझा ( पद्मशास्त्री )–

'लेनिनामृतम्' महाकाव्यस्य रचयिता श्रीपद्मदत्तः ओझा अस्ति। अस्य जन्मस्थली उत्तरप्रदेशस्य अल्मोड़ाजनपदे अस्ति। उत्तरप्रदेशस्यैव विभिन्नस्थलेषु शिक्षां प्राप्तवान्, परं तु अस्य कार्यस्थली राजस्थानम् अस्ति।

इदं महाकाव्यं महाकविना श्रीपद्मदत्तः ओझा-महोदयेन सन् १९७५ ईसवीये वर्षे रचितम्। इयं कृतिः विश्वेश्वरानन्दवैदिकशोधसंस्थानतः प्रकाशिता अस्ति। अस्य महाकाव्यस्य लेखनस्य प्रेरणा ब्यावरनिवासीकुमारानन्दस्वामिना प्राप्ता। स्वामी कुमारानन्दः १९१३ ईशवीयवर्षे लेनिनात् दीक्षितः। निरन्तरं कुमारानन्दसम्पर्कात् श्रीपद्मदत्तओझा साम्यवादेन प्रभावितः भूत्वा इदम् ऐतिहासिकं महाकाव्यम् अरचयत्।

अस्मिन् महाकाव्ये लेनिनस्य जीवनवृत्तं वर्णितम्। अस्मिन् १५ सर्गाः सन्ति। कविवरेण पद्मदत्तशास्त्रिणा अत्र कार्लमार्क्सस्य वर्ग-संघर्ष-सिद्धान्तस्य, रूसदेशस्य प्राकृतिकशोभायाः, लेनिनस्य जन्मनः, तस्य शिक्षा-दीक्षायाः, साईबेरियाकारावासस्य, तेन स्थापितनवसमाजवादीदलस्य 'जारतन्त्रस्य' पतनस्य, स्वतन्त्रताप्राप्तेः लेनिनस्य बन्दीगृहीतस्य, प्राणदण्डस्य घोषणायाः, क्रेमलिननगरे लेनिनस्य स्वागतस्य, तस्य देहावसानस्य भारतरूसमैत्रीप्रसङ्गस्य च सरल-भावानुकूल-भाषामाध्यमेन वर्णनं कृतमस्ति।

अस्य महाकाव्यस्य प्रधानरसः वीरः, अन्येषां रसानामपि समुचितः प्रयोगः। अलङ्काराणामपि यथास्थानं सुन्दरः प्रयोगः कृतः। अत्र उपमायाः एकः प्रयोगः द्रष्टव्यः, यत्र गर्भभारेण खिन्ना मारिया हिंस्रपशुमुखात् विसृष्टा भयभीतहरिणीतुल्या प्रतीयते-

**सूर्यातपे गर्भभरेण खिन्ना लतागृहं प्राप्य समाश्वसन्ती।**
**विलक्ष्यते हिंस्रमुखाद् विमुक्ता विमुक्तयूथा हरिणीव भीता।।**

एतत् महाकाव्यमाधारीकृत्य अयं महाकविः सोवियतभूमिनेहरूपुरस्कारेण सम्मानितः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## श्रीगोस्वामी हरिरायः–

श्रीगोस्वामी हरिरायविरचितं प्रसिद्धं महाकाव्यं 'जरासन्धवधम्' अस्ति। श्रीहरिरायस्य जन्म राजस्थानप्रान्ते जोधपुरजनपदे चौपासनी ग्रामे १९५० ईसवीये वर्षे मई मासे २२ तिथौ, तदनुसारम् ज्येष्ठशुक्लपञ्चम्यां तिथौ २००९ संवत्सरे अभवत्। अस्य पिता श्रीगोस्वामी ब्रजभूषणलाल महोदयः आसीत्। भवतः शिक्षा-दीक्षा गुजरातप्रान्ते जामनगरे अभवत्। सः बाल्यकालादेव प्रतिभाशाली आसीत्। १३ वर्षस्य अल्पावस्थायाम् एव प्रथमं काव्यं पूर्णं कृतम्। राजकीयसंस्कृतमहाविद्यालयस्य प्राचार्यः श्रीरामदासकौण्डिन्यः भवतः परमादरणीयः गुरुः आसीत्। 'प्रणय-परिणये' नामके महाकाव्ये भवता सम्मानपूर्वकं तस्य स्मरणं कृतम्–

**साहित्यशास्त्राम्बुधिगूढतत्त्वं यत्सन्निकर्षेण मयाध्यगामि।**
**गुरुं रसज्ञं किल रामदास-कौडिन्यनामानमहं स्मरामि।।**

श्रीहरिरायेन महाकविमाघस्य काव्यशैलीम् अनुसृत्य 'जरासन्धवधम्' महाकाव्यम् विरचितम्। इदं तथ्यं स्वयमेव कविना महाकाव्यस्य २० सर्गे स्वीकृतम्–

**काव्यान्तरे वायसतीर्थदृष्टः लक्ष्मीपतेः कीर्तनमात्रचारौ।**
**माघप्रबन्धे यदि पक्षपातो विपश्चितां माऽनुचितो विमातु।।**

इदमपि महाकाव्यं शिशुपालवधानुरूपं २० सर्गे निबद्धम्। अस्य शैली पाञ्चाली, अङ्गी रसः वीररसः अस्ति। अन्येषामपि रसानां समुचितः प्रयोगः कृतः अत्र कविना।

## डॉ. रसिकबिहारी जोशी –

डॉ. रसिकबिहारीजोशीमहोदयस्य जन्म नागपुरे एकस्मिन् प्रतिष्ठितवैष्णव-परिवारे १९२७ ईसवीये सितम्बरमासे १२ तिथौ अभवत्। भवतः परिवारः विद्वत्परम्परायां अग्रगण्यः। भवतः पिता पण्डितः रामप्रतापशास्त्रिमहोदयः नागपुरविश्वविद्यालये संस्कृत-पाली-हिन्दी-मराठी-बंगाली-तमिल-तेलगू-आदीनां विभागानाम् अध्यक्षः आसीत्। ४३ वर्षीयावस्थायां पण्डितरामप्रतापमहोदयः राजस्थानम् आगत्य ब्यावरनगरे निवासं अकरोत्। अस्मात् कारणात् जोशी-महोदयस्य प्रारम्भिकी शिक्षा ब्यावरनगरे एव सम्पन्ना। भवता व्याकरणस्य, दर्शनस्य, अलङ्कारस्य च विशिष्टं अध्ययनं कृतम्। पश्चात् भवता वाराणसीतः पीएच.डी. उपाधिः, पेरिसविश्वविद्यालयतः डी.लिट्. उपाधिश्च लब्धा। भवान् लखनऊ-जोधपुर-दिल्ली विश्वविद्यालयेषु संस्कृतस्य आचार्यः आसीत्।

भवता 'मोहभङ्गं' नामकं प्रसिद्धं महाकाव्यं विरचितम्। अष्टसर्गात्मकस्य अस्य कथावस्तु पौराणिकी अस्ति। विष्णुपुराणस्य चतुर्थांशस्य द्वितीयाध्याये सौमरिवृत्तान्तमाश्रित्य इदं महाकाव्यं सुरचितम्। अत्र मोहभङ्गस्य मानसिकघटनायाः अपि महत्त्वपूर्णं स्थानं प्रदत्तम्।

मानवमात्रस्य हृदये निरन्तरम् उत्पद्यमानस्य द्वन्द्वस्य प्रवृत्तिः अङ्किता अत्र। सौमरिमाध्यमेन कविना इदं सत्यं प्रकाशितं यत् ज्ञान-तपस्या-भक्तिबलेन वासनायाः यद्यपि निरोधः सम्भवः तथापि सर्वथा न।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

श्रेयप्रेयमार्गयोः श्रेयमार्गस्य वरणस्य उपदेशः एव अत्र दिष्टः।

एतदतिरिक्तं भवता करुणाकटाक्षलहरी सारस्वतगीतिकाव्यम्, प्रज्ञापारिजातम्, श्रीगोवर्धनगौरवम् इत्यादयः ग्रन्थाः विरचिताः। भवान् उत्तरप्रदेश-संस्कृत-अकादमीतः, मध्यप्रदेश-संस्कृत-अकादमीतः कालिदासपुरस्कारेण सम्मानितः। १९८४ ईसवीये वर्षे राजस्थान-संस्कृत-अकादमीतः 'श्रीहारीतऋषिः' पुरस्कारेण अनन्तरं राष्ट्रपति-पुरस्कारेणापि च पुरस्कृतः।

## पं. गुलाबचन्द्रचूलेटः –

पण्डितः गुलाबचन्द्रचूलेटः राजस्थानप्रान्तस्य जयपुरजनपदस्य नायन-अमरसरग्रामस्य निवासी अस्ति। भवतः पितामहः श्रीसीतारामशर्मा, पिता श्रीहनुमानसहाय शर्मा अस्ति। भवान् व्याकरणस्य लब्ध प्रतिष्ठितः विद्वान् अस्ति। राजस्थानसर्वकारे विद्यालयीयशिक्षायाम् संस्कृतशिक्षकरूपेण कार्यम् अकरोत्।

भवता विरचितं 'श्रीकृष्णचरितामृतम्' तथा 'महारथी' महाकाव्यं राजस्थानार्वाचीनासु संस्कृतकृतिषु उल्लेखनीयम् अस्ति। भवान् १९९१ ईसवीये वर्षे राजस्थान-संस्कृत-अकादम्याः 'माघ-पुरस्कारेण' विभूषितः।

अस्मिन् 'महारथी' इति महाकाव्ये २१ सर्गाः सन्ति। महारथीकर्णस्य जीवनस्य प्रमुखानां घटनानां चित्रणम् अत्र कृतम्। सर्गरचनाकथावस्तुविकासः, रसयोजना च सर्वाः शास्त्रीययोजनानुरूपाः सन्ति।

## श्रीनिवासाचार्यः –

श्रीनिवासाचार्यस्य जन्म राजस्थानस्य 'चूरू' जनपदे अभवत्। अस्य पिता पण्डितः नौरंगरायशास्त्री संस्कृतस्य प्रकाण्डः पण्डितः आसीत्। श्रीनिवासाचार्योपरि तस्य पूर्णः प्रभावः आसीत्।

अतः एतेन १९३३ ईसवीयस्य समीपे 'चन्द्रमहीपतिः' इति एकः उपन्यासः रचितः। एतस्य प्रकाशनं स्वतन्त्रताप्राप्तेः पश्चात् अभवत्। अस्मिन् उपन्यासे राजकुमारस्य राजकुमार्याः च प्रणयप्रसङ्गस्य वर्णनम् प्रस्तुतम्। खलनायकस्य विधानमपि अत्र कृतम् यः प्रणयप्रसङ्गे बाधामुपस्थापयति। परं तु नायकः बाधां समुत्तीर्य नायिकया सह सुखेन मिलति। उपन्यासस्य नायकः राज्ञः नवेन्दुपालस्य पुत्रः चन्द्रः तथा च नायिका विलासपुरस्य राज्ञः रामपालस्य पुत्री कमला अस्ति। कान्तिसिंहः अस्ति खलनायकः।

अयं उपन्यासः यद्यपि गद्ये लिखितः परं तु मध्ये चित्रकाव्यस्य योजना, विशेषतः एकाक्षर-द्वयक्षरकाव्यस्य समावेशः रसभङ्गं करोति। सर्वतः पर्यालोचनेन इदं ज्ञायते यत् भाषाव्याकरणोपरि उपन्यासकारस्य पूर्णाधिकारः अस्ति।

## पं. नवलकिशोरशास्त्री कांकरः–

भवतः जन्म जयपुरनगरे १९६१ संवत्सरे आषाढकृष्णत्रयोदश्यां तिथौ अभवत्। भवतः पिता पण्डितः गणेशनारायणशर्मा आसीत्। पण्डितः नवलकिशोरशास्त्री कांकरः लघुकाश्याः मूर्धन्यः विद्वान् अस्ति। गद्यसम्राट्-साहित्यकाव्यतीर्थ-व्याकरणशास्त्री-साहित्याचार्य-इत्यादिभिः उपाधिभिः विभूषितः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अस्ति एषः कविः।

भवान् राजकीये संस्कृतमहाविद्यालये राजगढ़े (अलवरजनपदे) किञ्चित्वर्षपर्यन्तं प्रधानाध्यापकपदे कार्यरतः आसीत् पश्चात् जयपुरस्थिते पारीकविद्यालये, क्रमोन्नते पारीकमहाविद्यालये हिन्दीविषये संस्कृतविषये च अध्यापनकार्यम् अकरोत्। १९१८ ईसवीये वर्षे अस्मात् महाविद्यालयात् एषः सेवानिवृत्तः।

अध्यापनेन सहसाहित्यसर्जने अपि भवान् अग्रगण्यः। भवतः लेखनक्षेत्रम् अपि विस्तृतम् अस्ति। भवता विभिन्नेषु विषयेषु पञ्चाशताधिकाः कृतयः रचिताः सन्ति। भवान् राष्ट्रपतिपुरस्कारेणापि अलंकृतः अस्ति।

'यात्राविलासम्' भवता विरचितः एकः प्रौढः उपन्यासः अस्ति। अस्य प्रकाशनं १९९३ ईसवीये वर्षे अभवत्। अत्र भवता स्वजीवनस्य एव यथार्थानाम् अनुभवानाम् अङ्कनं कृतम्। वस्तुतः अयं उपन्यासः विभिन्नानां तीर्थस्थलानां यात्रा सम्बद्धा दर्शनसम्बद्धा च उत्कृष्टा रचना विद्यते। अस्मिन् उपन्यासे कुत्रचित् बाणभट्टशैल्याः अनुकरणम् तु कुत्रचित् अम्बिकादत्तशैल्याः अनुकरणम् दृश्यते। अत्र भाषा अधिकांशतः समस्तपदावलीयुक्ता तु कुत्रापि नवीनशब्दावल्या अन्विता अस्ति। भाषाशैल्याः एकम् उदाहरणम् द्रष्टव्यम्–

"विष्णुरिव लक्ष्मीपतिः सुदर्शनं सुन्दरश्च। ब्रह्मेव हिरण्यगर्भः प्रजापतिश्च। शिव इव महेश्वरः सर्वमङ्गलाधीशश्च। बुद्ध इव सर्वदा शास्ताच। अहह, अत्र स्त्रीसंहतिरपि गौरी पद्मालया, चञ्चला इन्द्राणीकृतहृदया च। अतो निश्चप्रचं प्रचुरतरहिरण्यगर्भा प्रभूततरमाधवाः, पुरुषपशुपतयश्च लोकारित्रिदिवमतिशेरते स्म।"

## महामहोपाध्यायः स्व. पं. गिरिधरशर्मा चतुर्वेदी –

भवतः जन्म जयपुरनगरे १९३९ विक्रमसंवत्सरे अभवत्। भवतः पिता गोकुलचन्द्रः चतुर्वेदी आसीत्। भवतः शिक्षा-दीक्षा जयपुरे एव अभवत्। भवान् जयपुरस्थितमहाराजासंस्कृतमहाविद्यालयात् व्याकरणाचार्य-परीक्षां प्रथमश्रेण्याम् उत्तीर्णं कृतवान। भवतः गुरुजनेषु, पण्डितः मधुसूदनओझा-पण्डितः शिवकुमार-शर्मा, पं. दामोदरशास्त्री-पं. गोविन्दशास्त्री, प्रमुखाः सन्ति।

छात्रावस्थायामेव मित्रगणसाहाय्येन 'संस्कृत-रत्नाकरः' नाम्ना पत्रिका भवता प्रकाशिता सम्पादिता च। पश्चात् भट्ट-मथुरानाथशास्त्रिणा इयं पत्रिका कुशलतापूर्वकं सम्पादिता।

चतुर्वेदीमहोदयेन १९०७ ईसवीं आरभ्य १९४४ पर्यन्तम् विभिन्न-स्थानेषु अध्यापनकार्यं कृतम्। १९२८ ईसवीये वर्षे भवान् महाराजासंस्कृतमहाविद्यालयस्य अध्यक्षः नियुक्तः।

१९४४ ईसवीये वर्षे अत्रतः सेवानिवृत्तः। सेवानिवृत्यनन्तरं हिन्दूविश्वविद्यालयस्य काश्याः संस्कृतानुसन्धानविभागस्य अध्यक्षता अपि चतुर्वर्षपर्यन्तं भवता कृता।

काशीनरेशस्य विशेषानुरोधे पौराणिकान् विषयान् अधिकृत्य भवता नैकाः ग्रन्थाः विरचिताः। भवता



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विरचितेषु ग्रन्थेषु 'प्रमेयपारिजातम्', 'वेदविज्ञानबिन्दुः', 'वैदिकविज्ञानम्', 'भारतीयसंस्कृतिः' इत्यस्मिन् ग्रन्थे भवान् केन्द्रीयसंस्कृत-अकादमीतः पुरस्कृतः जातः। भारतस्य राष्ट्रपतिना सर्वप्रथमं संस्कृतम् अधिकृत्य भवतः सम्मानः कृतः।

भवता विरचितं कहानीद्वयं प्रसिद्धम् अस्ति- (१) पितुरुपदेशः, (२) कश्चित् कविः।

द्वयोः 'कश्चित् कविः' अधिका प्रसिद्धा। अस्यां कहान्याम् कस्यचित् निर्धनस्य किन्तु आत्मसम्मानभावनया ओतप्रोतस्य कवेः इतिवृत्तम् अस्ति। आत्मसम्मानभावनया राज्याश्रयं अविगण्य तं वारं-वारम् अस्वीकृत्य कष्टमयं जीवनं यापयति अयं कविः, परं तु स्वां वृद्धां मातरं तीर्थयात्रां कारयितुमिच्छति। राजमाता इव स्वमातुः दान-पुण्याय संकल्पं कारयति।

अन्ततोगत्वा राजमहिष्याः प्रणयप्रस्तावं अस्वीकारपूर्वकम् अयं कविः राज्ञः आग्रहे राजदरबारे उपस्थितः भूत्वा वस्तुस्थितिं वर्णयति परं तु राजमहिष्याः प्रतिष्ठायाः आघातं न करोति। प्रसन्नः भूत्वा राजा इमं कविं प्रचुरं धनं ददाति।

अस्याः भाषा प्रवाहमयी प्राञ्जला चास्ति। एकम् उदाहरणम् द्रष्टव्यम् अस्ति-

'जननि! मैवं वादीः। विवेचय मनाक् स्वातन्त्र्ये यत्सुखं तल्लवोऽपि सततमध्यक्षमुख-प्रेक्षिभिस्तच्चाटुकरणमात्रसमापितकर्तव्यैः तदुदितदुर्वचनशल्य-पूरितकर्णकुहरैरात्मविक्रयिभिर्जनैर्ननाम समासाद्यते स्वप्नेऽपि। भृतिकर्मणि वर्तमानस्य यो महान् क्लेशस्तल्लेशोऽपि यदृच्छोपनतमन्नादिं फलादिं वा यथेच्छं भुञ्जानस्य काले शयानस्य मे नास्ति। मातः सर्वथाहं सुखी। तत्परित्यजतु चिन्तामिमां भवति।'

वस्तुतः इयम् कहानी आत्मसम्मानस्य स्वातन्त्र्यजीवनस्य नैतिकतायाः लोभविहीनतायाः च श्रेष्ठगुणवर्णने सर्वथा सक्षमा अस्ति।

## स्व. विद्याभूषण पं. गणेशरामशर्मा –

राजस्थानस्य कहानीलेखकेषु पण्डितगणेशरामशर्मणः नाम अग्रगण्यम् अस्ति। भवतः जन्म १९०८ ईसवीये वर्षे मार्चमासे २७ तिथौ राजस्थानस्य डूंगरपुरजनपदे अभवत्। भवतः पिता केदारलालशर्मा राजपण्डितः आसीत्। भवतः शिक्षा जयपुरे अभवत्। भवान् पण्डितगिरिराजप्रसादद्विवेदी-पण्डितदुर्गादत्तशर्मा-केदारनाथ शर्मा-भट्टमथुरानाथशास्त्री-आदीनां गुरुवर्याणां सामीप्यं प्राप्य ज्योतिशास्त्रस्य साहित्यशास्त्रस्य अध्ययनं कृतवान्।

भट्टमथुरानाथशास्त्रिणा काव्यरचनायाः प्रेरणा प्राप्ता। तत्र भवतः प्रेरणया एव पण्डितशर्मणा विविधछन्दस्सु रचनाः कृताः।

भवता संस्कृतभाषायां नैककाव्यनिबन्धाः लघुकथाश्च विरचिताः। डूंगरपुरननरेशद्वारा भवतः सम्मानः जातः। भवता १९५० ईसवीवर्षे महारावलस्य लक्ष्मणसिंहस्य रजतजयन्तीसमारोहे अभिनन्दनग्रन्थः सम्पादितः। १९४९ ईसवीय वर्षे झालावाडस्य इण्टरमहाविद्यालये संस्कृतस्य प्राध्यापकः नियुक्तः, ततः १९७७ ईसवीये वर्षे सेवानिवृत्तः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भवता विरचितेषु काव्येषु-महिषमर्दिनी-स्तुतिः मोहनाभ्युदयम्, सुशीलोद्वाहमङ्गलम्, आशीः कुसुमाञ्जलिः आदयः प्रमुखग्रन्थाः सन्ति। भवतः विंशतिः कथानां संग्रहः 'राजस्थान-संस्कृत-अकादमीतः'-'संस्कृत कथाकुञ्जम्' नाम्ना प्रकाशितः। प्रेम-हास्य-व्यंग्य-करुण-वीरादि-विषय सम्बन्धिता कहानीरचनाः रचिताः पण्डितशर्मणा। तस्य कहानीविधायाः अध्ययनेन स्पष्टं ज्ञायते यत् भाषोपरि तस्य पूर्णाधिकारः विद्यते। एकम् उदाहरणम् प्रस्तुतमत्र- ''युवां द्वावपि स्वस्वविश्वासानुसारं विजयिनौ स्थः। अनेन पुरुषार्थवादिना स्वोद्योगाश्रयात् सुखं लब्धम्। भाग्यवादिना त्वया च भाग्यादेव परिश्रमं विनैव स्वत एव सिद्धं सर्वं सुखं प्राप्तम्। अतोऽधुनाहं निर्णयामि यद् भाग्यवान् भाग्येन तथा च पुरुषार्थवान् पौरुषेण च संसारे स्वमनोरथं साध्नोति। वस्तुतो भाग्यं पुरुषार्थश्च द्वावपि जीवनेऽस्माकमावश्यकौ भवतः।''

## पं. वृद्धिचन्द्रशास्त्री-

भवतः जन्म १९६१ संवत्सरे जयपुरे अभवत्। बाल्यकालः वर्धानगरे व्यतीतः। भवतः प्रारम्भिकी शिक्षा तत्रैव अभवत्। एकादशवर्षस्य अल्पावस्थायां भवतः पितुः देहावसानम् अभवत्। तत्पश्चात् जयपुरे निवर्तनम् अभवत्। अत्रतः १९८४ संवत्सरे शास्त्रि-परीक्षामुत्तीर्य, १९८७ संवत्सरे व्याकरणाचार्यस्य परीक्षायां सफलताम् अधिगतवान्। भवतः गुरुजनेषु पण्डितगिरिधरशर्मा चतुर्वेदी-राजगुरुपण्डितः-चन्द्रदत्त-ओझामहाभागाः पण्डिताः चन्द्रशेखर-प्रश्नवर्याः, विद्यावाचस्पतयः मधुसूदनओझा महोदयाः च प्रमुखाः आसन्।

भवान् १९३१ ईसवीवर्षे चमडिया-संस्कृत-महाविद्यालये, फतेहपुरे प्राचार्यपदे नियुक्तः १९३३ ईसवीये वर्षे जयपुरस्थिते महाराजासंस्कृतमहाविद्यालये व्याकरणाध्यापकरूपेण कार्यारम्भं कृतवान्। अत्रतः १९६१ ईसवीवर्षे धर्मशास्त्रस्य विभागाध्यक्षपदात् सेवानिवृत्तः। १९६४ ईसवीये वर्षे जनवरीमासे २८ तिथौ अमृतलोकं प्राप्तवान्।

अध्यापनादतिरिक्तं बाल्यकालादेव संस्कृत-रचनाकार्ये भवान् संलग्नः आसीत्। भवता उपन्यास-आख्यायिका-लघुकथा-निबन्धलेखनद्वारा संस्कृत-साहित्ये विपुलं योगदानं कृतम्। भवता २१ ग्रन्थाः विरचिताः। भवता विरचितेषु ग्रन्थेषु 'आदर्श-दम्पती' नामक उपन्यासः 'उमा' नाम्नी आख्यायिका च विशेषरूपेण उल्लेखनीये स्तः।

'उमा' इत्याख्यायां कथायां चन्द्रमौलेः उमायाः दाम्पत्यप्रेम्णः वर्णनं कृतमस्ति। अस्याः कथायाः नामकरणं नायिकायाः नामोपरि कृतमस्ति। इयं कथा (कहानी) उत्कृष्टस्य प्रेम्णः परिचायिका अस्ति। नायकनायिकामध्ये नदीतटे प्रतिज्ञा भवति यत् एकस्य मृत्योः अनन्तरं अपरः आत्महत्यां न विधास्यति।

किञ्चित् कालपर्यन्तं एव नायकस्य चन्द्रमौलेः मातुः उमायाः च मृत्युः भवति। चन्द्रमौलिः तां प्रतिज्ञाम् अवलब्य-आत्मघातं न करोति।अस्याः कथायाः भाषा सरला सरसा प्रसादगुणोपेता चास्ति। पतिपत्न्योः मनोभावानां स्वाभाविकाभिव्यक्तिः अस्याः विशेषता अस्ति। अवसरानुसारम् लेखकेन प्रकृत्याः रमणीयचित्रणमपि प्रभावपूर्णरीत्या कृतम्। भाषा-शैल्याः एकम् उदाहरणं द्रष्टव्यम् अस्ति-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

'आसीत् शारदी राका। सायाह्न एव भवगतः कुमुदिनीनायकस्य सुविपुलं वर्तुलं च बिम्बं घनीभूतः सुमनसामाह्लादराशिरिव पूर्वक्षितिजे समुदियात्। यथा यथा सूर्यपश्चिमक्षितिजोपरि प्रसृताः कमलिनीनायकस्यारक्ता रश्मयो गगनं पर्यत्यजन् तथा कलापरिपूर्णस्य कलानाथस्य शीतलाः शुभ्राः च कान्तिमन्तः किरणाः समस्तेऽपि विहायसि यथेच्छं प्रसारन्।'

भाषाशैल्या सह अत्र प्रकृत्याः अपि चारुचित्रणं प्रस्तुतम् अस्ति।

## डॉ. पुष्करदत्तशर्मा–

डॉ. पुष्करदत्तशर्मणः जन्म राजस्थानस्य चूरूजनपदे तारानगरे १९२७ ईसवीये वर्षे अप्रैलमासे २१ तिथौ पण्डितस्य जयनारायणशास्त्रिणः गृहे अभवत्। भवतः मातुर्नाम श्रीमती गोपीदेवी आसीत्। भवतः शिक्षा तारानगरे, चूरूनगरे, रामगढ़े, बीकानेरनगरे च अभवत्। भवता १९५५ ईसवीये वर्षे डूंगरमहाविद्यालय-बीकानेरतः स्नातकोत्तरपरीक्षायां प्रथम श्रेण्यां स्थानं प्राप्तम्। १९६२ ईसवीये वर्षे हिन्दीविषये अपि स्नातकोत्तरस्य परीक्षायां सफलतां प्राप्तवान्। १९६९ ईसवीये वर्षे राजस्थानविश्वविद्यालयतः पीएच.डी. इत्युपाधिं प्राप्तवान्।

एतस्मात् पूर्वं डूंगरमहाविद्यालये बीकानेरे संस्कृतप्राध्यापकः नियुक्तः। १९८२ ईसवीये वर्षे जुलाई मासे सेवानिवृत्तिं प्राप्तवान्। सेवानिवृत्तेः पश्चात् एकवर्षपर्यन्तं जैनविश्व-भारती, लाडनू संस्थायां भाषाया अतिरिक्तं आंग्ल-रूसी-फ्रेन्च-आदीनां भाषाणां अपि ज्ञातारूपेण कार्यं कृतम्। भवता विविधविधासु लेखनकार्यं सम्पादितम्। भवता सम्पादितेषु रचितेषु च कार्येषु उल्लेखनीयाः सन्ति-

१. कंटी (हिन्दी उपन्यासः १९७३ ईसवीये वर्षे प्रकाशितः)

२. प्रह्लादमहाकाव्यम् (१९५५-५६ मध्ये प्रकाशितः)

३. संवेदन (हिन्द्याः पञ्चकविताया: सङ्कलनम्)

४. सम्पादनकार्याणि- भवता महता श्रमेण संस्कृतकाव्यमञ्जरी, संस्कृतपीयूषम्, लघुसिद्धान्तकौमुदी (नवीनभाष्यम्), संस्कृतसाहित्येतिहासः, कृत्यमहार्णवम् (वाचस्पतिमिश्रस्य), स्वरमङ्गलायाः सम्पादनम्, राजस्थानसंस्कृताकादमीतः प्रकाशितस्य 'राजस्थानस्याधुनिकाः संस्कृतकथालेखकाः' इत्यस्या अपि सम्पादनम् कृतम्।

भवता अनेकाः कथाः अपि विरचिताः। तासु 'प्रतिवेशिनी' कथा बहुचर्चिता। इयं कथा सर्वप्रथमं स्वरमङ्गलायां प्रकाशिता, पश्चात् कन्नडभाषायाम् अनूदितो भूत्वा कन्नडभाषायाः पत्रिकायां प्रकाशिता। भवतां शोधनिर्देशने अनेके छात्राः शोधकार्याणि कृतवन्तः।

## डॉ. प्रभाकरशास्त्री –

डॉ. प्रभाकरशास्त्रिणः जन्म जयपुरनगरे १९३९ ईसवीये वर्षे अप्रैलमासे १३ तिथौ अभवत्। भवतः पिता पण्डितः वृद्धिचन्दशास्त्री धर्मशास्त्रस्य उद्भटः विद्वान् आसीत्। स्वपितुः संस्कृतशिक्षां प्राप्तवान् एषः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भवान् सामवेदपरीक्षायां सफलतां प्राप्तवान्। धर्मशास्त्रे आचार्यपर्यन्तं नैकपरीक्षायां उत्तीर्णतां गतम्।

आधुनिक-शिक्षा-प्रणाल्याम् स्नातकोत्तरपरीक्षाम् उत्तीर्य्य १९६५ ईसवीयेवर्षे पीएच.डी. उपाधिं प्राप्तवान्। तदनन्तरं राजस्थान विश्वविद्यालयत: संस्कृतविषये सर्वप्रथमं डी.-लिट्. इत्युपाधिना विभूषित:।

डॉ. प्रभाकरशास्त्री महोदय: १९६१ ईसवीत: आरभ्य अनेकवर्षपर्यन्तं अध्यापनकार्यं कृतवान्। १९९३ ईसवीयेवर्षे राजस्थानविश्वविद्यालयस्य संस्कृतविभागे आचार्य: नियुक्त:। बहुवर्षपर्यन्तं विभागाध्यक्षपदम् अलंकृत्य सेवानिवृत्त:। भवान् राजस्थान-संस्कृत-अकादम्या: मानद-निदेशक: अपि आसीत्। २००५ ईसवीय`वर्षे राष्ट्रपतिमहोदयेन सभाजित: पुरस्कृत: अयम् इदानीमपि सारस्वत-साधनायां निरत:।

एतेन संस्कृतजगति बहूनि कार्याणि कृतानि। नैकवर्षपर्यन्तं भवता-'विश्वम्भरा' इत्यस्या: पत्रिकाया: सम्पादनं कृतम्। भवत: शोधलेखा: विविधासु पत्रिकासु प्रकाशिता: सन्ति। भवता सम्पादितासु कृतिषु-याज्ञवल्क्यस्मृति: (आचाराध्यायपर्यन्तम्) संस्कृतगद्यप्रभा, इन्दुमतीस्वयंवर: मध्यमव्यायोग: प्रतिज्ञायौगन्धरायणम्, सौन्दर्यलहरीटीका, आद्या: प्रमुखा: सन्ति।

भवता अनेकानि (आकाशवाणी) रूपकाणि, लिखितानि अनेका: कथा: च लिखिता:। भवता विरचितासु कथासु 'जीवन-ज्योति:' 'आत्मवेदना' च प्रमुखे स्त:। जीवन-ज्योति: 'स्वरमङ्गला' पत्रिकायां प्रकाशिता। 'आत्मवेदना' इति कथा 'राजस्थानस्याधुनिका: संस्कृतकथालेखका:' नामकसंकलनग्रन्थे प्रकाशिता अस्ति।

भवत: शोधनिर्देशने अनेके विद्यार्थिन: शोधकार्यं कृतवन्त:। अन्येषु कथाकारेषु डॉ. नन्दकिशोरगौतम:, श्रीगिरिराजशास्त्री, श्रीदुर्गादत्त झा मैथिल:, पण्डितदीनानाथत्रिवेदी, डॉ. नारायणशास्त्री कांकर: आदय: प्रमुखा: सन्ति।

## आधुनिकरूपककारा:

महाकाव्यं, कथासाहित्यं, गीतिकाव्यम्-इत्यादीनां विधानाम् इव नाट्यसाहित्यलेखनम् अपि विद्वद्भि: प्राचीनकालादेव बहुमान्यम् आसीत्। आधुनिकयुगे अपि राजस्थाने संस्कृतसाहित्ये रूपकाणां नैका: रचना: प्राप्यन्ते। रूपकरचनायां प्रवृत्तानां रूपककाराणां परिचय: संक्षेपेण एवम् प्रस्तुत: अस्ति-

**(१) श्रीगोविन्दप्रसादशास्त्री-** श्रीगोविन्दप्रसादशास्त्री रूपकसाहित्ये उल्लेखनीय: अस्ति। शास्त्रिणा समसामयिकविषयेषु रूपकाणि रचितानि यानि संस्कृतस्य विविधासु पत्रिकासु प्रकाशितानि। भवत: प्रमुखानि रूपकाणि सन्ति- 'बालशाकुन्तलम्' श्रेष्ठशिष्योदाहरणम्, भारतविजयम्, पाकगर्वभञ्जनम्, कृष्णसुदामानाटकम्, हरिश्चन्द्रनाटकम् इत्यादीनि।

**(२) श्रीविद्याधरशास्त्री-** महाकाव्य-खण्डकाव्य-कथादीनां लेखने अग्रगण्य: श्री विद्याधरशास्त्री महोदय: रूपकसाहित्यविरचने अपि तथैव निपुण:। भवता लिखितानि रूपकाणि



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

'विद्याधरग्रन्थावल्याम्' सुरक्षितानि सन्ति। भवता विरचितेषु रूपकेषु-दुर्बलबलम्, पूर्णानन्दम्, कलिपलायनम् आदयः रूपकग्रन्थाः प्रमुखाः सन्ति।

**(३) डॉ. नारायणशास्त्री काङ्करः**- डॉ. नारायणशास्त्री काङ्करः पण्डितस्य नवलकिशोरशास्त्रिणः योग्यपुत्रः अस्ति। स्वपिता इव साहित्यसर्जने भवतः विशेषरुचिः विद्यते। भवता संस्कृतभाषायां अनेकानि रूपकाणि रचितानि सन्ति। कतिपयानि प्रमुखानि एवम् सन्ति-

'कर्तव्यपरायणता, स्वातन्त्र्य-यज्ञाहुतिः, कुणालस्य कुलीनता, धनिक-धूर्तता, सुहृत्समागमः स्वामिभक्ता पन्ना धात्री, प्रतिभाचमत्कारः, उदारमना-भामाशाहः, गुरुदक्षिणा, प्रेम-परीक्षा, स्वदेश-प्रेम, भक्तराजचन्द्रहासः, अशोकस्य पराजयः, बन्दी चन्द्रगुप्तः, प्रत्युत्पन्नमतिः नापितः, ताडन-भयम्, पशुकल्याणम् इत्यादीनि।'

श्रीकाङ्करमहोदयः संस्कृतस्य आशुकविः अपि अस्ति। भवतः भाषा-शैली सरला, सरसा, रमणीया चास्ति। भाषायां स्वाभाविकः प्रवाह विद्यते।

**(४) डॉ. हरिरामाचार्यः** - डॉ. आचार्यः संस्कृतस्य प्रतिष्ठित-साहित्यकारः अस्ति। आकाशवाण्या दूरदर्शनेन च भवतः ख्यातिः दिग्दिगन्ते व्याप्ता। दूरदर्शने 'दायरे' इति 'सीरियलमाध्यमेन' भवान् बहुचर्चितः।

भवान् एकः सुमधुरः आशुकविः उत्कृष्टः नाटककारः, एकांकीलेखकः अपि अस्ति। भवता विरचितेषु रूपकेषु-पूर्वशाकुन्तलम् गङ्गालहरी, नहि भोजसमो नृपः, आषाढस्य प्रथमदिवसे, सत्यमेव जयते, वेतालकथा, नेत्रदानम्, कनिष्ठिकाधिष्ठित-कालिदासः, इत्यादीनि रूपकाणि प्रसिद्धानि सन्ति।

कवितारचनाकार्यहेतोः भवान् मीरापुरस्कारेण पुरस्कृतः अस्ति। राष्ट्रपतिद्वारा अस्मिन् वर्षे (२००५ ईसवी वर्षे) सम्मानितः।

राजस्थानस्य अन्येषु रूपककारेषु मध्ये देवर्षिकलानाथशास्त्री महाभागः राष्ट्रपतिपुरस्कारेण सम्मानितः। 'साहित्यवल्लरी' नामाख्यकृतिरचनया एषः संस्कृतसाहित्यस्य सम्माननीयं पुरस्कारं प्राप्तवान्। महाभिनिष्क्रमणम्, कर्मक्षेत्रे, चित्तौड़सिंहः, प्रतापसिंहः, प्रतापसिंहीयम् ख्यातकृतयः सन्ति। डॉ. प्रभाकरशास्त्री (जगद्गुरु श्रीशङ्कराचार्यः, महाकविर्माघः, बिल्हणचरितम्) डॉ. देवशर्मा वेदालङ्कारः (अभिमन्यु-शौर्यम्, शरण्यः शिवि, दूतवाक्यम्, राज्याभिषेकः, सुरक्षा परिषदः अधिवेशनम्) डॉ. शिवसागर त्रिपाठी (प्राणाहुतिः), श्री पद्मशास्त्री (बांग्लादेश-विजयः, लोकतन्त्रविजयः) श्रीमेवराम कटारा (समर्पणम्, पथिकः, निष्क्रियः) डॉ. वैकुण्ठशास्त्री (हमीरोत्सर्गनाटकम्-इत्यादयः विद्वांसः प्रतिष्ठिताः सन्ति।

एतदतिरिक्तं वेद-ज्योतिष-दर्शनादिविधासु लेखनेऽपि कतिपये मूर्धन्याः विद्वांसः सन्ति येषां वर्णनं विना अस्मिन् विषये पूर्णता न सम्भवति। अतएव तेषां संक्षिप्तपरिचयः एवम् प्रस्तुतः अस्ति-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**(क) पं. मधुसूदनओझा –** भवतः जन्म बिहारराज्यस्य मुजफ्फरपुरजनपदस्य 'गाढा' नामके ग्रामे पण्डितवैद्यनाथओझागृहे अभवत्। प्रारम्भिकी शिक्षा तत्रैव अभवत्। उच्चशिक्षा वाराणस्याम् अभवत्। भवतः कर्मस्थली राजस्थानम् अस्ति। भवतः वैदुष्येण प्रभावितो भूत्वा जयपुरनरेशद्वारा भवान् महाराजा संस्कृतमहाविद्यालये दर्शनविषयस्य प्राध्यापकपदे नियुक्तः। तत्कालीनशासकेन माधवसिंहेन स्वपोथीखाना इत्यस्य पुस्तकालयस्य प्रबन्धकः अपि नियुक्तः। भवता 'मौज मन्दिरः' इति शासकीयधर्मसभायाः अध्यक्षपदं सुशोभितम्।

भवता अनेके योग्यशिष्या निर्मिताः, येषु–महामहोपाध्यायाः पं. गिरिधरशर्मा चतुर्वेदाः, आर्यसूर्यनारायणशास्त्रिणः, पण्डितमोतीलालशास्त्रिणः, भट्टमथुरा–नाथशास्त्रिणः, स्वामीसुरजनदासाः, पण्डिताः नवलकिशोरकाङ्कराश्च उल्लेखनीयाः सन्ति।

भवान् वैदिकवाङ्मयस्य भारतीयधर्मदर्शनयोः च अद्वितीयः विद्वान् आसीत् भवता 'वैदिककोषः' नामकः ग्रन्थः निर्मितः यत्र वैदिकशब्दाः सङ्कलिताः सन्ति।

भवता विरचितेषु ग्रन्थेषु–इन्द्रविजयः, कादम्बिनी, अहोरात्रवादः, महर्षिकुलवैभवम्, आशोचपञ्जिका, पथ्यास्वस्तिः, श्रीमद्भगवद्गीतायाः विज्ञानभाष्यम्–आदयः ग्रन्थाः महत्त्वपूर्णाः सन्ति, यैः भवतः यशांसि इदानीमपि दिग्दिगन्ते प्रसारितानि सन्ति।

**(ख) महामहोपाध्यायः पं. दुर्गाप्रसादद्विवेदी –** भवान् ज्योतिषशास्त्रस्य प्रख्यातः विद्वान् अस्ति। भवतः पिता जयपुरराज्ञा सवाई रामसिंहेन जयपुरे ससम्मानेन आमंत्रितः। पण्डितदुर्गाप्रसादद्विवेदिनः जन्म १९२० संवत्सरे श्रावणमासस्य कृष्णपक्षे चतुर्दश्यां तिथौ सरयूप्रसाद द्विवेदी गृहे अभवत्।

भवतः प्रारम्भिकी शिक्षा स्वपितुः समीपे जयपुरे एव अभवत्। ज्योतिषशास्त्रं अध्येतुं भवान् वाराणसीं गत्वा निष्ठया अध्ययनं कृतवान् वैदुष्यं च प्राप्तवान्। वाराणसीतः निवर्त्य महाराजा संस्कृतमहाविद्यालये ज्योतिषविषयस्य प्राध्यापकः नियुक्तः पश्चात् विभागाध्यक्षः अभवत्। १९२५ ईसवीये वर्षे इतः सेवानिवृत्तः। स्वसेवानिवृत्तेः पश्चात् १९३२ ईसवीयवर्षे भवता 'सरस्वतीपीठ' नाम्ना प्राच्यशोधसंस्थानम् स्थापितम्।

भवता भास्कराचार्यस्य 'सिद्धान्त–शिरोमणौ' गणिताध्यायं आधारीकृत्य छात्राणां कृते ग्रहगणित–सिद्धान्तानां विवेचनम् कृतम्।

भवता निर्मितेषु ग्रन्थेषु–देवराजचरितम् साहित्यदर्पणमस्य टीका, चातुर्वर्ण्यशिक्षा, उपपत्तीन्दुशेखरः, दशकण्ठवधम्– आदयः प्रमुखा सन्ति।

**(ग) पं. दुर्गाप्रसादशर्मा –** पण्डित दुर्गाप्रसादशर्मणः जन्म काश्मीरनरेशस्य राजसभायाः पण्डित–ब्रजलालशर्मणः पुत्ररूपेण अभवत्। भवता प्रारम्भिकी शिक्षा पण्डितदेवकृष्णसकाशे प्राप्ता। राजकुमारेण प्रतापसिंहेन सह आंग्लभाषायां कुशलताधिगता। १६ वर्षस्य अल्पावस्थायां स्वपितुः देहावसानात् खिन्नः भूत्वा भवान् जयपुरे आगतः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

जयपुरागमनानन्तरं भवता उत्तरखण्डस्य यात्रा कृता। यात्रामध्ये नैकाः पाण्डुलिपयः अवलोकिताः, तासाम् सङ्कलनं सम्पादनं च कृतम्। भवता सम्पादितेषु ग्रन्थेषु-मुरारिलिखितं 'अनर्घराघवम्' शेषकृष्णरचितं 'पारिजातहरणचम्पूः', बिल्हणविरचितं 'कर्णसुन्दरी' तथा च निर्णयसागरयन्त्रालयतः प्रकाशितेषु सम्पादितेषु ग्रन्थेषु-सुभाषितावलिः कथासरित्सागरः, कामसूत्रम् इत्यादयः विशेषरूपेण उल्लेखनीयाः सन्ति।

भवतः वैदुष्यमभिलक्ष्य भारतसर्वकारेण १९०७ ईसवीये वर्षे 'महामहोपाध्यायः' इत्युपाधिना विभूषयितुं निर्णीतम्, परं तु एतस्मात् पूर्वमेव भवतः जयपुरे निधनं जातम्। अतएव मरणोपरान्तं इयं उपाधिः सर्वकारेण प्रदत्ता भवन्तम्।

उपर्युक्तेभ्यः विद्वद्भ्यः अतिरिक्तं राजस्थाने विदुषां एका दीर्घा-शृङ्खला अस्ति। अस्याम् शृङ्खलायां-जयपुरीयः श्रीहरिनारायण शास्त्री (रामचन्द्रस्तवः, ललितसहस्रनाम-काव्यम्, संजीवनी-साम्राज्यम्), जोधपुरीयः आशुकविः पण्डितनित्यानन्द शास्त्री (मारुति-स्वतः, रामचरिताब्धिरत्नम्, पुष्पचरितम्), झालावाड़ीय पण्डितः गिरिधर शर्मा नवरत्नः (श्रीबालकृष्णस्तवः, श्रीगङ्गास्तवः जापानविजयः, अभेदरसः, काकरत्नम्) उदयपुरीयः पण्डित गिरिधरलालशास्त्री (भागवतरहस्यम्, श्रीकृष्णचरितम्, मेदपाटेतिहासः) पं. श्रीराम दवे (साकेतसंगरम्, राजलक्ष्मी स्वयंवरम्, भृत्याभरणम) आदयः विद्वांसः अग्रगण्याः प्रातः स्मरणीयाः च सन्ति।

उपर्युक्तविवेचनैः इदं ज्ञायते यत् वर्तमानकाले अपि राजस्थानप्रान्ते संस्कृतवाङ्मये विविधविधासु लेखनकार्यम् अनवरतरूपेण गतिमानम् अस्ति।

**महत्त्वपूर्णबिन्दवः**

१. संस्कृतसाहित्यस्य भेदद्वयमस्ति-वैदिकं लौकिकञ्च।

२. ऋग्वेदः न केवलं संस्कृतसाहित्यस्य अपितु विश्वसाहित्यस्य प्राचीनतमग्रन्थः अस्ति।

३. प्रधानतया वेदः द्विधा विभक्तः अस्ति-मन्त्ररूपः ब्राह्मणरूपश्च

४. प्राचीनभारतीयविद्वद्भिः स्वीकृतं यत् वेदाः अपौरुषेयाः सन्ति।

५. वैदिकसाहित्ये-संहिता-ब्राह्मण-आरण्यक-उपनिषद्-इत्यादीनि सन्ति।

६. लौकिकसाहित्यं द्विधा विभक्तमस्ति-दृश्यं श्रव्यं च।

७. दृश्यं नाट्यसाहित्यम्।

८. श्रव्यसाहित्यमपि त्रिधा-विभक्तम् अस्ति- पद्यं, गद्यं चम्पूश्च।

९. पद्यशास्त्रमिव नाट्यशास्त्रं महत्त्वपूर्णमस्तिः।

१०. तेषु बहुमूल्यजीवनोपयोगी शिक्षा प्रदत्ता।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. ईश्वरविलासस्य रचनाकारः अस्ति–
(क) श्रीसीतारामभट्ट पर्वणीकरः (ख) श्रीकृष्णरामभट्टः
(ग) श्रीसूर्यनारायणशास्त्री (घ) पण्डितविद्याधरशास्त्री ( )

२. 'कृष्णदूतम्' नामकं काव्यस्य प्रणेता अस्ति–
(क) श्रीसूर्यनारायणशास्त्री (ख) पण्डितः विद्याधरशास्त्री
(ग) श्रीपद्मदत्त ओझा (घ) गोस्वामी हरिरायः ( )

३. 'लेनिनामृतम्' इत्यस्य महाकाव्यस्य रचनाकारः अस्ति
(क) श्रीपद्मदत्तओझा (ख) श्रीगोस्वामीहरिरायः
(ग) श्रीसूर्यनारायणशास्त्री (घ) देवर्षिकलानाथशास्त्री ( )

४. 'महारथी' इत्यस्य काव्यस्य रचनाकारः अस्ति–
(क) डॉ. रसिकबिहारी जोशी (ख) पण्डितगुलाबचन्द्र चूलेट
(ग) भट्टमथुरानाथशास्त्री (घ) पण्डितविद्याधरशास्त्री ( )

५. 'चन्द्रमहीपतिः' उपन्यासः लिखितः अस्ति–
(क) श्रीनिवासाचार्येण (ख) पण्डितनवकिशोरशास्त्रिणा
(ग) श्रीनारायणशास्त्रिणा (घ) डॉ. प्रभाकरशास्त्रिणा ( )

६. भट्टमथुरानाथशास्त्रिणा प्रणीतः उपन्यासः अस्ति–
(क) चन्द्रमहीपतिः (ख) यात्राविलासमृ
(ग) आदर्शरमणी (घ) जीवनस्य पृष्ठद्वयम् ( )

७. 'महाभिनिष्क्रमणम्' नाट्यरचना अस्ति–
(क) देवर्षेः कलानाथशास्त्रिणः (ख) पं. देवशर्मा वेदालङ्कारस्य
(ग) डॉ. शिवसागरत्रिपाठिनः (घ) श्रीपद्मशास्त्रिणः ( )

८. 'जगद्गुरु श्रीशङ्कराचार्यः' विरचितम् अस्ति–
(क) श्रीभट्टमथुरानाथशास्त्रिणा (ख) देवर्षिकलानाथशास्त्रिणा
(ग) श्री प्रभाकरशास्त्रिणा (घ) डॉ. बैकुण्ठशास्त्रिणा ( )

९. 'इन्द्रविजयम्' इत्यस्य प्रसिद्धः वैदिक विद्वान् अस्ति–
(क) पं. दुर्गाप्रसादद्विवेदी (ख) पं. मधुसूदन ओझा
(ग) पं. दुर्गाप्रसाद शर्मा (घ) पं. वृद्धिचन्दशास्त्री ( )

### उत्तरमाला – वस्तुनिष्ठप्रश्नाः

१.क २.क ३.क ४.ख ५.क ६.ग ७.क ८.ग ९.ख

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# चतुर्थः खण्डः

## व्याकरणम्

व्याकरणसम्प्रदाये वैयाकरणानामेका सुदीर्घा परम्परा वर्तते। तत्र पाणिनिः कात्यायनः पतञ्जलिः प्रमुखाः आचार्याः सन्ति अतएव परम्परायामेते 'मुनित्रय' नाम्ना प्रथिताः सन्ति। एषु पाणिनि : सूत्रकारः, कात्यायनः वार्तिककारः, पतञ्जलिश्च भाष्यकारः अस्ति। सूत्रस्य परिभाषा विषये प्रसिद्धोऽयं श्लोकः –

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।**
**अस्तोभमनवद्यं च, सूत्रं सूत्रविदो विदुः।।**

भगवतः शिवस्य प्रसादात् पाणिनिः यानि चतुर्दशसूत्राणि अधिगतवान् तानि माहेश्वरसूत्रनाम्ना प्रसिद्धानि सन्ति। तानि च – १. अइउण् २. ऋलृक् ३. एओङ् ४. ऐऔच् ५. हयवरट् ६. लण् ७. ञमङणनम् ८. झभञ् ९. घढधष् १०. जबगडदश् ११. खफछठथचटतव् १२. कपय् १३. शषसर् १४. हल्।

इमानि सूत्राणि एव अष्टाध्यायी नाम्ना प्रसिद्धस्य पाणिनीयव्याकरणस्य आधारभूतानि सन्ति। एषां सूत्राणामन्ते विद्यमानानां ण् क् ङ् च् ...... इत्यादीनां वर्णानां इत्संज्ञया लोपः भवति। एतेषां लोपस्य मुख्यं प्रयोजनमस्ति- प्रत्याहारसिद्धिः। प्रत्याहारशब्दस्य अर्थः अस्ति – वर्णानां संक्षिप्तीकरणम्। प्रत्याहाराः ४४ भवन्ति ते च –

| | | |
|---|---|---|
| १. | अण् | अ, इ, उ |
| २. | अक् | अ, इ, उ, ऋ, लृ |
| ३. | इक् | इ, उ, ऋ, लृ |
| ४. | उक् | उ, ऋ, लृ |
| ५. | एङ् | ए, ओ |
| ६. | अच् | सर्वे स्वराः |
| ७. | इच् | इ, उ, ऋ, लृ, ए, ओ, ऐ, औ |
| ८. | एच् | ए, ओ, ऐ, औ |
| ९. | ऐच् | ऐ, औ |
| १०. | अट् | स्वराः, ह, अन्तःस्थ (य् व् र् ल्) |
| ११. | अण् | स्वराः, ह, अन्तःस्थ (य् व् र् ल्) |
| १२. | इण् | इ, उ, ऋ, लृ, ए, ओ, ऐ, औ, ह, य, व, र, ल |
| १३. | यण् | य् व् र् ल् |
| १४. | अम् | वर्गपञ्चमाः |
| १५. | यम् | अन्तःस्थ, वर्गपञ्चमाः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| १६. | ञम् | वर्गपञ्चमाः |
| १७. | ङम् | ङ्, ण्, न् |
| १८. | यञ् | अन्तःस्था, वर्गपञ्चमाः |
| १९. | झष् | झ् भ् घ् ढ् ध् |
| २०. | भष् | भ् घ् ढ् ध् |
| २१. | अश् | स्वराः, ह, अन्तःस्थाः, वर्गाणां तृतीय-चतुर्थ-पञ्चमाः |
| २२. | हश् | हः, अन्तःस्थाः, वर्गाणां तृतीय-चतुर्थ-पञ्चमाः |
| २३. | वश् | व् र् ल् , वर्गाणां तृतीय-चतुर्थ-पञ्चमाः |
| २४. | जश् | ज् ब् ग् ड् द् |
| २५. | झश् | वर्गाणां तृतीयचतुर्थौ |
| २६. | बश् | ब् ग् ड् द् |
| २७. | छव् | छ् ठ् थ् च् ट् त् |
| २८. | यय् | अन्तःस्थाः, सर्वे वर्गाः |
| २९. | मय् | म्, ङ्, ण्, न्, झ्, भ् ,घ्, ढ्, ध्,ज्, ब्, ग्, ड्, द्, ख्, फ् छ् ठ् थ्,च् ,ट्, त् ,क्, प् |
| ३०. | झय् | वर्गाणां प्रथमद्वितीयतृतीयचतुर्थाः |
| ३१. | खय् | वर्गाणां प्रथमद्वितीयौ |
| ३२. | चय् | वर्गाणां प्रथमवर्णाः |
| ३३. | यर् | अन्तःस्थाः, सर्वे वर्गाः, श्, ष्, स् |
| ३४. | झर् | वर्गाणां प्रथमद्वितीयतृतीयचतुर्थाः |
| ३५. | खर् | वर्गाणां प्रथमद्वितीयौ, श्, ष्, स् |
| ३६. | चर् | वर्गानां प्रथमः, श्, ष्, स् |
| ३७. | शर् | श्, ष्, स् |
| ३८. | अल् | स्वराः व्यञ्जनानि च |
| ३९. | हल् | व्यञ्जनानि |
| ४०. | वल् | य् वर्णं विहाय अन्यानि सर्वाणि व्यञ्जनानि |
| ४१. | रल् | य्, व् विहाय अन्यानि सर्वाणि व्यञ्जनानि |
| ४२. | झल् | वर्गाणां प्रथमद्वितीयतृतीयचतुर्थाः, श्, ष्, स्, ह |
| ४३. | शल् | श्, ष्, स्, ह |
| ४४. | रँ | र्, ल् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एतन्निर्देश: सन्धिप्रकरणावबोधाय आवश्यकेति धिया अस्य अत्र व्यवस्थापनं कृतम्। एवमेव वाक्यरचनायां वाग्व्यवहारे च कारकस्य महत्त्वपूर्णं योगदानं भवति। सन्धिज्ञानानन्तरमेव वाक्यनिर्मितिः भवतीति सन्ध्यनन्तरं समासप्रकरणं तदनन्तरं कारकप्रकरणप्रतिपादितमस्ति।

## ( क ) सन्धिप्रकरणम्–

**सन्धिशब्दस्यव्युत्पत्तिः** – सम् उपसर्गपूर्वकात् डुधाञ् (धा) धातोः ''उपसर्गे धोः किः'' इति सूत्रेण कि प्रत्यये कृते सन्धिरिति शब्दो निष्पद्यते।

**सन्धिशब्दस्य परिभाषा**– वर्णसन्धानं सन्धिः अर्थात् द्वयोः वर्णयोः परस्परं यत् सन्धानं मेलनं वा भवति तत्सन्धिरिति कथ्यते।

**पाणिनीयपरिभाषा**– ''परः सन्निकर्षः संहिता'' अर्थात् वर्णानाम् अत्यन्तनिकटता संहिता'' इति कथ्यते। यथा– सुधी+उपास्यः इत्यत्र ईकार–उकारवर्णयोः अत्यन्तनिकटता अस्ति। एतादृशी वर्णनिकटता एव संस्कृतव्याकरणे संहिता इति कथ्यते। संहितायाः विषये एव सन्धिकार्ये सति सुध्युपास्यः इति शब्दसिद्धिर्जायते।

**सन्धिभेदा**– संस्कृतव्याकरणे: त्रयो सन्धिभेदाः। ते इत्थं सन्ति–

**( १ ) अच् सन्धिः ( स्वरसन्धिः )** – द्वयोः स्वरयोः मध्ये यत् मेलनं सन्धानं वा जायते, तत् कथ्यते स्वरसन्धिः अर्थात् अच्सन्धिः इति।

**( २ ) हल् सन्धिः ( व्यंजनसन्धिः )** – द्वयोः व्यंजनयोः मध्ये यत् मेलनं सन्धानं परिवर्तनं वा जायते, तत् कथ्यते व्यंजनसन्धिः अर्थात् हल्सन्धिः इति।

**( ३ ) विसर्गसन्धिः** – विसर्गस्य कारणेन यत्र सन्धानं मेलनंपरिवर्तनं वा भवति, तत् कथ्यते विसर्गसन्धिः इति।

सन्धियुक्तशब्दानां पुनः विच्छेदनं पृथक्करणं वा कथ्यते सन्धिविच्छेदः इति। स्वरसन्धेः अथवा अच् सन्धेः अनेके प्रकाराः भवन्ति। तेषु महत्त्वपूर्णाः इत्थं भवन्ति –

### ( १ ) अच् सन्धिः

**१.'इकोयणचि' ( पा. सू. ६. १. ७५ )** – इत्यनेन सूत्रेण संहितायाः विषये अचि परे सति पूर्ववर्तिनः इकः स्थाने स्याद् यण्। माहेश्वरसूत्रानुरूपं इ/ई, उ/ऊ, ऋ/ॠ,लृ एते वर्णाः इक् वर्णाः इति कथ्यन्ते। एवमेव य, व, र, ल एते वर्णाः यण् वर्णाः इति कथ्यन्ते। उपरिलिखितानाम् इक्वर्णानां स्थाने अधोलिखिताः यण् वर्णाः यत्र क्रमशः भवन्ति, तत्र जायते यण् सन्धिः। क्रमशः 'तस्मिन्निति निर्दिष्टे पूर्वस्य', 'स्थानेऽन्तरतमः', 'अनचि च', 'झलां जश् झशि', 'संयोगान्तस्य लोपः', 'अलोऽन्त्यस्य', 'यणः प्रतिषेधो वाच्यः' इति एभिः सूत्रैः उदाहरणानि निर्मितानि भवन्ति–

| | | | | |
|---|---|---|---|---|
| मधु | + | अरि | = | मद्ध्वरिः, मध्वरिः |
| सुधी | + | उपास्य | = | सुद्ध्युपास्यः, सुध्युपास्यः |
| लृ | + | आकृतिः | = | लाकृतिः |
| धातृ | + | अंशः | = | धात्त्रंशः, धात्रंशः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### २. एचोऽयवायावः ( पा. सू. ६. १. ७५ ) –

एचः क्रमात् अय् अव् आय् आव् एते स्युः अचि। अर्थात् एच् (ए ओ ऐ औ) वर्णस्य पश्चात् अच् वर्णः दृश्यते तदा एच् इत्यस्य स्थाने क्रमशः अय् अव् आय् आव् आदेशाः भवन्ति। माहेश्वरसूत्रानुरूपं क्रमशः ए, ओ, ऐ, औ इति वर्णाः 'एच्' इति कथ्यन्ते। उदाहरणपुष्ट्यर्थम् अग्रिमसूत्रप्रवृत्तिः भवति–

### ३. यथासंख्यमनुदेशः समानाम् ( पा. सू. १. ३. १० ) –

समसम्बन्धी विधिः यथासंख्यं स्यात्। यत्र स्थानिनः आदेशस्य च संख्या समाना भवति तत्र कार्यविधानं संख्यानुसारमेव भवति। उदाहरणम् –

| | | | | | |
|---|---|---|---|---|---|
| हरये | = | हरे | + | ए | (हर् अय् ए) |
| विष्णवे | = | विष्णो | + | ए | (विष्ण् अव् ए) |
| नायकः | = | नै | + | अकः | (न् आय् अकः) |
| पावकः | = | पौ | + | अकः | (प् आव् अकः) |

### ४. वान्तो यि प्रत्यये ( पा. सू. ६. १. ७६ ) –

अयादिसन्धिसूत्रानुसारेण यकारादौ प्रत्यये परे ओदौतोः अव आव एतौ स्तः अर्थात् ओकारस्य–औकारयो स्थाने क्रमशः अव् आव् आदेशौ भवतः यदि कश्चित् यकारादिः प्रत्ययः पश्चात् भवति। यथा –

| | | | | | |
|---|---|---|---|---|---|
| गव्यम् | = | गो | + | यम् | (ग् अव् यम्) |
| नाव्यम् | = | नौ | + | यम् | (न् आव् यम्) |

### ५. अध्वपरिमाणे च ( वार्तिक ) –

मार्गस्य परिमाणे गम्यमाने (गम्यमाने) सति ओकारस्य स्थाने वान्तः (अव्) आदेशः भवति। यथा –

| | | | | | |
|---|---|---|---|---|---|
| गव्यूतिः | = | गो | + | यूतिः | (ग् अव् यूतिः) |

गव्यूतिः (क्रोशद्वयम्) इत्यत्र मार्गपरिणामस्य ज्ञानं भवति अतएव 'गो' इत्यस्य स्थाने अवादेशः।

### ६. अदेङ् गुणः ( पा. सू. १. १. २ )–

अत् एङ् च गुणसंज्ञः स्यात्। अर्थात् अ, ए, ओ एते वर्णाः गुणसंज्ञकाः भवन्ति।

### ७. तपरस्तत्कालस्य ( पा. सू. १. १. ६९ ) –

तः परो यस्मात् स चतात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्। अर्थात् यस्मात् वर्णात् परः तकारः अस्ति तथा च तकारात् परः यः वर्णः अस्ति सः स्वकाल (मात्रा) सदृशकालस्य बोधकः भवति। यथा– अदेङ् गुणः इत्यत्र अ ए ओ इति वर्णत्रयम् अस्ति अत्र च –

अ.......षण्णां ह्रस्व–अकाराणां बोधकः

ए.......षण्णां ह्रस्व–अकाराणां बोधकः

ओ.......षण्णां ह्रस्व–अकाराणां बोधकः

### ८. आद् गुणः ( पा. सू. ६. १. ८४ ) –

अवर्णात् अचि परे पूर्वपरयोरेको गुणादेशः स्यात्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अर्थात् अकारस्य पश्चात् अच् (स्वरः) वर्णः भवति तदा पूर्वपरयोः द्वयोः वर्णयोः स्थाने एकः गुणः (अ, ए, ओ) आदेशः भवति। यथा–

| | | | | | |
|---|---|---|---|---|---|
| उप | + | इन्द्रः | = | उपेन्द्रः | (अ + इ = ए) |
| महा | + | इन्द्रः | = | महेन्द्रः | (आ + इ = ए) |
| पर | + | उपकारः | = | परोपकारः | (अ + उ = ओ) |
| हित | + | उपदेशः | = | हितोपदेशः | (अ + उ = ओ) |
| गङ्गा | + | उदकम् | = | गङ्गोदकम् | (अ + उ = ओ) |
| गगन | + | ऊर्ध्वम् | = | गगनोर्ध्वम् | (अ + ऊ = ओ) |
| महा | + | ऊर्णम् | = | महोर्णम् | (अ + ऊ = ओ) |

### ९. उपदेशेऽजनुनासिक इत् (पा. सू. १.३.२) –

उपदेशे अनुनासिकः अच् इत्संज्ञः स्यात्। प्रतिज्ञानुनासिक्याः पाणिनीयाः। लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा। पूर्वकाले अनुनासिकस्वरस्य ज्ञानं ( ँ ) चिह्नेन भवति स्म। सम्प्रति एवंविधः पाठः न उपलभ्यते। फलतः इयं व्यवस्था अस्ति यत् स्वरवर्णानां इत्संज्ञां कर्तुं तेषां अनुनासिकरूपेण प्रतिज्ञा भवति। लण् सूत्रे यः लकारस्थः अकारः अस्ति तस्य इत्संज्ञायां **'र'** प्रत्याहारसिद्धिः भवति। एतेन **'र'** इत्यनेन 'र् ल्' इत्यनयोः ग्रहणं भवति।

### १०. उरण्रपरः (पा. सू. १.१.५०) –

ऋ इति त्रिंशतः संज्ञा इत्युक्तम्, तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते। ऋवर्णः अष्टादश लृवर्णश्च द्वादश। ऋ लृ इत्यनयोः सवर्णसंज्ञा भवति अतएव द्वयो स्वरवर्णयोः संख्यामेलनेन त्रिंशत् संख्या भवति। इत्थं **'ऋ'** इत्यस्य वर्णस्य स्थाने यः अण् (अ इ उ) स रपर एव भवति। एवमेव **'लृ'** इत्यस्य वर्णस्य स्थाने यः अण् स लपरः भवति। यथा– अर् अल् आर् आल् इर् इल् उल्। उदाहरणम् –

**कृष्ण + ऋद्धिः = कृष्णर्द्धिः** – अत्र णकारे अकारः तदनन्तरं च ऋकारः। अतः **'आद् गुणः'** इति सूत्रेण अकारऋकारयोः स्थाने **'अ'** गुणः **उरण् रपरः** इत्यनेन रपरः (अर्) **कृष्णर्द्धिः** रूपं सिद्धयति।

**तव + लृकारः = तवल्कारः** अत्र वकारे अकारः तदनन्तरं च लृकारः। अतः **'आद् गुणः'** इति सूत्रेण अकारलृकारयोः स्थाने **'अ'** गुणः **उरण् रपरः** इत्यनेन लपरः (अल्) **तवल्कारः** रूपं सिद्धयति।

| | | | | | | |
|---|---|---|---|---|---|---|
| एवमेव – | देव | + | ऋषिः | = | देवर्षिः | (अ + ऋ = अर्) |
| | महा | + | ऋषिः | = | महर्षिः | (आ + ऋ = अर्) |

### ११. वृद्धिरादैच् (पा. सू. १.१.१) –

आत् ऐच्च वृद्धिसंज्ञः स्यात्। पाणिनीयव्याकरणस्य इदं सर्वप्रथमं सूत्रम्। सूत्रानुसारेण **'आ ऐ औ'** इति एषां त्रयाणां स्वरवर्णानां वृद्धिसंज्ञा भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### १२. वृद्धिरेचि ( पा. सू. ६. १. ८५ ) –

आतः एचि परे वृद्धिरेकादेशः स्यात्। संहिताविषये अ/आ वर्णतः परे 'एच्' (ए, ओ, ऐ औ) विद्यमाने पूर्वपरयोः स्थाने वृद्धिरेकादेशः भवति। उदाहरणानि –

| | | | | |
|---|---|---|---|---|
| कृष्ण | + | एकत्वम् | = | कृष्णैकत्वम् |
| देव | + | ऐश्वर्यम् | = | देवैश्वर्यम् |
| कृष्ण | + | औत्कण्ठ्यम् | = | कृष्णौत्कण्ठ्यम् |
| गङ्गा | + | ओघः | = | गङ्गौघः |
| महा | + | औषधिः | = | महौषधिः |

### १३. एत्येधत्यूठ्सु ( पा. सू. ६. १. ८६ ) –

अवणदिजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः स्यात्। अर्थात् यदि **'अ'** वर्णानन्तरं एजादिः धातुः यथा एति, एधति अथवा ऊठ् शब्दः भवति तदा पूर्वपरयोः उभयोः वर्णयोः स्थाने वृद्धिरूपः एकादेशः भवति। सूत्रमिदम् **'एङि पररूपम्'** **'आद्गुणः'** इत्यनयोः सूत्रयोः बाधकम् अस्ति। उदाहरणम् –

| | | | | |
|---|---|---|---|---|
| उप | + | एति | = | उपैति |
| उप | + | एधते | = | उपैधते |
| प्रष्ठ | + | ऊहः | = | प्रष्ठौहः |

**विशेषः** – अत्र अकारानन्तरम् एजादि धातोः ए , ऊ स्तः अतः 'एङि पररूपम्' इत्यनेन प्राप्तं पररूपं 'आद्गुणः' इत्यनेन प्राप्तं गुणं च: बाधित्वा अकार-एकारयोः वर्णयोः स्थाने अनेन सूत्रेण वृद्धिरूपः एकादेशः अस्ति।

### १४. अक्षादूहिन्यामुपसंख्यानम् ( वार्तिक ) –

अक्षशब्दात् परे ऊहिनी शब्दः भवति तदा अकार ऊकारयोः स्थाने वृद्धिरूपः एकादेशः भवति।

यथा– अक्ष + ऊहिनी = अक्षौहिणी (सेना)

अत्र अकार-ऊकारयोः द्वयोः वर्णयोः स्थाने प्राप्तं गुणं बाधित्वा वृद्धिरूपः एकादेशः अस्ति।

### १५. प्रादूहोढोढ्येषैष्येषु ( वार्तिक ) –

प्र उपसर्गात् परे ऊहः, ऊढः, ऊढिः, एषः, एष्यः भवति तदा पूर्वपरयोः उभयोः वर्णयोः स्थाने वृद्धिरूपः एकादेशः भवति। सूत्रमिदम् 'वृद्धिरेचि' 'आद्गुणः' इत्यनयोः सूत्रयोः बाधकम् अस्ति। यथा –

| | | | | | |
|---|---|---|---|---|---|
| प्र | + | ऊहः | = | प्रौहः | (अ + ऊ = औ) |
| प्र | + | ऊढिः | = | प्रौढिः | (अ + ऊ = औ) |
| प्र | + | एषः | = | प्रैषः | (अ + ए = ऐ) |
| प्र | + | एष्यः | = | प्रैष्यः | (अ + ए = ऐ) |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### १६. एङि पररूपम् ( पा. सू. ६. १. ९१ ) –

अकारान्तात् उपसर्गात् परे धातोः आदौ एङ् (ए ओ)वर्णः भवति तर्हि तयोः पूर्वपरयोः द्वयोः वर्णयोः स्थाने पररूपमेकादेशः भवति। अत्र वृद्धिसन्धेः अपवादः। यथा –

| | | | | | |
|---|---|---|---|---|---|
| प्र | + | एजते | = | प्रेजते | (अ + ए = ए पररूपम्) |
| उप | + | ओषति | = | उपोषति | (अ + ओ = ओ पररूपम्) |

### १७. शकन्ध्वादिषु पररूपं वाच्यम् ( वार्तिक ) –

शकन्ध्वादिगणे ये शब्दाः पठिताः सन्ति तेषु टिसंज्ञकस्य अचः च स्थाने पररूपं वक्तव्यम् इत्यर्थः।

| | | | | | |
|---|---|---|---|---|---|
| यथा – | शक | + | अन्धुः | = | शकन्धुः |
| | कर्क | + | अन्धुः | = | कर्कन्धुः |
| | मृत | + | अण्डः | = | मार्तण्डः |

**विशेषः** – अत्र अकः 'सवर्णे दीर्घः' इति सूत्रेण प्राप्तं सवर्णदीर्घं बाधित्वा अनेन वार्तिकेन पररूपं।

### १८. अकः सवर्णे दीर्घः ( पा. सू. ६. १. ९७ ) – 'अच्' प्रत्याहारस्य परे सवर्णे अचि सति पूर्वपरयोः स्थाने दीर्घ–एकादेशः भवति। अत्र क्रमशः एतेषां स्थितिः उदाहरणानि च प्रस्तूयन्ते –

| | | | | | |
|---|---|---|---|---|---|
| दैत्य | + | अरिः | = | दैत्यारिः | (अ + अ = आ) |
| श्री | + | ईशः | = | श्रीशः | (अ + ई = ओ) |
| विष्णु | + | उदयः | = | विष्णूदयः | (उ + उ = ऊ) |
| भानु | + | ऊष्मा | = | भानूष्मा | (उ + ऊ = ऊ) |
| गुरु | + | उपदेशः | = | गुरूपदेशः | (उ + उ = ऊ) |
| होतृ | + | ऋकारः | = | होतृकारः | (ऋ + ऋ = ॠ) |
| पितृ | + | ऋणम् | = | पितृणम् | (ऋ + ऋ = ॠ) |

### १९. एङः पदान्तादति ( पा. सू. ६. १. १०५ ) –

पदान्तात् एङोऽति परे पूर्वरूपं एकादेशः स्यात्।

अर्थात् यदि पूर्वपदस्य अन्ते एङ् (ए ओ) उत्तरपदस्य प्रारम्भे च ह्रस्व अकारः भवति तदा पूर्वपरयोः वर्णयोः स्थाने पूर्वरूपं एकः आदेशः भवति। यथा –

| | | | | | |
|---|---|---|---|---|---|
| हरे | + | अव | = | हरेऽव | (ए + अ = पूर्वरूपम्) |
| विष्णो | + | अव | = | विष्णोऽव | (ओ + अ = पूर्वरूपम्) |

**विशेषः** – अत्र 'एङः पदान्तादति' सूत्रम् 'एचोऽयवायावः' इत्यस्य बाधकम् अस्ति। अत्र द्वयोः उदाहरणयोः **चम्पकपुष्पपुटकवास** न्यायेन 'ऽ' कृतः अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## (२) हलसन्धिः–

यदा व्यञ्जनात् परे व्यञ्जनं अथवा स्वरः आयाति तदा हल् सन्धिः भवति।

### २०. 'स्तो श्चुना श्चुः' (श्चुत्व सन्धिः) –

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः।

अर्थात् यदा स् त् थ् द् ध् न् इत्येते वर्णाः श् च् छ् ज् झ् ञ् इत्येतेषां वर्णानाम् पूर्वम् पश्चाद्वा आयान्ति तदा स् त् थ् द् ध् न् इत्येतेषां वर्णानां स्थाने क्रमशः श् च् छ् ज् झ् ञ् इत्येते वर्णाः भवन्ति। यथा –

| | | | | |
|---|---|---|---|---|
| सत् | + | चित् | = | सच्चित् |
| रामस् | + | चिनोति | = | रामश्चिनोति |
| हरिस् | + | शेते | = | हरिश्शेते |
| शार्ङ्गिन् | + | जयः | = | शार्ङ्गिञ्जय |
| रामस् | + | च | = | रामश्च |
| कस् | + | चित् | = | कश्चित् |
| उद् | + | ज्वलः | = | उज्ज्वलः |

### २१.'ष्टुना ष्टुः' (ष्टुत्व सन्धिः)–

स्तोः ष्टुना योगे ष्टुः स्यात्।

यदा स् त् थ् द् ध् न् इत्येते वर्णाः ष् ट् ठ् ड् ढ् ण् इत्येतेषां वर्णानाम् पूर्वं पश्चात् वा आयान्ति तदा स् त् थ् द् ध् न् इत्येतेषां वर्णानां स्थाने क्रमशः ष् ट् ठ् ड् ढ् ण् इत्येते वर्णाः भवन्ति। यथा –

| | | | | |
|---|---|---|---|---|
| तत् | + | टीका | = | तट्टीका |
| रामस् | + | षष्ठः | = | रामष्षष्ठः |
| रामस् | + | टीकते | = | रामष्टीकते |
| चक्रिन् | + | ढौकसे | = | चक्रिण्ढौकसे |
| पेष् | + | ता | = | पेष्टा |
| राष् | + | त्रम् | = | राष्ट्रम् |
| उद् | + | डयनम् | = | उड्डयनम् |
| इष् | + | तः | = | इष्टः |

### २२. 'झलां जशोऽन्ते' (जश्त्व सन्धिः) –

पदान्ते झलां जशः स्युः।

पदान्ते झल् प्रत्याहारान्तर्गतवर्णानां (वर्गस्य १, २, ३, ४ वर्णानां श् ष् स् ह् वर्णानां च) स्थाने जश् प्रत्याहारस्य (ज् ब् ग् ड् द्) वर्णाः भवन्ति। यथा –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | | |
|---|---|---|---|---|
| वाक् | + | ईश: | = | वागीश: |
| जगत् | + | ईश: | = | जगदीश: |
| षट् | + | आनन: | = | षडानन: |
| दिक् | + | अम्बर: | = | दिगम्बर: |
| अच् | + | अन्त: | = | अजन्त: |
| सुप् | + | अन्त: | = | सुबन्त: |
| षट् | + | दर्शनम् | = | षड्दर्शनम् |
| दिक् | + | गज: | = | दिग्गज: |

**२३. 'खरि च' (चर्त्व सन्धि:) –**

खरि परे झलां चर: स्यु:।

खरि (वर्गस्य १, २, श् ष् स्) परे झलां (वर्गस्य १, २, ३, ४, श् ष् स् ह) स्थाने च (क् च् ट् त् प् श् ष् स्) प्रत्याहारस्य वर्णा: भवन्ति। यथा –

| | | | | |
|---|---|---|---|---|
| सद् | + | कार: | = | सत्कार: |
| विपद् | + | काल: | = | विपत्काल: |
| सम्पत् | + | समय: | = | सम्पत्समय: |
| ककुप् | + | प्रान्त: | = | ककुप्प्रान्त: |
| उद् | + | पन्न: | = | उत्पन्न: |

**२५. 'मोऽनुस्वार:' (अनुस्वार सन्धि:) –**

मान्तस्य पदस्यानुस्वार: स्याद् हलि।

पदान्तस्य मकारस्य स्थाने अनुस्वार: आदेशो भवति हलि परत:। यथा –

| | | | | |
|---|---|---|---|---|
| हरिम् | + | वन्दे | = | हरिं वन्दे |
| गृहम् | + | गच्छति | = | गृहं गच्छति |
| दु:खम् | + | प्राप्नोति | = | दु:खं प्राप्नोति |
| त्वम् | + | पठसि | = | त्वं पठसि |
| अहम् | + | धावामि | = | अहं धावामि |
| सत्यम् | + | वद | = | सत्यं वद |

## (३) विसर्गसन्धि: –

यदा विसर्गस्य स्थाने किमपि परिवर्तनं भवति तदा स: विसर्गसन्धि: इति कथ्यते।

**२६. 'विसर्जनीयस्य स:' (सत्वसन्धि) –**

खरि परे विसर्जनीयस्य स: स्यात्।

विसर्गस्य स्थाने सकारो भवति खरि (वर्गस्य १,२ श, ष् स्) परत:। यथा –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | | |
|---|---|---|---|---|
| विष्णु: | + | त्राता | = | विष्णुस्त्राता |
| राम: | + | च | = | रामश्च |
| धनु: | + | टंकार | = | धनुष्टंकार: |
| नि: | + | छल: | = | निश्छल: |

### २७. 'वा शरि' –

शरि विसर्गस्य विसर्गो वा स्यात्।

विसर्गस्य स्थाने विकल्पेन विसर्गादेशो भवति शरि (श् ष् स्) परे। यथा –

| | | | | |
|---|---|---|---|---|
| हरि: | + | शेते | = | हरि: शेते (हरिश्शेते) |
| नि: | + | सन्देह: | = | नि:सन्देह (निस्सन्देह) |
| नृप: | + | षष्ठ: | = | नृप: षष्ठ: (नृपष्षष्ठ:) |

### २८. 'अतो रोरप्लुतादप्लुते' (उत्वसन्धि:) –

अप्लुतादत: परस्य रोरु: स्यादप्लुतेऽति।

ह्रस्वात् अकारात् उकारस्य रो: रेफस्य स्थाने उकारादेशो भवति ह्रस्वे अकारे परत:।

**विशेष:** – अ:+अ इति स्थिते विसर्गस्य स्थाने ओकारस्य मात्रा भवति अन्तिम अकारस्य च स्थाने अवग्रह: (ऽ) भवति। अर्थात् उत्वसन्धे: अनन्तरं गुणसन्धि: पररूपसन्धि: च भवत:। यथा –

| | | | | |
|---|---|---|---|---|
| क: | + | अपि | = | कोऽपि |
| राम: | + | अवदत् | = | रामोऽवदत् |
| राम: | + | अयम् | = | रामोऽयम् |

### २९. 'हशि च' (उत्वसन्धि:) –

अप्लुतादत: परस्य रोरु: स्यात् हशि।

ह्रस्वात् अकारात् उत्तरस्य रो: रेफस्य स्थाने उकारादेशो भवति हशि (वर्गस्य ३, ४, ह् य् व् ल्) परत:।

**विशेष:** – अ: + हश् (वर्गस्य ३, ४, ह् य् व् ल् इति स्थिते विसर्गस्य स्थाने ओकारस्य मात्रा भवति। अर्थात् उत्वसन्धे: अनन्तरं गुणसन्धि: भवति। यथा –

| | | | | |
|---|---|---|---|---|
| शिव: | + | वन्द्य: | = | शिवो वन्द्य: |
| राम: | + | हसति | = | रामो हसति |
| बुध: | + | लिखति | = | बुधो लिखति |
| बाल: | + | रोदिति | = | बालो रोदिति |
| नम: | + | नम: | = | नमो नम: |
| क्षीण: | + | भवति | = | क्षीणो भवति |
| मन: | + | हर: | = | मनोहर: |

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### (क) वस्तुनिष्ठप्रश्नाः-

(१) जश्त्वसन्धेः उदाहरणम् अस्ति –

(क) षण्मुखः (ख) सच्चित्

(ग) वागीशः (घ) मनोहरः ( )

(२) ष्टुत्व सन्धेः उदाहरणम् अस्ति –

(क) तट्टीका (ख) रामश्शेते

(ग) तन्मयः (घ) हरिं वन्दे ( )

(३) 'इतस्ततः' इति शब्दे सन्धिः अस्ति –

(क) व्यंजनसन्धिः (ख) अच्सन्धिः

(ग) विसर्गलोपसन्धिः (घ) विसर्गसन्धिः ( )

(४) 'शिवोऽर्च्यः' इति शब्दे सन्धिः अस्ति –

(क) ष्टुत्व सन्धिः (ख) चर्त्वसन्धिः

(ग) उत्वसन्धिः (घ) सत्वसन्धिः ( )

(५) अनुस्वारसन्धेः उदाहरणम् अस्ति–

(क) विद्वाँल्लिखति (ख) हरिं वन्दे

(ग) कश्चित् (घ) नमस्ते ( )

### (ख) निम्नलिखितपदेषु सन्धिविच्छेदः कर्तव्यः –

परमार्थः –

रामोऽपि –

वागीशः –

पावकः –

विष्णुस्त्राता –

महेशः –

सत्कारः –

### (ग) निम्नलिखितपदेषु सन्धिविच्छेदं कृत्वा सन्धेः नाम लेखनीयम् –

| पदम् | सन्धि विच्छेदः | सन्धेः नाम |
|---|---|---|
| दिगम्बरः | ......................... | ..................... |
| शत्रूञ्जयति | ........................... | ...................... |
| धर्मं चर | ........................... | ...................... |
| सुबन्तः | ........................... | ...................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| परीक्षोत्सवः | ........................... | ...................... |
| पवित्रः | .......................... | ...................... |
| कोऽपि | ........................... | ...................... |
| सुध्युपास्यः | ........................... | ...................... |
| प्रष्ठौहः | ........................... | ...................... |
| अभ्युपैति | ........................... | ....................... |

**( घ ) अधोलिखितपदेषु सन्धिकार्यं कुरुत –**

| | | |
|---|---|---|
| उत् + चारणम् | – | ..................................... |
| धनुः + टंकारः | – | ..................................... |
| मनः + तापः | – | ..................................... |
| अनु + अयः | – | ..................................... |
| राज + ऋषिः | – | ..................................... |
| लोको + अयम् | – | ..................................... |
| गो + एषणा | – | ..................................... |

**( ङ) 'क' खण्डं 'ख' खण्डेन सह योजयत।**

| 'क' खण्डः | 'ख' खण्डः |
|---|---|
| श्चुत्वसन्धिः | तत्फलम् |
| चर्त्वसन्धिः | नमो नमः |
| उत्वसन्धिः | एतज्जलम् |
| जश्त्वसन्धिः | सत्यं वद |
| अनुस्वारसन्धिः | चिदानन्द |
| अयादिसन्धिः | लोकैषणा |
| पररूपसन्धिः | भवति |
| वृद्धिसन्धिः | उपोषति |

**उत्तरमाला– वस्तुनिष्ठप्रश्नाः**

(१) ग (२) क (३) घ (४) ग (५) ख

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ( ख ) समासप्रकरणम् –

समसनं समासः अथवा अनेकपदानाम् एकपदीभवनं समासः अर्थात् यदा अनेकपदानि मिलित्वा एकपदं जायन्ते तदा सः समासः इति कथ्यते। सम् उपसर्गपूर्वकात् अस् धातोः घञि प्रत्यये कृते 'समासः' इति शब्दो निष्पद्यते। समासशब्दस्य अर्थः संक्षिप्तीकरणमिति अस्ति।

समासः पञ्चधा। विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः। प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः समासः। प्रायेण उत्तरपदार्थप्रधानस्तत्पुरुषः तृतीयः समासः। तत्पुरुषभेदः कर्मधारयः। कर्मधारयभेदो द्विगुः। प्रायेण–अन्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः समासः। प्रायेण–उभयपदार्थप्रधानः द्वन्द्वः समासः पञ्चमः। एवं समासः पञ्चधाः।

### ( १ ) केवलसमासः –

| | | |
|---|---|---|
| पूर्वं भूतः | = | भूतपूर्वः |
| वागर्थौ इव | = | वागर्थाविव |

### ( २ ) अव्ययीभावसमासः

यदा विभक्ति–इत्यादिषु अर्थेषु वर्तमानम् अव्ययं पदं सुबन्तेन सह नित्यं समस्यते तदा असौ अव्ययीभावसमासो भवति। अथवा इदमत्र अवगन्तव्यम् –

(क) अस्य समासस्य प्रथमशब्दः अव्ययं द्वितीयश्च संज्ञाशब्दो भवति।

(ख) अव्ययशब्दार्थस्य अर्थात् पूर्वपदार्थस्य प्रधानता भवति।

(ग) समासस्य पदद्वयं मिलित्वा अव्ययं भवति।

(घ) अव्ययीभावसमासः नपुंसकलिङ्गस्य एकवचने भवति। यथा–

| विग्रह | अव्ययपदम् | अव्ययस्यार्थः | समस्तपदम् |
|---|---|---|---|
| हरौ इति | अधि | सप्तमीविभक्त्यर्थे | अधिहरि |
| कृष्णस्य समीपम् | उप | समीपार्थे | उपकृष्णम् |
| मद्राणां समृद्धिः | सु | समृद्धि अर्थे | सुमद्रम् |
| यवनानां व्यृद्धि | दुर् | दुर्गतिः अर्थे | दुर्यवनम् |
| मक्षिकाणाम् अभावः | निर् | अभावार्थे | निर्मक्षिकम् |
| हिमस्य अत्ययः | अति | समाप्त्यर्थे | अतिहिमम् |
| निद्रा सम्प्रति न युज्यते | अति | अनुचितार्थे | अतिनिद्रम् |
| हरिशब्दस्य प्रकाशः | इति | शब्द–प्रादुर्भावः | इतिहरि |
| विष्णोः पश्चात् | अनु | पश्चात् | अनुविष्णु |
| रूपस्य योग्यम् | अनु | योग्यतार्थे | अनुरूपम् |
| दिनं दिनं प्रति | प्रति | वीप्सार्थे | प्रतिदिनम् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ( ३ ) तत्पुरुष समासः –

तत्पुरुषसमासे प्रायेण उत्तरपदार्थस्य प्रधानता भवति। यथा– राज्ञः पुरुष– राजपुरुषः। अत्र उत्तरपदं पुरुषः अस्ति तस्य एव प्रधानता अस्ति। 'राजपुरुषम् आनय' इति उक्ते सति पुरुषः एव आनीयते न तु राजा। तत्पुरुषसमासे पूर्वपदे या विभक्तिः भवति प्रायेण तस्याः नाम्ना एव समासस्य नाम भवति यथा –

| | | | |
|---|---|---|---|
| **( द्वितीयातत्पुरुषः )** | कृष्णं श्रितः | = | कृष्णश्रितः |
| | दुःखम् अतीतः | = | दुःखातीतः |
| | नरकं पतितः | = | नरकपतितः |
| | ग्रामं गतः | = | ग्रामगतः |
| | स्वर्गं गतः | = | स्वर्गगतः |
| | सुखं प्राप्तः | = | सुखप्राप्तः |
| **( तृतीयातत्पुरुषः )** | शङ्कुलया खण्डः | = | शङ्कुलाखण्डः |
| | हरिणा त्रातः | = | हरित्रातः |
| | धान्येन अर्थः | = | धान्यार्थः |
| | पुण्येन अर्थः | = | पुण्यार्थः |
| **( चतुर्थीतत्पुरुषः )** | भूतेभ्यः बलिः | = | भूतबलिः |
| | यूपाय दारु | = | यूपदारु |
| | गोभ्यः हितम् | = | गोहितम् |
| | गोभ्यः सुखम् | = | गोसुखम् |
| **( पञ्चमीतत्पुरुषः )** | चोराद् भयम् | = | चोरभयम् |
| | गुरोः भीतः | = | गुरुभीतः |
| **( षष्ठीतत्पुरुषः )** | राज्ञः पुरुषः | = | राजपुरुषः |
| **( सप्तमीतत्पुरुषः )** | अक्षेषु शौण्डः | = | अक्षशौण्डः |
| | विद्यायाम् निपुणः | = | विद्यानिपुणः |

## कर्मधारयः –

यदा तत्पुरुषसमासस्य द्वयोः पदयोः एकविभक्तिः अर्थात् समानविभक्तिः भवति तदा सः समानाधिकरण तत्पुरुषसमासः कथ्यते। अयमेव समासः कर्मधारय इति नाम्ना ज्ञायते। अस्मिन् समासे साधारणतया पूर्वपदं विशेषणम् उत्तरपदश्च विशेष्यं भवति। यथा– नीलम् कमलम् = नीलकमलम्

(क) अस्मिन् उदाहरणे नीलम् कमलम् इति द्वयोः पदयोः समानविभक्तिः अर्थात् प्रथमा विभक्तिः अस्ति।

(ख) अत्र नीलम् इति पदं विशेषणम् कमलम् इति पदं च विशेष्यम्। अत एव अयं कर्मधारयः समासः अस्ति।

### विशेषण–विशेष्यकर्मधारयः –

पीतम् अम्बरम् इति = पीताम्बरम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| | रक्तम् कमलम् इति = | रक्तकमलम् |
| | वीर: पुरुष: इति = | वीरपुरुष: |
| | दीर्घा रज्जु: इति = | दीर्घरज्जु: |
| | कुत्सित: राजा इति = | कुराजा |
| | महान् पुरुष: इति = | महापुरुष: |
| | कृष्ण: सर्प: = | कृष्णसर्प: |
| **उपमानोपमेय कर्मधारय:** – | घन: इव श्याम: इति= | घनश्याम: |
| | कर्पूर इव गौर: = | कर्पूरगौर: |
| | चन्द्र: इव मुखम् = | चन्द्रमुखम् |
| | शैल इव उन्नत: इति = | शैलोन्नत: |
| | वज्रम् इव कठोरम् इति= | वज्रकठोरम् |
| **नञ् तत्पुरुष:** – | न ब्राह्मण: = | अब्राह्मण: |
| | न अश्व: = | अनश्व: |
| **उपमानोत्तरपद कर्मधारय:** – | | |
| | पुरुष: व्याघ्र: इव = | पुरुषव्याघ्र: |
| | पुरुष: सिंह: इव = | पुरुषसिंह: |
| | पुरुष: ऋषभ: इव = | पुरुषर्षभ: |
| | कर: किसलयम् इव= | करकिसलयम् |
| | मुखम् कमलम् इव = | मुखकमलम् |
| **अवधारणापूर्वपद कर्मधारय:** – यथा – | | |
| | तप: एव धनम् = | तपोधनम् |
| | विद्या एव धनम् = | विद्याधनम् |
| | गुरु: एव देव: = | गुरुदेव: |
| | वेद: एव सम्पत् = | वेदसम्पत् |
| **उपपद तत्पुरुष:** – | कुम्भं करोति = | कुम्भकार: |
| | सूत्रं करोति = | सूत्रकार: |
| **कुसंज्ञकतत्पुरुष:** – | कुत्सित: पुरुष: = | कुपुरुष: |

**द्विगुसमास:** – 'संख्यापूर्वो द्विगु' इति पाणिनीयसूत्रानुसारं यदा कर्मधारयसमासस्य पूर्वपदं संख्यावाची उत्तरपदञ्च संज्ञावाची भवति तदा स: 'द्विगुसमास:' कथ्यते। अयं समास: प्राय: समूहार्थे भवति। समस्तपदं सामान्यतया नपुंसकलिङ्गस्य एकवचने अथवा स्त्रीलिङ्गस्य एकवचने भवति। यथा –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| त्रयाणां भुवनानां समाहारः इति | = | त्रिभुवनम् |
| पञ्चानां पात्राणां समाहारः इति | = | पञ्चपात्रम् |
| चतुर्णां युगानां समाहारः इति | = | चतुर्युगम् |

**कुत्रचित् द्विगुसमासः ईकारान्तस्त्रीलिङ्गेऽपि भवति यथा –**

| | | |
|---|---|---|
| पञ्चानां वटानां समाहारः इति | = | पञ्चवटी |
| अष्टानाम् अध्यायानां समाहारः इति | = | अष्टाध्यायी |
| सप्तानां शतानां समाहारः इति | = | सप्तशती |
| शतानाम् अब्दानां समाहारः इति | = | शताब्दी |

**(४) बहुव्रीहिसमासः** – '**अनेकमन्यपदार्थे**' । यस्मिन् समासे यदा अन्यपदार्थस्य प्रधानता भवति तदा सः बहुव्रीहिसमासः कथ्यते। अर्थात् न तु पूर्वपदार्थस्य प्रधानता भवति न हि उत्तरपदार्थस्य प्रत्युत द्वौ अपि पदार्थौ मिलित्वा अन्यपदार्थस्य बोधं कारयतः। यथा –

**समानाधिकरण-बहुव्रीहिः –**

| | | |
|---|---|---|
| कण्ठे कालः यस्य सः | = | कण्ठेकालः |
| प्राप्तम् उदकं यं सः | = | प्राप्तोदकः (ग्रामः) |
| हताः शत्रवः येन सः | = | हतशत्रुः (राजा) |
| दत्तं भोजनं यस्मै सः | = | दत्तभोजनः (भिक्षुकः) |
| पतितं पर्णं यस्मात् सः | = | पतितपर्णः (वृक्षः) |
| दश आननानि यस्य सः | = | दशाननः (रावणः) |
| वीरा पुरुषाः यस्मिन् (ग्रामे) सः | = | वीरपुरुषः (ग्रामः) |
| चत्वारि मुखानि यस्य सः | = | चतुर्मुखः (ब्रह्मा) |

**व्यधिकरणबहुव्रीहिः –**

| | | |
|---|---|---|
| चन्द्रः शेखरे यस्य सः | = | चन्द्रशेखरः (शिवः) |
| चक्रं पाणौ यस्य सः | = | चक्रपाणिः (विष्णुः) |
| शूलं पाणौ यस्य सः | = | शूलपाणिः (शिवः) |
| धनुः पाणौ यस्य सः | = | धनुष्पाणिः (रामः) |

**तुल्ययोगेबहुव्रीहिः –**

| | | |
|---|---|---|
| पुत्रेण सहितः | = | सपुत्रः |
| बान्धवैः सहितः | = | सबान्धवः |
| विनयेन सह विद्यमानम् | = | सविनयम् |
| आदरेण सह विद्यमानम् | = | सादरम् |
| पत्न्या सह वर्तमानः | = | सपत्नीकः (वशिष्ठः) |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**उपमानवाचकबहुव्रीहिः –**

| | | |
|---|---|---|
| चन्द्र इव मुखं यस्याः सा | = | चन्द्रमुखी |
| पाषाणवत् हृदयं यस्य सः | = | पाषाणहृदयः |

## ( ५ ) द्वन्द्वसमासः –

'**चार्थे द्वन्द्वः**'अर्थात् द्वन्द्वसमासे परस्परं साकांक्षयोः पदयोः मध्ये 'च' आगच्छति, अतएव द्वन्द्वसमासः उभयपदार्थप्रधानः भवति। यथा– धर्मः च अर्थः च– धर्मार्थौ। अत्र पूर्वपदं धर्मः उत्तरपदम् अर्थः अनयोः द्वयोः अपि प्रधानता अस्ति। द्वन्द्वसमासे समस्तपदं प्रायशः द्विवचने बहुवचने वा भवति।

उदाहरणानि–

**इतरेतर द्वन्द्वः–**

| | | |
|---|---|---|
| हरिश्च हरश्च | = | हरिहरौ। |
| ईशश्च कृष्णश्च | = | ईशकृष्णौ |
| व्यासश्च कपिलश्च | = | व्यासकपिलौ |
| रामश्च श्यामश्च मोहनश्च | = | रामश्याममोहनाः |
| शिवश्च केशवश्च | = | शिवकेशवौ |
| माता च पिता च | = | मातापितरौ |

**एकशेष द्वन्द्वः–** माता च पिता च = पितरौ

**समाहारद्वन्द्वः–** समाहार (समूहः) अर्थे द्वन्द्वसमासस्य प्रायेण नपुंसकलिङ्गे एकवचने प्रयोगः भवति। यथा –

| | | |
|---|---|---|
| पाणी च पादौ च एषां समाहारः | = | पाणिपादम् |
| शिरश्च ग्रीवा च अनयोः समाहारः | = | शिरोग्रीवा |
| रथिकाश्च अश्वारोहाश्च एषां समाहारः | = | रथिकाश्वरोहम् |
| वाक् च त्वक् च अनयोः समाहारः | = | वाक्त्वचम् |
| छत्रं च उपानह् च अनयोः समाहारः | = | छत्रोपानहम् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

(१) अव्ययीभावसमासस्य उदाहरणम् अस्ति–

(क) यथामति (ख) पापपुण्यौ

(ग) राजपुरुषः (घ) पंचवटी ( )

(२) कर्मधारयसमासस्य उदाहरणम् अस्ति–

(क) रामकृष्णौ (ख) पीताम्बरः

(ग) सुमद्रम् (घ) शताब्दीः ( )

(३) घनश्यामः इति पदे समासः अस्ति –

(क) बहुव्रीहिः (ख) कर्मधारयः

(ग) अव्ययीभावः (घ) द्विगुः ( )

(४) बहुव्रीहिसमासस्य उदाहरणम् अस्ति–

(क) महापुरुषः (ख) चतुर्युगः

(ग) उपकृष्णम् (घ) कण्ठेकालः ( )

(५) द्वन्द्वसमासस्य उदाहरणम् अस्ति–

(क) भ्रातरौ (ख) दशपात्रम्

(ग) अनुरथम् (घ) महापुरुषः ( )

**(क) निम्नलिखितपदानां समासविग्रहः कर्तव्यः –**

कृष्णसर्पः –

सेवाधर्मः –

प्रतिदिनम् –

नरोत्तमः –

महाशयः –

पापमुक्तः –

अप्रियः –

अनिष्टः –

जलमग्नः –

शिवालयः –

कुपुत्रः –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ख) **निम्नलिखितपदानां समासविग्रहं कृत्वा समासस्य नामापि लेखनीयम् –**

| समस्तपदम् | विग्रहः | समासस्य नाम |
|---|---|---|
| अनुरथम् | | |
| सप्तपदी | | |
| भुक्तभोगः | | |
| धर्मभ्रष्टः | | |
| मासोनः | | |
| धर्मार्थौ | | |
| सप्तशती | | |
| विद्याहीनः | | |

(ग) **निम्नलिखितविग्रहवाक्यानां समासः करणीयः –**

समान उदरो यस्य –
मुखं कमलम् इव –
पुत्रीश्च पुत्रश्च –
शोभनः पुरुषः –
देवेन दत्तः –
रूपस्य योग्यम् –
तेन कृतम् –

(घ) **'क' खण्डं 'ख' खण्डेन सह योजयत।**

| क खण्डः | ख खण्डः |
|---|---|
| द्वन्द्वसमासः | शताब्दी |
| बहुव्रीहिसमासः | उपवनम् |
| अव्ययीभावसमासः | कुसुमकोमलम् |
| द्विगुसमासः | शूलपाणिः |
| कर्मधारयसमासः | नरश्रेष्ठः |
| तत्पुरुषसमासः | रामलक्ष्मणौ |

**उत्तरमाला– वस्तुनिष्ठप्रश्नाः**

(१) क (२) ख (३) ख (४) घ (५) क

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ( ग ) कारकप्रकरणम्–

'क्रियाजनकत्वं कारकम् अथवा क्रियां करोति निर्वर्तयति इति कारकम्।' वैयाकरणाः कारकस्य अनेकानि लक्षणानि प्रस्तुवन्ति । यथा –

१. क्रियाजनकत्वं कारकत्वम्।

२. क्रियानिष्पादकत्वं कारकत्वम् ।

३. क्रियान्वयित्वं कारकत्वम्।

एवं यः क्रियां सम्पादयति अथवा यस्य क्रियया सह साक्षात् परम्परया वा सम्बन्धो भवति सः 'कारक' इति कथ्यते।

**कारकभेदाः –** संस्कृत व्याकरणे षट्कारकाणि भवन्ति। यथा –

**कर्त्ता कर्म च करणं च सम्प्रदानं तथैव च।**
**अपादानाधिकरणं चेत्याहुः कारकाणि षट्।।**

अर्थात् कर्ता, कर्म, करणम्, सम्प्रदानं अपादानम्, अधिकरणम्। सम्बोधने प्रथमा विभक्तिः एव भवति, अतः अस्य परिगणनं प्रथमायामेव भवति। सम्बन्धस्य परिगणना कारकान्तर्गते न भवति। अस्य इदं कारणमस्ति यत् सम्बन्धस्य क्रियया सह साक्षात् योगः न भवति। उदाहरणतः **देवदत्तः रामस्य पुस्तकं पठति** अस्मिन् वाक्ये देवदत्तस्य पठनक्रियया सह योगः अस्ति किन्तु रामस्य सम्बन्धः न पठनक्रियया अपितु 'पुस्तकेन' । अतः रामशब्दे विद्यमानायाः षष्ठीविभक्त्याः अर्थः 'सम्बन्धः' कारकरूपेण न गृह्यते। अत एवेदं प्रसिद्धमस्ति यत् – षष्ठ्याः कारकत्वं नास्ति।

### कर्त्तृकारकम् (प्रथमा–विभक्तिः)

यः क्रियायाः करणे स्वतन्त्रः भवति सः कर्त्ता इति कथ्यते। (स्वतन्त्रः कर्त्ता/पा. १. ४. ५४) उक्तकर्तरि च प्रथमा विभक्तिः भवति। यथा – रामः पठति।

**( १ ) प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** (पा. सू. २. ३.४६) = प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये, परिमाणमात्रे, वचन (संख्या) मात्रे च प्रथमा विभक्तिः भवति। सार्थकशब्दस्वरूपं प्रातिपदिकं कथ्यते। यस्य प्रातिपदिकस्य उच्चारणमात्रेण कस्यापि नियतस्य निश्चितस्य वा अर्थस्य ज्ञानम् भवति असौ प्रातिपदिकार्थः कथ्यते।

**उदाहरणम् –** प्रातिपदिकार्थमात्रे – कृष्णः, श्रीः, ज्ञानम् । लिङ्गमात्रस्य आधिक्ये – तटः , तटी, तटम्। परिमाणमात्रे – द्रोणो व्रीहिः। वचनमात्रे – एकः, द्वौः बहवः।

कर्मवाच्यस्य कर्मणि प्रथमा विभक्तिः भवति। यथा– मया ग्रन्थः पठ्यते।

**( २ ) सम्बोधने च –** (पा. सू. २. ३. ४७) =सम्बोधने अर्थात् अभिमुखीकरणे प्रथमा विभक्तिः भवति। यथा– हे राम !(माम् रक्ष) ।अत्र रामम् अभिमुखीकरणे प्रथमा विभक्त्याः प्रयोगः भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## कर्मकारकम् (द्वितीया विभक्तिः)

**(३) कर्तुरीप्सिततमं कर्म** (पा. सू. १.४.४९) अर्थात् कर्ता स्वक्रियया अत्यधिकरूपेण यं इच्छति अभिलषति वा तस्य कर्मसंज्ञा भवति।

उदाहरणम् – सः ग्रामं गच्छति।

**(४) कर्मणि द्वितीया** (पा. सू. २. ३. २) – यस्य कर्मसंज्ञा भवति तस्मिन् अनुक्ते = अप्रधाने कर्मणि द्वितीया विभक्तिः भवति। वाच्यं त्रिविधं भवति – कर्तृवाच्यं, कर्मवाच्यं भाववाच्यं च। कर्तृवाच्ये कर्ता उक्तः(प्रधानः)भवति कर्म च अनुक्तम् (अप्रधानम्) भवति। कर्तुः प्रधानतया क्रियायाः प्रयोगः कर्तृपदानुसारेण भवति। अर्थात् एकवचनेन कर्त्रा सह एकवचनस्य क्रियायाः प्रयोगः, एवं द्विवचनस्य बहुवचनस्य वा कर्तुः प्रयोगदशायां क्रिया अपि द्विवचनस्य बहुवचनस्य वा भवति।

कर्म इत्यस्य अनुक्तत्वात् = अप्रधानत्वात् तस्मिन् द्वितीयाविभक्तेः प्रयोगः भवति। किन्तु कर्मवाच्ये कर्म प्रधानं कर्ता च अप्रधानं च भवति। अतः प्रधाने = मुख्ये कर्मणि प्रथमा विभक्तिः अप्रधाने = गौणे कर्तरि च तृतीयाविभक्तेः प्रयोगः भवति। भाववाच्ये क्रियायाः एव प्राधान्यं भवति। अत्र अकर्मकधातोः प्रयोगः भवति।

उदाहरणम् – देवदत्तः **हरिं** भजति। अस्मिन् वाक्ये कर्ता 'देवदत्तः' अस्ति। तस्य भजनक्रियया अतिशयेन ईप्सितः 'हरिः' अस्ति। अतः 'कर्तुरीप्सिततमं कर्म' इत्यनेन सूत्रेण 'हरि' शब्दस्य कर्मसंज्ञा भवति। 'कर्मणि द्वितीया' इत्यनेन तस्मिन् अप्रधाने कर्मणि द्वितीया विभक्तिः भवति।

**(५) अकथितं च** (पा. सू./१.४.५१) – अपादानादिविशेषैः अविवक्षितं कारकं कर्मसंज्ञं स्यात्। अर्थात् अपादानेन सम्प्रदानेन करणेन अधिकरणेन च यस्य कारकस्य कथनस्य इच्छा न भवति तस्य कर्मसंज्ञा भवति। संस्कृतभाषायां तादृशाः षोड्शधातवः सन्ति येषां प्रयोगे एकं तु मुख्यं कर्म भवति अपरञ्च अपादानादिकारकैः अविवक्षितं गौणं कर्म भवति। अस्मिन् गौणे कर्मणि एव अत्र द्वितीया विभक्तिः भवति। इमे धातवः एव द्विकर्मकधातवः कथ्यन्ते एतेषां प्रयोगः अत्र क्रियते –

| | | |
|---|---|---|
| दुह् (दुहना) | – | गोपालः **गां दुग्धं** दोग्धि। |
| (गोपाल गाय से दूध दुहता है) | | |
| याच् (मांगना) | – | सुरेशः **महेशं पुस्तकं** याचते। |
| (सुरेश महेश से पुस्तक मांगता है) | | |
| पच् (पकाना) | – | पाचकः **तण्डुलान् ओदनं** पचति। |
| (पाचक चावलों से भात पकाता है) | | |
| दण्ड् (दण्ड देना) | – | राजा **गर्गान् शतं** दण्डयति। |
| (राजा गर्गों को सौ रूपये का दण्ड देता है) | | |
| प्रच्छ् (पूछना) | – | सः **माणवकं पन्थानं** पृच्छति। |
| (वह बालक से मार्ग पूछता है) | | |
| रुध् (रोकना) | – | ग्वालः **गां व्रजम्** अवरुणद्धि। |
| (ग्वाला गाय को व्रज में रोकता है) | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चि (चुनना) – मालाकार: **लतां पुष्पं** चिनोति।
(माली लता से पुष्प चुनता है)
ब्रू (बोलना) / शास् (कहना) – गुरु **शिष्यं धर्मं** ब्रूते/शास्ति वा ।
(गुरु शिष्य से धर्म कहता है)
मथ् (मथना) – स: **क्षीरनिधिं सुधां** मथ्नाति।
(वह क्षीरसागर से अमृत मथता है)
मुष् (चुराना) – चौर: **देवदत्तं धनं** मुष्णाति।
(चोर देवदत्त से धन चुराता है
जि (जीतना) – नृप: **शत्रुं राज्यं** जयति।
(राजा शत्रु से राज्य को जीतता है)
नी (ले जाना) – स: **अजां ग्रामं** नयति।
(वह बकरी को गांव ले जाता है)
हृ (हरण करना) – स: **कृपणं धनं** हरति।
(वह कंजूस के धन को हरता है)
वह् (ले जाना) – कृषक: **ग्रामं भारं** वहति।
(किसान गांव में बोझा ले जाता है)
कृष् (खींचना) – कृषक: **क्षेत्रं महिषीं** कर्षति।
(किसान खेत में भैंस को खींचता है)

**(६) अधिशीङ्स्थासां कर्म** (पा. सू. १.४.४६) – **अधि**–उपसर्गपूर्वक–शीङ्–स्था–आस्–धातूनां प्रयोगे एषाम् आधारस्य कर्मसंज्ञा भवति कर्मणि च द्वितीया विभक्ति: भवति। यथा –

अधिशेते (सोता है) – सुरेश: **शय्याम्** अधिशेते।
अधितिष्ठति (बैठता है) – अध्यापक: **आसन्दिकाम्** अधितिष्ठिति।
अध्यास्ते (बैठता है) – नृप: **सिंहासनम्** अध्यास्ते।

**(७) अभिनिविशश्च** (पा. सू. १. ४. ४७) – उपसर्गद्वयपूर्वक-विश्-धातो: प्रयोगे सति आधारवाचकस्य शब्दस्य कर्म-संज्ञा भवति कर्मणि च द्वितीया विभक्ति: भवति। यथा –

अभिनिविशते (प्रवेश करता है) – दिनेश: अभिनिविशते सन्मार्गम्।

**(८) उपान्वध्याङ्वस:** (पा. सू. १.४.४८) – उप–अनु–अधि–आङ् (आ)–उपसर्गपूर्वक–वस् धातो: प्रयोगे अस्य आधारस्य कर्मसंज्ञा भवति कर्मणि च द्वितीया विभक्ति: भवति। यथा –

उपवसति (पास में रहता है) – श्याम: **नगरम्** उपवसति
अनुवसति (पीछे रहता है) – कुलदीप: **गृहम्** अनुवसति।
अधिवसति (में रहता है) – सुरेश: **जयपुरम्** अधिवसति।
आवसति (रहता है) – हरि: **वैकुण्ठम्** आवसति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**( ९ ) अभुक्त्यर्थस्य न ( वा. )** – यदि 'उप उपसर्गपूर्वक 'वस' धातोः उपवास( भोजनाभावः) अर्थः भवति तदा तस्य आधारवाचकस्य शब्दस्य कर्मसंज्ञा न भवति अपितु अधिकरणसंज्ञया तत्र सप्तमी विभक्तिः भवति। यथा – वने उपवसति।

अत्र 'उप' उपसर्गपूर्वक 'वस्' धातोः प्रयोगः उपवासार्थे अस्ति न तु निवासे अर्थे। अतः तस्य आधारवाचकस्य 'वन' शब्दस्य उपान्वध्याङ्वसः सूत्रेण प्राप्तायाः कर्मसंज्ञायाः अनेन वार्तिकेन निषेधः। फलतः 'वन' शब्दे अधिकरणसंज्ञा तथा च सप्तमी विभक्तिः अस्ति।

**( १० ) उभसर्वतसो कार्या धिगुपर्यादिषु त्रिषु।**
**द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।। ( वा. )** –

उभयतः, सर्वतः योगे द्वितीया भवति। धिक्, उपरि-उपरि, अधि-अधि, अधः-अधः, इत्यादिषु त्रिषु आम्रेडित (वारद्वयं कथन)दशायां द्वितीया भवति। यथा –

| | | |
|---|---|---|
| उभयतः | – | उभयतः कृष्णं गोपाः । |
| सर्वतः | – | सर्वतः कृष्णं गोपाः । |
| धिक् | – | धिक् दुर्जनम् । |
| अधोऽधः (सबसे नीचे) | – | भूमिम् अधोऽधः जलम् अस्ति। |
| अध्यधि (अन्दर-अन्दर) | – | लोकम् अध्यधि हरिः अस्ति। |
| उपर्युपरि (ऊपर-ऊपर) | – | लोकम् उपर्युपरि सूर्यः अस्ति। |

**( ११ ) अभितः परितः समया निकषा हा प्रतियोगेऽपि ( वा. )** – अभितः, परितः, समया, निकषा, हा, प्रति एषां योगेऽपि द्वितीया विभक्तिः भवति। यथा –

| | | |
|---|---|---|
| अभितः (दोनों ओर) | – | राजमार्गम् अभितः वृक्षाः सन्ति। |
| परितः (चारों ओर) | – | ग्रामं परितः क्षेत्राणि सन्ति। |
| समया निकषा (समीप में) | – | विद्यालयं निकषा देवालयः अस्ति। |
| हा (हाय) | – | दुर्जनं हा |
| प्रति (ओर) | – | छात्राः विद्यालयं प्रति गच्छन्ति। |

**( १२ ) अन्तराऽन्तरेण युक्ते** (पा. सू. २.३.४) – अर्थात् अन्तरा (मध्ये), अन्तरेण (विना) इति द्वयोः अव्यययोः योगे द्वितीया विभक्तिः भवति इत्यर्थः। यथा –

| | | |
|---|---|---|
| अन्तरेण/विना (बिना) | – | प्रदीपः पुस्तकं विना / अन्तरेण पठति। |
| अन्तरा (बीच में) | – | रामं श्यामं च अन्तरा देवदत्तः अस्ति। |

**( १३ ) कालाध्वनोरत्यन्तसंयोगे** (पा. सू. २.३.५) – कालवाचिनि शब्दे मार्गवाचिनि शब्दे च अत्यन्तसंयोगे निरन्तरसंयोगे वा गम्यमाने द्वितीया विभक्तिः भवति। यथा –

मासं कल्याणी (कालवाचक गुणात्यन्तसंयोगः), मासम् अधीते (कालवाचकक्रियात्यन्तसंयोगः), मासं गुडधानाः (कालवाचक द्रव्यात्यन्तसंयोगः), क्रोशं कुटिला नदी (अध्ववाचक गुणात्यन्तसंयोगः), क्रोशम् अधीते (अध्ववाचक गुणात्यन्तसंयोगः), क्रोशं गिरिः (अध्ववाचक गुणात्यन्तसंयोगः)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एषु उदाहरणेषु कालवाचकशब्दस्य अध्ववाचकशब्दस्य च गुणक्रियाद्रव्यै: अत्यन्तसंयोग: दृश्यते अत: मासशब्दे क्रोशशब्दे च द्वितीया विभक्ति:।

## करणकारकम् (तृतीयाविभक्ति:)

**(१३) साधकतमं करणम्** (पा. सू. १. ४. ४२)– क्रियाया: सिद्धौ यत् सर्वाधिकं सहायकं भवति तस्य कारकस्य करणसंज्ञा भवति। अर्थात् कर्तृद्वारा क्रियमाणायां क्रियायां य: अतिशयेन सहायक: तस्य करणसंज्ञा भवति।

**(१४) कर्तृकरणयोस्तृतीया** (पा. सू. २. ३. १८) – अनुक्ते कर्तरि करणे च तृतीया विभक्ति स्यात्। अर्थात् अप्रधाने कर्तरि करणे च तृतीया विभक्ति: भवति। यथा –

**रामेण बाणेन हत: बाली** – अस्मिन् उदाहरणे 'बाली' उक्तं कर्म अस्ति तस्य हननक्रियायां 'राम:' 'स्वतन्त्र: कर्ता' इत्यनेन रामशब्दस्य कर्तसंज्ञा एवञ्च बाण: अत्यधिक: सहायक: अत: तस्य '**साधकतमं करणम्**' इत्यनेन तृतीया विभक्ति: भवति। कर्मवाच्यस्य भाववाच्यस्य वा अनुक्तकर्तरि अपि तृतीया विभक्ति: भवति। यथा – रामेण लेख: लिख्यते। (कर्मवाच्ये) तेन हस्यते (भाववाच्ये), **बालकेन** शय्यते।

**(१५) सहयुक्तेऽप्रधाने** (पा. सू. २. ३. १९) –सहार्थेन युक्ते अप्रधाने तृतीया स्यात्। अर्थात् सह-साकं समं-सार्धं-शब्दानां योगे तृतीया विभक्ति: भवति। ) यथा –

पुत्रेण सह आगत: पिता । अस्मिन् वाक्ये आगमनक्रियायां पुत्र: अप्रधान: अस्ति अत: प्रकृतसूत्रेण 'पुत्र' शब्दे तृतीया विभक्ति: अस्ति। एवमेव– रामेण साकं सीता वनम् अगच्छत्। गुरुणा सार्धं शिष्य: पाठशालां गच्छति। जनन्या समं पुत्र: आपणं गच्छति।

**(१६) अपवर्गे तृतीया** (पा. सू. २. ३. ६) – अपवर्गस्य आशय: फलप्राप्ति:, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। यत्र फलप्राप्ति: इत्यस्य अर्थस्य ज्ञानं भवति तत्र कालवाचकस्य मार्गवाचकस्य च शब्दस्य निरन्तरसंयोगे तृतीया भवति। यथा –

अह्ना क्रोशेन वा अनुवाक्: अधीत:। अत्र अहन् पर्यन्तं अध्ययनस्य अत्यन्तसंयोगे फलप्राप्ति: गम्यते अत: कालवाचके 'अहन्' शब्दे अध्वावाचके 'क्रोश' शब्दे च प्रकृतसूत्रेण तृतीया विभक्ति: अस्ति।

**(१६) येनाङ्गविकार:** (पा. सू. २. ३. २०) – येन विकृत-अङ्गेन अङ्गिन: विकारो लक्ष्यते तस्मिन् विकृताङ्गे तृतीया विभक्ति: भवति। यथा –

**नेत्रेण** काण:, **कर्णेन**: बधिर:, **पादेन** खञ्ज:, **शिरसा** खल्वाट:।

**(१७) इत्थंभूतलक्षणे** (पा. सू. २. ३. ३१) – येन चिह्नेन कस्यचिद् अभिज्ञानं भवति तस्मिन् चिह्नवाचिनि शब्दे तृतीया विभक्ति: भवति। कस्यचिदपि लक्षणस्य ज्ञानं भवति तत्र लक्षणवाचके शब्दे तृतीयाविभक्ति:। यथा –

स जटाभि: तापस: प्रतीयते। अस्मिन् वाक्ये 'जटा' इति लक्षणवाचकेन शब्देन 'तापस:' इत्यस्य ज्ञानं भवति अत: प्रकृतसूत्रेण लक्षणवाचके 'जटा' शब्दे तृतीया विभक्ति:।

**(१८) हेतौ** (पा. २. ३. २३) – हेतुवाचिशब्दे तृतीया विभक्ति: भवति। हेतु शब्द: कारणप्रयोजनपर्याय:। अत: अस्य शब्दस्यार्थे द्योतिते सति तृतीया भवति। यथा –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पुण्येन हरिः दृष्टः। सः अध्ययनेन वसति। विद्यया यशः वर्धते।

## सम्प्रदानकारकम् (चतुर्थी विभक्तिः)

**(१९) कर्मणा यमभिप्रैति स सम्प्रदानम्** (पा. सू. १.४.३२)– दानस्य कर्मणा कर्ता यं सन्तुष्टं कर्तुम् इच्छति सः सम्प्रदानम् इति कथ्यते। सम्यक् प्रदीयते यस्मै तत् सम्प्रदानम्। अर्थात् कस्यापि जनस्य दानक्रियायाः कर्मद्वारा यः अभिप्रेतः भवति, तस्य सम्प्रदानसंज्ञा भवति। च

**(२०) चतुर्थी सम्प्रदाने** (पा. सू. १.४.१३)– यस्य सम्प्रदानसंज्ञा भवति तस्मिन् शब्दे चतुर्थी विभक्तिः भवति। उदाहरणम् –

नृपः निर्धनाय धनं यच्छति। अत्र धनं दान–क्रियायाः कर्म अस्ति। एतेन च 'निर्धनः' अभिप्रेतः। अतः 'निर्धन' शब्दस्य सम्प्रदानसंज्ञा 'चतुर्थी सम्प्रदाने' इत्यनेन च चतुर्थी विभक्तिः भवति।

**(२१) रुच्यर्थानां प्रीयमाणः** (पा. सू. १.४.३३)– रुच्यर्थानां धातूनां प्रयोगे यः प्रीयमाणः भवति तस्य सम्प्रदानसंज्ञा भवति, सम्प्रदाने च चतुर्थी विभक्तिः भवति यथा –

भक्ताय रामायणं रोचते।बालकाय मोदकाः रोचन्ते। गणेशाय दुग्धं स्वदते।

**(२२) धारेरुत्तमर्णः** (पा. १.४.३५) – धृञ् (धारणे) धातोः प्रयोगे यः उत्तमर्णः (ऋणदाता) भवति तस्य सम्प्रदानसंज्ञा स्यात् , सम्प्रदाने च चतुर्थी विभक्तिः भवति। यथा –

देवदत्तः यज्ञदत्ताय शतं धारयति। वाक्येऽस्मिन् ऋणदाता यज्ञदत्तः उत्तमर्णः अस्ति।

**(२३) स्पृहेरीप्सितः** (पा. १.४.३६) – स्पृह् (ईप्सायां) धातोः प्रयोगे यः ईप्सितः भवति तस्य सम्प्रदानसंज्ञा भवति, सम्प्रदाने च चतुर्थी विभक्तिः भवति। यथा–

बालकः पुष्पाय स्पृहयति।

**(२४) क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः** (पा. १.४.३७) – क्रुधादि–अर्थानां धातूनां प्रयोगे यं प्रति कोपः क्रियते तस्य सम्प्रदानसंज्ञा भवति सम्प्रदाने च चतुर्थी विभक्तिः भवति। क्रुधः = क्रोधः, द्रुह्= अपकारः, ईर्ष्य = अक्षमा, असूयः= गुणेषु दोषदर्शनम्। यथा –

पिता पुत्राय क्रुध्यति। किंकरः नृपाय द्रुह्यति। दुर्जनः सज्जनाय ईर्ष्यति।

**(२५) नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च** (पा. २. ३. १९)– नमः, स्वस्ति, स्वाहा, स्वधा, अलं, वषट् इति शब्दानां योगे चतुर्थी विभक्तिः भवति।

नमः (नमस्कार) = रामाय नमः। स्वस्ति (कल्याण)= गणेशाय स्वस्ति। स्वाहा (आहुति)= प्रजापतये स्वाहा। स्वधा (हवि का दान)= पितृभ्यः स्वधा। वषट् (हवि का दान)= सूर्याय वषट् । अलम् (समर्थ)= दैत्येभ्यः हरिः अलम्।

**(२६) तादर्थ्ये चतुर्थी वाच्या (वा.)**– तदर्थस्य भावः तादर्थ्यम् । यस्मै प्रयोजनाय या क्रिया क्रियते तस्मिन् प्रयोजनवाचिनि शब्दे चतुर्थी विभक्तिः भवति। इयं चतुर्थी उपकार्योपकारक–भावसम्बन्धविवक्षायां उपकार्यवाचकात् शब्दात् भवति। यथा –

सः मोक्षाय हरिं भजति। बालकः दुग्धाय क्रन्दति। काव्यं यशसे भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अपादानकारकम् (पञ्चमी विभक्तिः)

**(२७) ध्रुवमपायेऽपादानम्** (पा. सू. १. ४. २४) – यः निश्चितः भवति स ध्रुवः कथ्यते अपाये सति यद् ध्रुवं तस्य अपादान संज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति। यथा –

'धावतोऽश्वात् पतति' – अस्मिन् वाक्ये धावनक्रियायुक्तः अश्वः ध्रुवः अस्ति। तस्मात् कस्यचित् जनस्य पतनक्रिया अर्थात् वियोगः भवति अतः ध्रुवमपायेऽपादानम् इति सूत्रेण धावनक्रियायुक्तस्य 'अश्व' शब्दस्य अपादानसंज्ञा भवति।

एवमेव 'नृपः ग्रामात् आगच्छति'। अस्मिन् वाक्ये 'ग्राम' ध्रुवः=स्थिरः अवधिभूतः अस्ति। ग्रामात् नृपस्य विश्लेषः=वियोगः भवति। अतः 'ग्राम' शब्दस्य अपादानसंज्ञा, अपादाने पञ्चमी विभक्तिः।

**(२८) भीत्रार्थानां भयहेतुः** (पा. सू. १. ४. २५) – भयार्थानां रक्षार्थानां च धातूनां प्रयोगे भयस्य यद् हेतुः अस्ति तस्य अपादान संज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति यथा –

बालकः सिंहात् बिभेति। नृपः दुष्टात् रक्षति/त्रायते।

**(२८) वारणार्थानामीप्सितः** (पा.सू. १.४.२६) – वारणार्थानां धातूनां प्रयोगे यः ईप्सितः अर्थः भवति तस्य कारकस्य अपादानसंज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति। यथा –

कृषकः यवेभ्यः गां वारयति।

**(२९) आख्यातोपयोगे** (पा.सू. १.४.२९) – यस्मात् नियमपूर्वकं विद्या गृह्यते तस्य शिक्षकादिजनस्य अपादानसंज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति। यथा –

शिष्यः उपाध्यायात् अधीते।

छात्रः शिक्षकात् पठति।

**(३०) जनिकर्तुः प्रकृतिः** (पा.सू. १. ४. ३०) – जन् धातोः यः कर्त्ता, तस्य या प्रकृतिः (कारणम्=हेतुः) तस्य अपादानसंज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति। यथा –

गोमयात् वृश्चिकः जायते।

कामात् क्रोधः जायते।

**(३१) भुवः प्रभवः** (पा.सू. १. ४. ३१) – कस्यचिदपि उत्पद्यमानस्य पदार्थस्य यत् प्रथमं प्रकाशस्थानं भवति तस्य अपादानसंज्ञा। सूत्रानुसारेण भूधातोः यः कर्ता, तस्य यद् उत्पत्तिस्थानं, तस्य अपादान संज्ञा भवति अपादाने च पञ्चमी विभक्तिः भवति। यथा –

'गङ्गा हिमालयात् प्रभवति।' अस्मिन् वाक्ये गङ्गायाः प्रथमः प्रभवः = 'प्रकाशस्थानं' 'हिमालयः' अस्ति।

एवमेव 'काश्मीरेभ्यः वितस्तानदी प्रभवति' इति अस्मिन् वाक्ये वितस्तायाः प्रथमः प्रभवः = 'प्रकाशस्थानं काश्मीरः शब्दस्य अपादान संज्ञा फलतः पञ्चमी विभक्तिः अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## षष्ठी विभक्तिः–

**( ३२ ) षष्ठी शेषे** (पा.सू.२.३.५०) – कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः, तत्र षष्ठी विभक्तिः भवति।

सम्बन्धसामान्ये षष्ठी विभक्तिः भवति। कारकान्तर्गते 'सम्बन्धः' इत्यस्य परिगणनं न भवति। यतः अस्य क्रियया सह साक्षात् अन्वयः न भवति। कारके तु तदेव यस्य क्रियया सह साक्षात् सम्बन्धः दृश्यते। अतएव अस्य सूत्रस्य अर्थः भवति यत् यत्र कारकप्रातिपदिकार्थभिन्नः स्वस्वामिभावादिसम्बन्धः दृश्यते स शेषः। तस्मिन् शेषे अर्थे षष्ठी विभक्तिः भवति। उदाहरणम्– 'राज्ञः पुरुषः' – अस्मिन् वाक्ये राजा स्वामी पुरुषः स्वः (सेवकः)। कारकप्रातिपदिकार्थभिन्नः किन्तु स्वस्वामिभावादिसम्बन्धः दृश्यते अतः प्रकृतसूत्रेण 'राजन्' पदे षष्ठी विभक्तिः।

विशेषः – अयं सम्बन्धः अनेकविधः भवति। यथा –

स्वस्वामिभावादिसम्बन्धः – **राज्ञः पुरुषः** ।
जन्यजनकभावसम्बन्धः – **दशरथस्य पुत्रः।**
अवयवावयविभावसम्बन्धः – **पशोः पादः** ।
आधाराधेयभावसम्बन्धः – **वृक्षस्य शाखा** ।
प्रकृतिविकृतिभावसम्बन्धः – **क्षीरस्य विकारः** ।
समूहसमूहिभावसम्बन्धः – **गवां समूहः** ।
समीपसमीपिभावसम्बन्धः – **कुम्भस्य स्वामी।**
पाल्यपालकभावसम्बन्धः – **पृथिव्याः स्वामी।**

**( ३३ ) षष्ठी हेतुप्रयोगे** (पा.सू. २. ३. २६) – हेतु शब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अर्थात् यस्मिन् वाक्ये हेतुशब्दस्य प्रयोगः दृश्यतेतथा च कश्चित् हेतुः अपि दृष्टिगोचरः भवति तत्र हेतुवाचके शब्दे षष्ठीविभक्त्याः प्रयोगः भवति। यथा –

**अन्नस्य हेतोः वसति**। अत्रास्मिन् वाक्ये हेतुशब्दस्य प्रयोगः अस्ति तथा च अन्नरूपो हेतुः अपि दृश्यते अतः प्रकृतसूत्रेण हेतुवाचके 'अन्न' शब्दे षष्ठीविभक्तिः।

यदा बहुषु कस्यचित् एकस्य जातिगुणक्रियाभिः विशेषता प्रदर्श्यते तदा विशेषणशब्दैः सह ष्ठन्

**( ३४ ) कर्तृकर्मणोः कृति** (पा.सू. २. ३. ६५) – कृतप्रत्यययोगे कर्तरि कर्मणि च षष्ठी स्यात्।

अर्थात् कृत्प्रत्ययस्य प्रयोगे सति कर्तरि कर्मणि च षष्ठी विभक्त्याः विधानं भवति।

यथा – **कृष्णस्य कृतिः । जगतः कर्ता कृष्णः ।**

**( ३५ ) तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्** (पा. सू. २. ३. ७२) – तुल्यवाचिशब्दानां योगे षष्ठी अथवा तृतीया विभक्तिः भवति यथा –

सुरेशः महेशस्य (महेशेन वा) तुल्यः अस्ति।
सीता गीतायाः (गीतया वा) तुल्या विद्यते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अधिकरणकारकम् (सप्तमी विभक्तिः)

**( ३६ ) आधारोऽधिकरणम्** (पा. सू. १. ४. ४५)– कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः अधिकरणकारकं स्यात्।क्रियायाः सिद्धौ यः आधारः भवति तस्य अधिकरणसंज्ञा भवति ।

**( ३७ ) सप्तम्यधिकरणे च** (पा. सू. २. ३. ३६) – अधिकरणे सप्तमी स्यात्।

आधारः त्रिविधः भवति –

१. औपश्लेषिकः – संयोगादि सम्बन्धः। यथा – कटे आस्ते।

२. वैषयिकः – विषयेण समबन्धः । यथा – स्थाल्यां पचति।

३. अभिव्यापकः – सर्वत्र व्यापकरूपः । यथा – सर्वस्मिन् आत्मास्ति।

**( ३७ ) यस्य च भावेन भावलक्षणम्** (पा. सू. २. ३. ३७) – यस्य क्रियया क्रियान्तरं लक्ष्यते ततः स्समी स्यात् । अर्थात् यदा एकक्रियायाः अनन्तरं अपरा क्रिया भवति तदा पूर्वक्रियायां तस्याश्च कर्तरि सप्तमी विभक्तिः भवति। यथा –

रामे वनं गते दशरथः प्राणान् अत्यजत् ।

सूर्ये अस्तं गते सर्वे बालकाः गृहम् अगच्छन् ।

**( ३८ ) यतश्च निर्धारणम्** (पा. सू. २. ३. ४१) – जातिगुणक्रियासंज्ञाभिः समुदायात् एकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ भवतः। अर्थात् यत्र कस्माच्चिदपि समुदायात् जात्या गुणेन क्रियया संज्ञया वा कस्यचिदपि पृथक्करणं भवति तदेव निर्धारणं कथ्यते। अतः यस्मात् पृथक्करणं भवति तस्मात् समुदायवाचकात् शब्दात् षष्ठीसप्तम्यौ भवतः।

उदाहरणम् –

**जात्या** – नृणां नृषु वा ब्राह्मणः श्रेष्ठः ।

**गुणेन** – गवां गोषु वा कृष्णा बहुक्षीरा ।

**क्रियया** – गच्छतां गच्छत्सु वा धावञ्छीघ्रः ।

**संज्ञया** – छात्राणां छात्रेषु वा मैत्रः पटुः ।

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

(१) 'अभितः' शब्दस्य योगे विभक्तिः भवति –
(क) चतुर्थी (ख) पंचमी
(ग) द्वितीया (घ) तृतीया ( )

(२) 'सह' शब्दस्य योगे विभक्तिः भवति–
(क) तृतीया (ख) चतुर्थी
(ग) पंचमी (घ) षष्ठी ( )

(३) कर्मवाच्यस्य अनुक्ते कर्तरि विभक्तिः भवति –
(क) प्रथमा (ख) द्वितीया
(ग) तृतीया (घ) पंचमी ( )

(४) अङ्गविकारे विभक्तिः भवति –
(क) प्रथमा (ख) द्वितीया
(ग) तृतीया (घ) सप्तमी ( )

(५) अधस्तनेषु चतुर्थी विभक्तेः कारणम् अस्ति–
(क) नमः (ख) सह
(ग) अभितः (घ) प्रति ( )

(६) अधस्तनेषु पंचमीविभक्तेः कारणम् अस्ति –
(क) नमः (ख) अनन्तरम्
(ग) अधोऽधः (घ) खल्वाटः ( )

(७) अपादाने विभक्तिः भवति–
(क) द्वितीया (ख) तृतीया
(ग) पंचमी (घ) षष्ठी ( )

(८) रक्षार्थकधातूनां योगे विभक्तिः भवति–
(क) षष्ठी (ख) सप्तमी
(ग) पंचमी (घ) तृतीया ( )

(९) कारकाणां संख्या अस्ति –
(क) सप्त (ख) अष्ट
(ग) षट् (घ) नव ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(१०) सम्बोधने विभक्तिः भवति –

(क) द्वितीया (ख) प्रथमा

(ग) तृतीया (घ) षष्ठी ( )

## अतिलघूत्तरात्मकप्रश्नाः–

अधस्तनेषु रेखाङ्कितशब्देषु विभक्तेः कारणं लिखत –

१. ग्रामं परितः वृक्षाणि सन्ति।

२. कविषु कालिदासः श्रेष्ठः।

३. मुक्तये हरिं भजति।

४. रामः चतुर्दश वर्षाणि वने अवसत्।

५. बालकः सिंहात् बिभेति।

६. ब्रह्मणः प्रजाः प्रजायन्ते।

७. हिमालयात् गङ्गा प्रभवति।

८. रामः देवदत्ताय शतं धारयति।

९. गुरवे नमः।

## लघूत्तरात्मकप्रश्नाः–

(१) अधोलिखित कारकाणां लक्षणानि उदाहरणानि च लिखत।

(क) करणम्

(ख) सम्प्रदानम्

(ग) अपादानम्

(घ) अधिकरणम्

(२) कारकस्य परिभाषा लेखनीया।

(३) संस्कृते कति कारकाणि सन्ति तेषां नामानि लिखत।

## योग्यताविस्तार खण्डः –

**(क) कोष्ठकगतशब्देषु उचितविभक्तेः प्रयोगं कृत्वा रिक्तस्थानानि पूरयत।**

१. नास्ति....................... समः शत्रुः। (क्रोधः)

२. शिष्या .................... विद्यां गृह्णन्ति। (गुरु)

३. माता ...................... स्निह्यति। (शिशु)

४. .................... भीतः बालकः क्रन्दति। (चौर)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. .................. क्रोध: जायते। (काम)

६. अलम् ................................। (विवाद)

७. ...........................परित: जलम् अस्ति। (नदी)

८. .......................... रामायणं रोचते। (भक्त)

९. ....................... बहि: छात्रा: कोलाहलं कुर्वन्ति। (कक्षा)

१०. भिक्षुक: ................. भिक्षां याचते। (नृप)

११. जनक: ..................... क्रुध्यति। (पुत्र)

**(ख) कोष्ठकेभ्य: शुद्धम् उत्तरं चित्वा रिक्तस्थानानि पूरयत –**

१. ........................ सह सुदामा वनम् अगच्छत् । **( कृष्णस्य / कृष्णेन )**

२. दिनेश: ........................... पुस्तकं यच्छति। **( रामं / रामाय )**

३. ...................... नम:। **( शिव: / शिवाय )**

४. पिता ....................... क्रु ध्यति। **( पुत्रे / पुत्राय )**

५. माता ..................... स्निह्यति। **( पुत्रे / पुत्रात् )**

६. ................ परित: क्षेत्राणि सन्ति। **( ग्रामस्य / ग्रामं )**

७. ...........................मोदका: रोचन्ते। **( बालकाय / बालका: )**

८. हरि:............... ......अधिशेते। **( वैकुण्ठे / वैकुण्ठम् )**

**(ग) अधोलिखितशब्देषु उचितविभक्तिप्रयोगं कृत्वा वाक्यरचनां कुरुत।**

१. विना

२. धिक्

३. बहि:

४. बिभेति

५. काण:

६. अन्तरा

७. पटुतर:

८. पटुतम:

९. स्वाहा

१०. उपवसति

११. अध:

१२. कुशल:



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**( घ ) अधोलिखितवाक्यानि संशोधनीयानि –**

१. विद्यालयस्य अभित: वाटिका।

२. ग्रामस्य परित: जलम् अस्ति।

३. श्रमस्य विना फलं न मिलति।

४. अहं रेलयानात् ग्रामं गमिष्यामि।

५. महावीरं नम:।

६. हरि: मथुरायाम् अधितिष्ठति।

७. शिव: पार्वत्या सह तिष्ठति।

८. अलं विवादम्

**( ङ) 'क' खण्डं 'ख' खण्डेन सह योजयत।**

| | क-खण्डः | ख-खण्डः |
|---|---|---|
| १. | धारिधातुयोगे | षष्ठी |
| २. | रुच्धातुयोगे | तृतीया |
| ३. | अङ्गविकारे | चतुर्थी |
| ४. | सम्बन्धे | चतुर्थी |
| ५. | अधिशीधातुयोगे | सप्तमी |
| ६. | वारिधातुयोगे | द्वितीया |
| ७. | यस्य च भावेन भावलक्षणम् | प्रथमा |
| ८. | कर्मवाच्यस्य कर्मणि | पञ्चमी |

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पञ्चमः खण्डः

# रचनात्मक-कार्यम्

## (क) प्रदत्तरूपरेखया कथासंयोजनम् /क्रमयोजनम्/सङ्केताधारित-वर्णनम्।

१. रचनात्मक-लेखनात् पूर्वं लेखकस्य मस्तिष्के सर्वे एव बिन्दवः स्पष्टाः भवेयुः। यथा मूर्तिकारः मूर्तिनिर्माणात् पूर्वं प्रतिमायाः एकं वैचारिकं आकारं स्वमनसि ध्यायेत्। लेखनस्य तदनुकूलं एकं स्पष्टं क्रमं च रचयेत् ।

२. रूपरेखायाः पूर्णतया अनुसरणं भवेत्। कोऽपि बिन्दुः न विस्मर्तव्यः। बिन्दूनां क्रमः अपि रूपरेखायाः अनुकूलः भवति।

३. बिन्दूनां संयोजनं सहजं प्राकृतिकं वा भवेत्। बिन्दूनां रूपरेखायाः च क्रमयोजने कल्पनायाः आवश्यकता भवति।

४. संयोजनं /वर्णनं सर्वथा व्याकरणदोषरहितं भवेत्। भाषा सूक्तिभिः, लोकोक्तिभिः, वाक्रीतिभिः च विभूषिता, सरला, सहजा भवेत्।

५. संयोजने/वर्णने त्रीणि तत्त्वानि विशेषरूपेण ध्यातव्यानि, तद्यथा-सुसम्बद्धता, रोचकता, वर्णनकुशलता च। अभ्यासेन कल्पनाशक्त्या च शनैः शनैः अभ्यासः भवति।

अत्र कथानां रूपरेखाः, क्रमयोजनं, संकेतानुसार-वर्णनं च उदाहरण-रूपेण प्रस्तूयन्ते।

### कथासंयोजनम् -

प्रदत्तरूपरेखया कथासंयोजनं करणीयम् -

वृद्धः व्याघ्रः...............जाले बद्धः............न मुक्तः............मूषकः..........मोचयितुं प्रयासः...........अट्टहासम्..........क्षुद्रः जीवः.........जालकर्तनं...........बहिः कृतवान् ।

एकस्मिन् वने वृद्धः व्याघ्रः निवसति स्म। तेन एकः शशकः जाले बद्धः। सः शशकः प्रचुरप्रयासेन अपि मुक्तः न अभवत्। जाले बद्धं शशकम् अवलोक्य एकः मूषकः तत्र अगच्छत्। तेन मूषकेन शशकं मोचयितुं प्रयासः कृतः। मूषकस्य इदं कृत्यं दृष्ट्वा अन्ये जीवाः अट्टहासम् अकुर्वन्। अनन्तरं तैः ज्ञातं यत् क्षुद्रः जीवः अपि प्रयासं कर्तुं शक्नोति। मूषकः जालकर्तनं कृत्वा शशकं बहिः कृतवान्।

### क्रमयोजनम् -

**क्रमरहितवाक्यानि समुचितक्रमानुसारं लिखत -**

१. चतुर्षु न कोऽपि पुत्रः यष्टिका-पुञ्जं त्रोटयितुम् अशकत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. कृषकस्य चत्वारः पुत्राः सर्वदा परस्परं कलहं कुर्वन्ति स्म।
३. कृषकः पुत्रेभ्यः कथयति यत् ते एकैकां यष्टिकां सरलतया त्रोटितवन्तः।
४. एकैकं पुत्रम् आहूय सः तं यष्टिका-पुञ्जं त्रोटयितुं कथयति।
५. सत्यमेव कथ्यते यत्- 'संघे शक्तिः कलौ युगे'।
६. प्रत्येकं पुत्रः सरलतया यष्टिकाः त्रोटयति।
७. तदा सः कृषकः तान् पुत्रान् कथयति यत् ते एकैकां यष्टिकां त्रोटयेयुः।
८. तदा ते ज्ञातवन्तः यत् यदि ते संघे स्थिताः भविष्यन्ति तदा शक्तिसम्पन्नाः भविष्यन्ति।

**समुचित-क्रमानुसारम्-**

१. कृषकस्य चत्वारः पुत्राः सर्वदा परस्परं कलहं कुर्वन्ति स्म।
२. एकैकं पुत्रम् आहूय सः तं यष्टिका-पुञ्जं त्रोटयितुं कथयति।
३. चतुर्षु न कोऽपि पुत्रः यष्टिका-पुञ्जं त्रोटयितुम् अशकत्।
४. तदा सः कृषकः तान् पुत्रान् कथयति यत् ते एकैकां यष्टिकां त्रोटयेयुः।
५. प्रत्येकं पुत्रः सरलतया यष्टिकाः त्रोटयति।
६. कृषकः पुत्रेभ्यः कथयति यत् ते एकैकां यष्टिकां सरलतया त्रोटितवन्तः।
७. तदा ते ज्ञातवन्तः यत् यदि ते संघे स्थिताः भविष्यन्ति तदा शक्तिसम्पन्नाः भविष्यन्ति।
८. सत्यमेव कथ्यते यत् -'संघे शक्तिः कलौ युगे'।

**प्रदत्त संकेतानुसारं वर्णनं लिखत -**

रेलस्थानकम्, महान् कोलाहलः, भारवाहकाः, रेलयानानि, हरितदीपं, रक्तदीपं, विटिका, पृच्छावातायनम्, जलपानगृहाणि, कार्यालयः, सुन्दरं दृश्यम्।

एकदा मम विद्यालयस्य केचन छात्राः भ्रमणार्थं रेलयानेन जयपुरनगरम् अगच्छन्। वयं सर्वे छात्राः जयपुर-रेलस्थानकात् बहिः अवातराम। तत्र महान् कोलाहलः श्रूयते स्म। तत्र एकः सुन्दरः कार्यालयः आसीत्। अस्माभिः तत्र उपस्थितम् एकम् अधिकारिणम् निवेदित यत् अस्माकं प्रयोगार्थं भारवाहकानां व्यवस्थां करोतु। येन वयं जलयानं ग्रहीतुं शक्नुमः। अनन्तरं वयं एकं सुन्दरं दृश्यम् अवलोकयितुं रेलस्थानकात् बहिः गताः। तत्र बहवः रेलयानानि आसन्। रेलयानं हरितदीपस्य संकेतं प्राप्य चलति, रक्तदीपम् अवलोक्य रेलचालकः रेलयानं वारयति। रेलस्थानके यात्रिणां सम्मर्दः आसीत्। ते स्व-स्व स्थानं गच्छन्ति स्म। वयमपि स्व विद्यालयं निवर्तयामास।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः

**(क) प्रदत्तरूपरेखया कथासंयोजनं करणीयम् –**

१. विशाल: वृक्ष:..........खगा: वसन्ति..........बुभुक्षिता:.........इतस्तत: भ्रमन्ति.........तण्डुलकणान् अपश्यन्...........खादन्ति..........जालेन बद्धा:........किं करणीयम्.........सर्वे जालेन सह एव एकं स्वमित्रम् अगच्छन्........मित्रम् एक: मूषक:.........जालं दन्तै: अकर्तयत्.........स्वतन्त्रा:........सुखं तु एकतायाम् एव विद्यते।

२. नर: सरोवरतटे अभ्रमत्.........चिन्तने रत:.........वानराणां शब्दै: तस्य ध्यान-भङ्ग: अभवत्........वानरा: नातिदूरे.......धावितुम् आरभत्.........वानरा: अपि अनुधावितवन्त:.......मा धाव, भयं त्यक्त्वा.......स्थिर: भव.........वृद्धजनस्य उच्च-स्वरं.......तत्रैव स्थितवन्त:..........वानरसमूह: पलायित:.........ज्ञानचक्षुषी उन्मीलिते........आपद्भ्य: मुक्ति: दृढ़सङ्कल्पेन,...........न ताभ्य: पलायनेन। किं भवन्त: जानन्ति एष:.........एष: आसीत् स्वामी..............।

**(ख) क्रमरहितवाक्यानि समुचितक्रमानुसारं लिखत –**

**अ –**

१. तस्य गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत्।
२. श्रेष्ठिनि पृष्टे स: आह– नद्दीतटात् स: श्येनेन हृत:।
३. सुचिरेण कालेन प्रत्यागत: स: श्रेष्ठिनं स्वतुलाम् अयाचत्।
४. तयो: वृत्तान्तं श्रुत्वा धर्माधिकारिभि: विहस्य द्वावेव तुला–शिशु–प्रदानेन सन्तोषितौ।
५. आसीत् कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्र:।
६. श्रेष्ठि: अवदत् – 'मूषकै: भक्षिता तुला।'
७. जीर्णधन: तुलां कस्यचित् श्रेष्ठिन: गृहे निक्षेपरूपेण स्थापयित्वा देशान्तरम् अगच्छत्।
८. श्रेष्ठिन: अनुमत्या जीर्णधन: तस्य पुत्रेण सह स्नानार्थं नदीमगच्छत्।

**ब –**

१. अस्ति च सायं समय:।
२. मासोऽयमाषाढ:।
३. अस्मिन् समये एक: षोडशवर्ष–देशीयो गौरयुवा हयेन पर्वतश्रेणी: उपर्युपरि गच्छति स्म।
४. अस्तं जिगमिषुर्भगवान् भास्कर:।
५. एष सुघटितदृढ–शरीर:।
६. कोऽपि शिववीरस्य विश्वासपात्रं सिंहदुर्गात् तस्यैव पत्रमादाय तोरणदुर्गं प्रयाति।
७. एष: श्याम–श्यामैर्गुच्छ–गुच्छै: कुचितै:–कुचितै: कचकलापै: कमनीयकपोलपालि:।
८. एष: समाच्छादित–ललाट–कपोल–नासाग्रोरोष्ठ: प्रसन्नवदनाम्भोजप्रदर्शित:।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सङ्केताधारित-वर्णनम् –**

(स) प्रदत्त संकेतानुसारं वर्णनं लिखत –

१. महाकविः कालिदासः, श्रेष्ठः कविः, सप्त-कृतयः, प्रसिद्धतमं नाटकं, उपमा-प्रयोगः, वैदर्भी रीतिः, महाकाव्यद्वयं, खण्डकाव्यद्वयं, कलापक्षः, भावपक्षः, विश्वसाहित्ये स्थानम्।

२. अस्माकं, मातृभूमौ, स्मरिष्यति, अत्र, मधुरतराणि, परमेश्वराः, नानाविधानि, जन्मभूमिश्च।

## (ख) अनुवादकार्यम् –

**अनुवादकार्यार्थं किंचित् सङ्केताः ध्यातव्याः –**

**(क) लट् + प्रथमा + प्रथमपुरुषः –**

| | |
|---|---|
| छात्र पढ़ता है। | छात्रः पठति। |
| वे दोनों हँसते है। | तौ हसतः। |
| आप यहाँ आते हैं। | भवान् अत्र आगच्छति। |
| आप लिखती है। | भवती लिखति। |
| वहाँ क्या हो रहा है? | तत्र किं भवति ? |

**(ख) लट् + प्रथमा + मध्यमपुरुषः –**

| | |
|---|---|
| तुम लिखते हो। | त्वं लिखसि। |
| तुम दोनों कहते हो। | युवां वदथः। |
| तुम सब पढ़ते हो। | यूयं पठथ। |

**(ग) लट् + प्रथमा + उत्तमपुरुषः –**

| | |
|---|---|
| मैं देखता हूँ। | अहं पश्यामि। |
| हम दोनों खेलते हैं। | आवां क्रीड़ावः। |
| हम सब जीतते हैं। | वयं जयामः। |

**(घ) लोट् + द्वितीया –**

| | |
|---|---|
| वह खाना खाये। | सः भोजनं खादतु। |
| तू गाँव को जा। | त्वं ग्रामं गच्छ। |
| मैं यहाँ से चलूँ। | अहं इतः चलानि। |

**(ङ) लृट् + द्वितीया द्विकर्मक–**

| | |
|---|---|
| भारत शत्रु से युद्ध जीतेगाा। | भारतः शत्रुं युद्धं जेष्यति। |
| शिक्षक शिष्य से प्रश्न पूँछेगा। | शिक्षकः शिष्यं प्रश्नं प्रक्ष्यति। |
| ग्वाला गाँव से गाय को ले जायेगा। | गोपः ग्रामं गां नेष्यति। |

**(च) लङ्+ तृतीया –**

| | |
|---|---|
| राजा के साथ सेनापति चला। | भूपतिना सह सेनापतिः अचरत्। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | |
|---|---|
| संन्यासी के साथ कवि ने गाया। | यतिना सार्धं कवि अगायत्। |
| मुनि ने सत्य से संसार को जीता। | मुनिः सत्येन लोकम् अजयत्। |

**(छ) विधिलिङ्ग + चतुर्थी –**

| | |
|---|---|
| उसे उस ब्राह्मण को धन देना चाहिए। | सः तस्मै विप्राय धनं दद्यात्। |
| तुमे किस शिष्य को ज्ञान देना चाहिए ? | त्वं कस्मै शिष्याय ज्ञानं वितरेः ? |
| शिष्य का हित हो। | शिष्याय हितं भवेत्। |

**(ज) सर्वनाम पुल्लिङ्ग + पंचमी**

| | |
|---|---|
| उस वृक्ष से यह पता गिरा। | तस्माद् वृक्षात् एतत् पत्रम् अपतत्। |
| इस घोड़े से वह मनुष्य गिरता है। | अस्माद् अश्वात् स नरः पतति। |
| यह शिष्य उस गुरु से पढ़ता है। | एषः शिष्यः तस्माद् गुरोः अधीते। |

**(झ) सर्वनाम स्त्रीलिङ्ग + षष्ठी**

| | |
|---|---|
| यह उस बालिका की पुस्तक है। | इदं तस्याः बालिकायाः पुस्तकम् अस्ति। |
| वह कन्या इस बकरी का दूध चाहती है। | सा कन्या अस्याः अजायाः दुग्धम् अभिलषति। |
| वह बालिका किस कन्या की बहिन है ? | सा बालिका कस्याः कन्यायाः भगिनी अस्ति ? |

**(ञ) युष्मद् + सप्तमी**

| | |
|---|---|
| तुझमें सत्य है। | त्वयि सत्यं वर्तते। |
| तुम दोनों में ज्ञान है। | युवयोः ज्ञानम् अस्ति। |
| तुम सब में ईश्वर है। | युष्मासु ईश्वरः अस्ति। |

**(ट) अस्मद्**

| | |
|---|---|
| कार्य पूरा करने पर मैं विद्यालय गया। | कार्ये कृते सति अहं विद्यालयम् अगच्छम्। |
| मेरी सत्य में श्रद्धा और निष्ठा है। | मम सत्ये श्रद्धा निष्ठा वा वर्तते। |
| हमारी ईश्वर में अभिलाषा हो। | अस्माकम् ईश्वरेऽभिलाषा वर्तताम्। |

**(ठ) परिचयः –**

| | |
|---|---|
| मेरा नाम नरेन्द्र है। | मम नाम नरेन्द्रः। |
| आपका नाम क्या है ? (पुरुष से) | भवतः नाम किम् ? |
| आपका नाम क्या है ? (महिला से) | भवत्याः नाम किम् ? |
| मैं अध्यापक हूँ। | अहम् अध्यापकः। |
| आप कौन है ? (पुरुष से) | भवान् कः ? |
| आप कौन है ? (महिला से) | भवती का ? |
| मेरे पिताजी का नाम गोपाल है। | मम पितुः नाम गोपालः। |
| आपके पिताजी का नाम क्या है ? | (पुरुष से) भवतः पितुः नाम किम् ? |
| आपके पिता/माता का नाम क्या है? (महिला से) | भवत्याः पितुः/मातुः नाम किम् ? |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | |
|---|---|
| मैं बाँसवाड़ा नगर में रहता हूँ। | अहं बाँसवाड़ा नगरे निवसामि। |
| आप कहाँ रहते/रहती हो ? | भवान्/भवती कुत्र निवसति ? |

**(ड) विविधानि वाक्यानि –**

| | |
|---|---|
| संगठन से ही भारत विश्वगुरु बनेगा। | संगठनेनैव भारतं विश्वगुरुः भविष्यति। |
| योग से शरीर स्वस्थ होता है। | योगेन शरीरं स्वस्थं तिष्ठति। |
| वेद सर्वाधिक प्रामाणिक ग्रन्थ हैं। | वेदाः सर्वाधिकाः प्रामाणिकाः ग्रन्थाः सन्ति। |
| जननी और जन्मभूमि स्वर्ग से महान् है। | जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। |
| उठो, जागो और लक्ष्यप्राप्ति तक मत रुको। | उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत। |
| सज्जनों की बात माननी चाहिए। | कर्तव्यं हि सतां वचः। |
| अनेक गुणों में एक दोष छिप जाता है। | एको हि दोषो गुणसन्निपाते निमज्जति। |
| दूसरे को उपदेश देना बहुत सरल है। | सुखमुपदिश्यते परस्य। |
| बड़ों का अनुकरण करो। | महतां पदम् अनुविधेयम्। |
| तृष्णा कभी कम नहीं होती। | तृष्णैका तरुणायते। |
| संसार में कोई भी सर्वज्ञ नहीं। | न हि सर्वविदः सर्वे। |
| बन्धु के समान कोई बल नहीं। | नास्ति बन्धुसमं बलम्। |
| योगी को संसार तिनके के समान है। | निःस्पृहस्य तृणं जगत्। |
| जो जैसा बीज बोता है वैसा ही फल प्राप्त करता है। | यो यद्वपति बीजं लभते सोऽपि तत्फलम्। |

## अभ्यासः

**(क) रिक्तस्थानेषु उचितपदानि पूरयत –**

१. इदं तस्याः .............. पुस्तकम् अस्ति (बालिका)

२. ...........सत्यं वर्तते (युष्मद्)

३. .............कृते सति अहं विद्यालयम् अगच्छम् (कार्य)

४. .............भोजनं खादतु (तत् पुँ.)

५. ..............सह सेनापतिः अचरत् (भूपतिः)

६. सः तस्मै .......... धनं दद्यात् (विप्रः)

७. ...............हितं भवेत् (शिष्यः)

८. तस्माद्................एतत् पत्रम् अपतत् (वृक्षः)

९. एषः शिष्यः तस्माद्............अधीते (गुरुः)

१०. ............ पदम् अनुविधेयम् (महत्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**( ख )  संस्कृतानुवादं कुरुत –**

१. वह गाँव को जाता है।
२. आप वहाँ जाते है।
३. वे सब यहाँ आते हैं।
४. तू राज्य की रक्षा करता है।
५. तुम दोनों कब भोजन बनाते हो।
६. तुम लोग ईश्वर को प्रणाम करते हो।
७. मैं फूल सूँघता हूँ।
८. हम दोनों पाठशाला जाते हैं।
९. हम वहाँ से नहीं आ रहे है।
१०. वे सातों बालक ईश्वर का चिन्तन करते हैं।

❀ ❀ ❀



Downloaded from https:// www.studiestoday.com